Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्रीहेमचन्द्राचार्यग्रन्थावली.

# मण्डनग्रन्थसंग्रह.

प्रकाशक-
श्रीहेमचन्द्राचार्य सभा-पाटण.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नम्र सूचन
इस ग्रन्थ के अभ्यास का कार्य पूर्ण होते ही नियत
समयावधि में शीघ्र वापस करने की कृपा करें.
जिससे अन्य वाचकगण इसका उपयोग कर सकें.

श्रीहेमचन्द्राचार्यग्रन्थावली. नं. ७.८.९.१०.११.

महेश्वरकविकृत—

# काव्यमनोहरः

तथा

मण्डनमन्त्रिकृत—

# मण्डनग्रन्थसंग्रहः

(१.)

(१ कादम्बरीमण्डन-२ चम्पूमण्डन-३ चन्द्रविजयप्रबन्ध
४ अलंकार मण्डनानि.)

श्रीमत्पन्यासश्रीनीतिविजयसमुपदिष्ट-भिन्नभिन्न-
द्रव्यसहायकेभ्यो लब्ध्वा द्रव्यसहाय्यं
पट्टनस्थश्रीहेमचन्द्राचार्यसभायाः सेक्रेटरी-
'शा. लहेरचन्द भोगीलाल' इत्यनेन
प्रकाशितः
श्रावक पण्डित-वीरचन्द्र-प्रभुदासाभ्यां
च संशोधितः

संवत् १९७४. वीर संवत् २४४४. सन १९१८.

प्रत. ३००.

मूल्यम्-० १२-०.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

आदिमग्रन्थचतुष्टयं अहम्मदावाद–'पांचकुवा' प्रत्यासन्न
'सत्यविजय' मुद्रणयन्त्राधिपतिना 'शा. सांकलचंद
हरिलालेन' मुद्रितं,
अलङ्कारमण्डनं च
अहम्मदावाद–'ढींकवा चोकी' प्रत्यासन्न 'शांतिविजय'
मुद्रणाधिपतिभ्यां
ईश्वरलाल केशवलाल–माणेकलाल माधवलालाभ्यां
मुद्रितम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

## श्रीमत्पन्यासश्रीनीतिविजयमहाराजसमुपदिष्ट द्रव्यसहायकनामावली.—

| | | |
|---|---|---|
| १ शा. सरूपचन्द घेलचन्द रणुज | } | काव्यमनोहरः<br>कादम्बरीदर्पणम् |
| २ शा. वाडीलाल वस्ताचन्द पाटण<br>(वसावाडो) | } | चम्पूमण्डनम् |
| ३ शा. केशवलाल रतनचन्द पाटण<br>(फोफलीयावाडो) | } | चन्द्रविजय प्रबन्धः<br>अलङ्कार मण्डनम् |

## (श्रीहेमचन्द्राचार्य ग्रन्थावलीमां तैयार थतां ग्रंथो.)

१ बृहद्महार्णवन्यास.
२ धर्मपरिक्षा.
३ चतुर्विंशतिप्रबन्ध.
४ तिलकमंजरीसार.
५ अनेकान्तवादप्रवेश.
६ प्राकृतव्याकरण.
७ काव्यमण्डन.
८ संगीतमण्डन.
९ उपसर्गमण्डन
१० शृंङ्गारमण्डन
११ जीवानुशासन.
१२ नाभेयनेमिद्विसंधानकाव्य
१३ सम्मतितर्क–भाग–२.
१४ तिलकमंजरीकथासारांश. (ગુજરાતી).

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रीमद्बाहडसङ्घपो विजयते येनायमाप्तः सुतः ॥५॥

धन्या सा जननी जिनेश्वरमहाभक्त्युल्लसन्मानसा
सद्दानव्रततत्परा मतिमती सौभाग्यशीलालया ।
नित्यं जीवदयाकुला गुणनिधिः प्राप्तो ययाऽसौ महान्
सत्पुत्रः कुलमण्डनं श्रुतपरः सद्भूरिभाग्योदयः ॥ ६ ॥
संहृष्टाः सुहृदः समागतरुचो धन्यं कुलं ख्यातितं
मन्यन्ते गुणशालिनि प्रियसुते संजात एवातुले ।
वित्तापूर्णकृतार्थिनः समुदितप्रख्यातसद्भूतयो
धर्माधर्मविचारणैकनिपुणाः शीलोल्लसन्मानसाः
किं धात्रा कृत एष निर्जरतरुः चिन्तामणिर्वाऽथवा
किं वा कामगवी कृता जनपदे किं तोयदो वाऽपरः ।
किं कामो मलयाचलः किमथवा किं वा सुमेरुर्महान्
क्षीरोदः किमुवा कलानिधिरहो किं भास्करः सद्गुणैः॥८॥
यस्याङ्गे घटितं त्वयःसुकनकं संजायते नेकशः
सोऽयं वा किमुवा जिनेश्वरमहाभक्तःकलौ निर्मितः ।
किं कर्णःकिमुवा विरोचनसुतःकिं वाऽर्जुनो विक्रमी
प्राहुर्यस्य बुधाः सुजन्मकरणे ह्येवं शुभैर्लक्षणैः ॥९॥
॥ युग्मम् ॥

एतैरुक्तमिदं सुनामकरणं यन्निश्चितं मण्डन-
स्त्वित्येवाद्भुतरामणीयकयुतं तत्सार्थकं सन्ततम् ।
कर्तृत्वं कुरुते हि मण्डनविभुर्नामानुरूपं महत्
बालत्वादि विवेकसत्यविमलं तद्वर्ण्यते वै मया ॥ १० ॥
बालत्वे स चकार खेलनमथो नानाविधैः क्रीडितैः
साकं सच्छिशुभिस्ततोऽधिकवपुः किञ्चित्प्रबुद्धः शनैः ।
विद्यारम्भमत करोत्यनुदिनं प्रज्ञान्वितः सादरः
पाठज्ञस्तु यथाक्रमं विदितवाक्काव्याभिधानानि च ॥ ११ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जाग्रद्व्याकरणश्च नाटकशुभालङ्कारविज्ञस्तथा
सङ्गितातुलकोविदः प्रविलसद्गम्भीरशास्त्रान्वितः ।
चातुर्यैकनिवासभूमिरतुलैः प्राप्तोन्नतिः सद्गुणैः
श्रीमालान्वयवर्द्धनोऽमलमतिः श्रीमण्डनो राजते ॥ १२ ॥
उदीरिता या गणकैर्महत्यो यज्जातके पञ्चदशोपमा हि ।
मायापृथक्त्वेन विवर्ण्यते ताः श्रीमण्डनस्येप्सितदायकस्य ॥१३॥
शाखी जडोऽन्यैः परिपालितस्तु कोलाहलैर्दत्तफलो द्विजेभ्यः ।
कृतः स नाके विधिना गुणोनः सदाफलोऽयं भुवि सद्गुणस्तु॥१४॥
ज्ञात्वा पशुं कामगवीं स वेधा तदाश्रितं कामदुघं गुणं तु ।
संहृत्य पश्चात्खलु मण्डनं तं कामप्रदं क्षोणितले चकार ॥१५॥
चिन्तामणिश्चिन्तितमेव दाता ज्ञातृत्वहीनः प्रतिभाति नाके ।
गुणाधिको विश्वसृजा कृतोऽसौ चिन्तामणिर्ज्ञानविवेकपूर्णः ॥१६॥
मेघः किरत्यूषरभूमिकायां क्लिष्ट्वा जगत्यां सुतडिल्लताभिः ।
नायं तथा वर्षति हृष्टचेता हेमाम्बुवृष्ट्या बुधभूमिकासु ॥१७॥
विचिन्त्यमानो हृदि दाहकारी कामस्तदर्थं वितनुः पृथिव्याम् ।
धात्रा कृतोऽसौ सुतनुः प्रियाणां कृपाकुलेनातिसुखप्रदाता॥१८॥
फूत्कारमुञ्चद्दहलाहिभीतेरसेव्यमानो मलयाचलः सः ।
जातस्तथाऽयं न भवत्यनेकसद्भिः सुसेव्योऽनुचरैश्च तादृक् ॥१९॥
चामीकरैः पूर्णतमः सुमेरुः स्वगोत्रजातानुपकारहीनः ।
नायं तथा सर्वसमृद्धियुक्तः साकं सुहृद्भिः खलु नन्दतीह ॥२०॥
रत्नाकरश्चेति हि कर्णपेयं यच्छ्रूयते नाम परं हि सिन्धोः ।
व्यर्थं तदेतं कृपणातिभावाद्भवत्यवश्यं न तथाऽस्य दातुः ॥२१॥
क्षणं लघुर्यः क्षणवर्द्धमानः पक्षैकशुद्धः स विधुः कलङ्की ।
नायं तथा भाति कलाभिगामी दिने दिने निर्मलचारुवेषः ॥२२॥
अस्ताभिगामी चलनेन खिन्नः तीव्रैर्मयूखैर्भुवनानुतापी ।
मित्रस्तथा नात्मभुवा कृतोऽसावहर्न्निशं सोऽभ्युदयेन पूर्णः॥२३॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



संघट्टनाद्यस्य भवत्यनेकमयः सुवर्णं न तु दूरसंस्थम् ।
स्पर्शादयं भाति जनं सुरायं दृष्ट्वैव दृष्टं किल यः करोति॥२४॥
सुज्ञः करोत्येव परां सुभक्तिं जिनेश्वरस्यामिततेजसश्च ।
यस्य प्रसादाद्विपुलां सुभूतिं यः प्राप्तवान्पुण्यसमूहजन्मा ॥२५॥
सुवर्णदानैर्विनयैर्विवेकैः सत्यप्रतिज्ञाविमलैर्वचोभिः ।
युक्तोऽपि चैषश्चतुराननेन कर्णाधिको निर्मित एव भूमौ ॥२६॥
दैतेयसंतानभवो ह्यधर्मी बलिः सुरोपद्रवकारकश्च ।
विराजतेऽसौ न तथा सुधर्मा सुवंशजातोऽमरपूजकस्तु ॥ २७ ॥
स्वविक्रमैर्बन्धुजनाभिहन्ता पार्थः पुरा पाण्डुसुतः पृथिव्याम् ।
जातस्तथाऽयं न तु बन्धुमोदी पराक्रमैर्निर्ज्जितवैरिवर्गः ॥२८॥
एवंविधैः पूर्णगुणैः प्रशस्तो विराजते मण्डननामधेयः ।
मनोभिरामं कलयौवनं वै कामालयं यात उदारकेलि ॥२९॥
प्रगल्भितं तस्य विवाहयोग्यं वयः समालोक्य मनोहरं सत् ।
तज्ज्ञातिवर्गाः कुलशीलपूर्णा वाञ्छन्ति संबन्धमनेन सार्द्धम्॥३०॥
ये प्रेषितास्तैर्गुरुविप्रवर्याः संबन्धमेनं बहुधा विचिन्त्य ।
ते आगतास्तद्गुरुसन्निधानं सम्बन्धमार्यं बहु वक्ष्यमाणाः ॥३१॥
इत्थं समाकर्ण्य वचस्त्वमीषामाज्ञां ददात्येष विवाहकार्ये ।
वैवाहिकी चारु समृद्धिरिष्टा कार्येति युष्माभिरसंशयं तु ॥३२॥
किं वर्ण्यते तस्य वरं विभुत्वं पद्मालया यस्य गृहे वसन्ती ।
विवाहसामग्र्यविधेः तदानीं व्ययाय नित्योत्सवमानसस्य ॥३३॥
अन्तःपुरं चित्रविचित्रितं तत्समृद्धितं यस्य विभूतिभिःसत् ।
सत्तोरणं पल्लवतोयपूर्णसुवर्णकुम्भविलसत्पताकम् ॥ ३४ ॥
सत्काचबद्धाऽऽङ्गणभूमिभागं रत्नप्रदीपावलिभिः प्रशस्तम् ।
वादित्रघोषैर्घनगर्ज्जिताभैः सुशोभितं कोविदमन्त्रपूतम् ॥३५॥
सीमन्तिनीगायनपूर्यमाणं सन्मागधोदीरितमङ्गलाढ्यम् ।
कर्पूरकृष्णागुरुचन्दनाद्यैः सुधूपितं धूपवरैस्तथान्यैः ॥ ३६॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जातीलसत्केतकमल्लिकाभिः वरप्रसूनैश्च शुभैः सुवासम् ।
सन्नारिकेलक्रमुकैः तथाऽन्यैः ताम्बूलपत्रैः सतताभितस्तम् ॥३७॥
वधूजनैर्भूषणराजमानैर्विराजितं तत्र सदनं तदानीम् ।
विभाति पत्तोर्णवरैर्वितानैर्मुक्ताफलापूरितचारुमध्यैः ॥ ३८ ॥

अन्तकुलकम् ॥

एवंविधं सर्वसमृद्धियुक्तं गेहं शुभाभ्यां प्रथमं विधाय ।
सुहृज्जनानन्दकरं मिथो हि विवाहकार्ये तदनुप्रवृत्तम् ॥ ३९ ॥
शुभे सुलग्ने गणकैर्विचिन्त्ये सौम्यग्रहैरिष्टबलैर्बलिष्ठे ।
श्रीमण्डनः कामरुचिः प्रयातः तदालयं पाणिनिपीडनाय ॥४०॥
दुकूलयुग्मावृतचारुवेषः श्रीगन्धकक्कोलकलेपिताङ्गः ।
धम्मिल्लभारान्तरसाधुमाल्यः स्फुरत्प्रभालङ्करणैर्वरेण्यः ॥ ४१ ॥
मुक्तावलीनिर्मलकण्ठभूषो माणिक्यसत्काञ्चनकुण्डलाढ्यः ।
केयूररत्नोर्जितबाहुवल्लिर्नीराजमानः सततं वधूभिः ॥ ४२ ॥
सच्चामरैः काञ्चनपूर्णदण्डै रत्नार्चिषाऽलङ्कृतदिग्विभागैः ।
संवीज्यमानोऽनुचरैरुदारः प्रयातवित्तैर्जयशब्दपूर्वैः ॥ ४३ ॥
शुभातपत्रेण करोधृतेन यः सेवकैः कार्यपरैः तदन्यैः ।
लब्धातिमानैरधिगम्यमानः प्रहर्षरोमाञ्चितगात्रवल्लिः ॥ ४४ ॥
व्यावल्गनैर्निर्जितकृष्णसारे डिण्डीरपिण्डामलविग्रहेऽस्मिन् ।
पल्याणसंशोभितपृष्ठभागे समीरवेगे तुरगे निषण्णः ॥ ४५ ॥
मृदङ्गभेरीपटहैर्महद्भिः सडिण्डिमैः कांस्यविशेषनादैः ।
वादित्रभेदैः सकलैः पुरस्तात्स्ववाहिनीभिर्महितश्च युक्तः ॥४६॥
जालान्तरान्तर्गतदृष्टिपातैः कान्ताजनैः संततपीयमानः ।
वरेण्यलावण्यविशेषतुष्टैस्तत्कालमेवोज्झितगेहकार्यैः ॥ ४७ ॥

॥ आदिकुलकम् ॥

श्रीमण्डनस्यार्जितनित्यकीर्तेर्जातं हि पाणिग्रहणं तदानीम् ।
कुलोचिताचारयुतं विशिष्टं नीतम्बिनीभिर्द्विजपुण्यमन्त्रैः ॥४८॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



बाला क्षौमनिवासिनी सुवदना भृङ्गालिका रोहिणी
कण्ठालम्बिततारहारवदना त्रस्यत्कुरङ्गीक्षणा ।
स्फूर्ज्जद्बाहुसुकङ्कणा रणझणन्मञ्जीरपादा लसद्-
भालप्रान्तसुपत्रिका प्रविलसन्नासाचलन्मौक्तिका ॥४९॥
हेमाम्भोरुहचारुगात्रलतिका लज्जाभरैः संनता
सिन्दूरारुणसत्प्रवालनिकरोद्यताधरोष्ठी शुभा ।
पुष्पाकीर्णशिरोरुहाऽलसगतिः पञ्चास्यमध्यातुला
श्रीसङ्घाधिपमण्डनेन रमणी तत्कालमालोकिता ॥ ५० ॥
॥ युग्मम् ॥

तौ दम्पती भूषणभूषिताङ्गौ संलज्जमानौ नितरां चकास्तः ।
अन्योऽन्यलावण्यभरेण हृष्टावनेकतोषान्वितचित्तवृत्ती ॥ ५१ ॥
अर्थिव्रजाः कार्यमिदं गरिष्ठं जातं समाकर्ण्य तु याचितुं ते ।
श्रीमण्डनं दानगुणाद्वितीयं समागता मण्डपवेदिकायाम् ॥५२॥
विराजते सा चतुरङ्गपूर्णा सभा सभाग्येन तु मण्डनेन ।
कलावतेवातितरां त्रियामाऽऽकारप्रसनाऽम्बरकारिणेव ॥५३॥
मध्येसभं संततसंस्थितोऽयं शृणोति सर्व्वांस्तु कलाविशेषान् ।
स्तुतः प्रबन्धैः कविभिः सुकाव्यैर्गाथादिभिःप्राकृतकैरुदारः ॥५४॥
बुधैस्तु नैयायिकमुख्यकैर्यो वैशेषिकैर्भाट्टविशेषविज्ञैः ।
वेदान्तविद्भिः स्तुत एष सांख्यैः प्राभाकरैः संततमेव बौद्धैः ॥५५॥
स्तुतस्तथाऽयं गणितज्ञकैस्तु भूगोलविद्भिः शकुनाभिरामैः ।
प्रश्नप्रभेदैः सुमुहूर्तविज्ञैः पाटीबृहज्जातककोविदैश्च ॥ ५६ ॥
देशर्तुकालप्रकृतिप्ररोगवयश्चिकित्साऽखिललक्षणज्ञैः ।
असाध्यसाध्यादिरसक्रियाज्ञैर्वैद्यैः सभायां खलु सेव्यतेऽसौ॥५७॥
साहित्यविद्भिः पतिनायिकादिप्रदेशसल्लक्षणकोविदैश्च ।
सुभावयोषित्प्रियकेलिरज्यद्विलासवद्भिःस्तुतिभिः स्तुतःसः॥५८॥
निषादमुख्यस्वरगायनैश्च लघुद्रुतातिप्लुततालभेदैः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रीरागपूर्वप्रथितातिरागोल्लसन्मतैः सेव्यते एष एभिः ॥५९॥
कैवारदक्षा विरदप्रसन्ना देशान्तरप्राप्तसुभूतिमानाः ।
अम्नायपूर्वैर्वचनैः सुहृष्टाः सन्मागधास्तं सततं स्तुवन्ति ॥६०॥

इति रुचिरवचोभिः सादरं स्तूयमानः
प्रतिदिनमतिदैवात्ख्यातितो भूभुजेषु ।
वितरति बहुधा यन्मण्डनो हृष्टचेताः
तदखिलमिदमग्रे वर्ण्यते सन्मयैतत् ॥ ६१ ॥

इतिश्रीकाव्यमनोहरे महाकाव्ये महेश्वरकृतौ श्रीमण्डनजन्मा-
दिगुणवर्णनो नाम प्रथमः सर्गः ॥

अथोच्यते याचकपुङ्गवेभ्यो विहायितं यद्वितरिष्यतेऽसौ ।
भुवं ददाति प्रथमं षडङ्गविद्भयः कषायांशुकभूषितेभ्यः ॥१॥
ये कुण्डले रत्नमणिप्रसन्नमुक्ताफलादीपितकेशपाशे ।
अनेन दत्ते श्रुतिपारगेभ्यः ताभ्यां नृपायन्त्यतिविस्मयं हि ॥२॥
चामीकरालङ्कृतपुष्परागे ददात्यसौ दोष्कटके कविभ्यः ।
शुभाङ्गुलीभूषणमन्यदेव दशावधानातिकुतूहलेभ्यः ॥ ३ ॥
सदोचितज्ञः शकुनप्रहृष्टः सांवत्सरेभ्यो वितरत्यसौ तु ।
दुकूलयुग्मानि सकाञ्चनानि दृष्ट्वा जना विस्मयमाशु याताः ॥४॥
असौ सदा यच्छति सद्भिषग्भ्यो वित्तं च पत्तोर्णसुकञ्चुकानि ।
महौषधध्वस्तगदव्रजेभ्यस्तूर्णप्रचूर्णारुचिनाशकेभ्यः ॥ ५ ॥
साहित्यविद्भ्यः प्रथितानि दत्ते मञ्जिष्ठवासांसि गभिरचेताः ।
कलावतां कल्पितदायकोऽसौ श्रीमण्डनः सर्वदिगन्तकीर्त्तिः ॥६॥
सङ्गीतशास्त्रप्रवरेभ्य एभ्यो मुक्तावलीकाञ्चनतोडरांश्च ।
तद्गीतसंप्रीतमना ददाति विज्ञानपूर्णः श्रुतपारगामी ॥ ७ ॥
राजन्यसंसद्बहुकीर्तिकृद्भ्यः तुरङ्गचामीकरचामराणि ।
यच्छत्यसौ सन्ततकीर्तिकामः सेवापराणां प्रथमं ददानः ॥ ८ ॥
त्यागोदयं यस्य विलोक्य याता वैदेशिका दैन्यतमोऽपहन्तुम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



समस्तदिग्मण्डलचारिणो ये राजन्यसन्मानधनेन पूर्णाः ॥९॥
यस्त्यागमेघोदय एव याते तृप्त्यन्वितो याचकचातकौघः ।
विलोक्यते कीर्तितडिल्लताभिः सुगर्ज्जिते वर्द्धितभूरिसस्ये ॥१०॥
यस्त्यागचन्द्रोदय एव जाते विकासमायाति धनांशुभिस्तु ।
स गम्भीरविद्वत्कुमुदौघ एवामितप्रभे तोषितसच्चकोरे ॥ ११ ॥
यस्त्यागशीतांशुकलोदयेन बुधोदधिः शास्त्रसुवारिपूर्णः ।
अहो ! किमाश्चर्यमिदं हि दृष्टं दारिद्र्यवेलामभिलङ्घतेऽसौ ॥१२॥
विभ्राजते याचकमण्डलीयं सन्मानदानप्रणतिप्रसन्ना ।
श्रीमण्डनेनामितदायिना वै यथौषधीशेन महोडुमाला ॥१३॥
यथान्यदेशीय इहागतो यः सद्याचकौघो बहुदानमानः ।
गतो दिशं स्वां पृथुकीर्तिकारः प्रत्येकतस्तस्य वदन् गुणादीन् ॥
एके गता वर्णितुमस्य दानं प्राचीं सुराजन्यकदम्बकाढ्याम् ।
प्रयागतीर्थादिसुसेव्यमानां मुमुक्षुभिर्भासितपत्तनौघाम् ॥१५॥
केचित्प्रयाता ज्वलनाभिरामामाशां महिपालयशःप्रसन्नाम् ।
विस्फारितुं कीर्तिमनेकधाऽस्य तद्दत्तनानाविधभूतितुष्टाः ॥१६॥
केचित्सुहृष्टा दिशि दक्षिणस्यां स्थित्वा वदन्त्यस्य गभीरतां ते ।
ये प्रेषिताश्चैलतुरङ्गहेमचामीकरोद्भासितकुण्डलाढ्याः ॥ १७ ॥
अन्ये तु याता ककुभं तदन्यां सुशोभितां कौङ्कणराजवृन्दैः ।
स्तोतुं महौचित्यमनेकवारं मनोरथाधिक्यविहायितस्य ॥१८॥
ये वायवीं वै गमितास्तु काष्ठां सुतीर्थपुण्यां नृपतिप्रसन्नाम् ।
ज्ञातृत्वमर्हद्बहुवर्ण्यमानमर्थिव्रजा मुक्तदरिद्रसङ्गाः ॥ १९ ॥
याता उदीचीमपरेऽर्थिनस्तु मूर्त्ताभिषिक्तप्रचुरां सुपुराम् ।
सौजन्यमस्यामितदायकस्य स्तुत्यं विधातुं परिपूर्णकामाः ॥२०॥
पिनाकपाणिप्रथितां च काष्ठां ये प्रस्थिता याचकपुङ्गवास्तु ।
गुणातिबाहुल्यमनेकधाऽस्य कर्तुं [illegible] एव ॥ २१ ॥
दिङ्मण्डलीकीर्तितकीर्तिपूरः समस्तविद्[illegible] सः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सङ्घाधिपो मण्डननामधेयो विद्योतते याचककल्पशाखी ॥२२॥
विहायितं वर्णितमात्मशक्त्या मया श्रुताविष्कृतबुद्धिनाऽस्य ।
अथोच्यते त्वन्यतरत्प्रमेयं शृङ्गारपूर्वं खलु वर्णनं सत् ॥२३॥

इति विमलकलानां पोषको याचकानां
द्रविणवसनमानैस्तोषकः सत्कवीनाम् ।
वचनशरणभाजां रक्षकस्त्रासितानां
स जयति गुणवर्यो मण्डनो मन्मथाभः ॥ २४ ॥

इतिश्रीकाव्यमनोहरे महाकाव्ये महेश्वरकृतौ श्रीमण्डनत्यागवर्णनो नाम द्वितीयः सर्गः ॥

उच्यतेऽथ मया त्वस्य गरिष्ठालयवर्णनम् ।
तद्वत्तदनु लावण्यं कामिनीकुर्दनं तथा ॥ १ ॥
निर्मितं शिल्पिकारैस्तत्सूत्रधारणकोविदैः ।
अन्तःपुरं ततो न्यस्तं तत्पार्श्वे चोपकारिका ॥ २ ॥
चित्रशालागृहं कोणे वामे दक्षिणके परम् ।
रचितं स्तम्भसंलग्नै रम्यं कृत्रिमपुत्रकैः ॥ ३ ॥
पुरतो वाजिशालास्तु कृताः शिल्पविचक्षणैः ।
राजमानाः शुभैः स्तम्भैर्महितैश्चारुचित्रितैः ॥ ४ ॥
महानसं पृष्ठतस्तु तदग्रे भोजनालयम् ।
पानीयशालिकोपेतं कृतं तैः शिल्पिभिः शुभैः ॥ ५ ॥
महद्यत्नकृतं तस्य सचामीकरराजितम् ।
सभागृहं तु सर्वाग्रे संवृतं कोशमन्दिरैः ॥ ६ ॥
प्रासादो रचितश्चाराम्नानाकुशलिभिः शुभः ।
गुरूणामपि देवानां पूजनार्थमहर्निशम् ॥ ७ ॥
एवमन्तःपुरं चारु रचितं सूत्रधारकैः ।
तद्दत्तोत्तमनेपथ्यैः पश्चाच्चित्रविचित्रितैः ॥ ८
प्राङ्गणं काचबद्धं च गृहान्तर्भूमिका तथा ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तदन्यैः कृतमेवास्य स्वविद्याकुशलैः सदा ॥ ९ ॥
सौवर्णैः कलशैः पूर्णं तद्राजसदनं महत् ।
भासते चारुभिश्चान्यैरङ्कितं तोरणध्वजैः ॥ १० ॥
पुनरुक्तं न वक्तव्यं गेहवर्णनमुत्तमम् ।
शिल्पिशास्त्रप्रकारेण पुरोक्तं नहि यन्मया ॥ ११ ॥
क्रीडोद्यानवनं तस्य सव्ये पक्षिविराजितम् ।
अन्वितं पादपैरिष्टैर्वर्ण्यते तदिदं मया ॥ १२ ॥
यस्मिन्वने सुफलिताः सहकारास्तथाऽपरे ।
जम्बूमहीरुहा रम्यास्तथा धात्रीसुशाखिनः ॥ १३ ॥
पनसाः पूगवृक्षाश्च नालिकेरसुपादपाः ।
खर्जूरीदाडिमीद्राक्षामातुलिङ्गीद्रुमादयः ॥ १४ ॥
पुष्पिताः शाखिनस्त्वन्ये चम्पकाः काञ्चनाह्वयाः ।
बकुलाः पाटलाशोकनागचम्पकमुख्यकाः ॥ १५ ॥
केतकीमालतीवृक्षा मल्लिका शतपत्रिकाः ।
अन्या नानाविधा रम्या लम्भिताः पुष्पजातयः ॥१६॥
वनान्तर्वापिका रम्या राजहंसैः सुशोभिता ।
अम्भोरुहैश्च विशदैर्गुञ्जद्भ्रमरभूषितैः ॥ १७ ॥
इत्यन्तःपुरं रम्यं पूर्णितं परमर्द्धिभिः ।
चकास्ति विभुना तेन मण्डनेन सुमण्डितम् ॥ १८ ॥
एकस्मिन्दिवसे तस्य क्रीडोद्यानवनं प्रति ।
आगतो मण्डनस्त्वेष लीलयालङ्कृतो युवा ॥ १९ ॥
रोचिष्णुं सर्वभूषाभिरागतं मण्डनं विभुम् ।
विलोक्य विह्वला जाताः कामिन्यः कुसुमेषुणा ॥२०॥
उपायं कुर्वते नार्यो वशीकर्तुममुं तदा ।
नर्तक्यः प्रथमं रम्यास्तत्सङ्गोत्सुकमानसाः ॥ २१ ॥
आरब्धं नर्तनं ताभिश्चित्तमोहनभेषजम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तद्योग्यसमुदायेन भावगर्भसुबुद्धिभिः ॥ २२ ॥
बिभर्ति मुरजं काचित्कट्यां वादनहेलया ।
करास्फालनलोलाङ्गकम्पितोरुपयोधरा ॥ २३ ॥
कया चिद्गीयते गेयं गम्भीरस्वरया तदा ।
वीणां कुचतटे न्यस्य त्वेकतन्त्रीं सुभावया ॥ २४ ॥
लघुद्रुतप्लुतोद्भेदं तालं गृह्णाति गायिका ।
मन्द्रतारसुगायन्ती वादयन्ती यथोचितम् ॥ २५ ॥
कराभ्यां वंशमादाय गुञ्जद्भ्रमरनादवत् ।
पूरयन्ती विभात्येषा सुस्वरं रामणीयकम् ॥ २६ ॥
कांस्यं वाद्यविशेषं हि कराभ्यां वाद्यतेऽन्यया ।
कामिन्या विलसन्नेत्रवक्त्रालोकनभावया ॥ २७ ॥
चतुर्विधेन वाद्येन भावगर्भेण नृत्यति ।
नर्त्तकी चारुनेपथ्या नर्तनालोलसुस्तनी ॥ २८ ॥
नृत्यन्ती हस्तकेनैव दण्डकेन च शोभिना ।
लासिका राजते सैषा खञ्जरीटप्रचारिणी ॥ २९ ॥
गेयानुसारि वाद्यं वै नृत्यं वाद्यानुसारि च ।
कृतं ताभिः सुवेषाभिस्तेन मूर्त्तो रसोऽभवत् ॥ ३० ॥
आसां गेयेन वाद्येन नृत्येनापि सुतोषितः ।
ददाति बहलं वित्तं ताभ्यो वै न तु सङ्गमम् ॥ ३१ ॥
चलद्दृष्टिं स्फुरद्बाहुं रतिकामामशङ्किताम् ।
व्यावलाद्गमनां नारीं परकीयां जहाति च ॥ ३२ ॥
स्वपत्न्यामनरक्तेन चारुमन्मथमूर्त्तिना ।
मण्डनेन स्वकीया सा रतिभावैर्विलोकिता ॥ ३३ ॥
लावण्यं वर्ण्यते तस्या मया सर्वाङ्गजं महत् ।
कामिन्या गुणशालिन्याः पृथक्त्वेन यथाक्रमम् ॥ ३४ ॥
राजते कबरी तस्याः षट्पदामलरूमती ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कालिन्दीजलकल्लोलशोभासन्ततिधारिणी ॥ ३५ ॥
भ्रूभङ्गो रचितस्तस्याः वेधसा स तु दृश्यते ।
शरासनं हि तद्वक्त्रे निक्षिप्तं स्वभुवेति किम् ? ॥ ३६ ॥
आकर्णव्यापिनी नेत्रे नीलोत्पलदलामले ।
चकितैणीसुदृष्ट्यङ्के भ्राजेते मदनायुधे ॥ ३७ ॥
रदनाः खलु भान्त्यस्याः पक्वदाडिमबीजभाः ।
हास्यपर्यस्तरुचयो लघवः समपङ्क्तयः ॥ ३८ ॥
ओष्ठाधरौ विभासेते प्रवालविशदौ स्त्रियाः ।
परिचुम्बनवेलायां प्रियदन्तक्षताङ्कितौ ॥ ३९ ॥
द्विजराजगुणोपेतं मुखं तस्या विराजते ।
सुधाधरं रुचा स्निग्धं पत्रिकाङ्कं सुशीतलम् ॥४०॥
आजानुयायिनौ बाहू प्रियालिङ्गनतत्परौ ।
वेधसा तत्कृतौ यत्नात्सुधापूर्णघटाविव ॥ ४१ ॥
मृगेन्द्रमध्या सा भाति क्वणितामलमेखला ।
अङ्गना केलिसु प्रीतिर्निम्ननाभिः कृशोदरी ॥ ४२ ॥
तस्या उरू विभासेते सरलौ करभाकृती ।
कनकोत्तमवर्णाभौ रम्भास्तम्भानुकारिणौ ॥ ४३ ॥
राजमाने रुचा जङ्घे स्थूले नैव तथा कृशे ।
तस्याः सुन्दरलीलायाः कोमले वर्त्तुलाञ्चिते ॥४४॥
रक्तोत्पलनिभावङ्घ्री राजेते योषितः शुभौ ।
यावकोद्भासितौ रम्यौ विस्फूर्ज्जन्नखरच्छवी ॥ ४५ ॥
लावण्यमधिकं तस्या वर्णितुं नैव शक्यते ।
यथामति मया तद्विवर्णितं साधु धीमताम् ॥ ४६ ॥
शृङ्गारो विविधस्तस्या मन्यते निखिलो मया ।
सर्वलावण्यराशेश्च गुणबाहुल्यसन्मतेः ॥ ४७ ॥
अलकाली द्विधा तस्याः सख्या भङ्गुरया कृता ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पश्चाद्भालस्थले न्यस्ता कस्तुरी पत्रिकातुला ॥ ४८ ॥
सख्या नूनं कृते रम्ये चित्तभेदनसायके ।
तरत्तारेक्षणे तस्याः शलाकाञ्जनरेखया ॥ ४९ ॥
ग्रथितः कबरीभारः कुसुमोत्तमसञ्चयैः ।
मुक्ताफलमयी मूर्ध्नि जालिका वेष्टिता ततः ॥ ५० ॥
वेशितं मौक्तिकं चारु नासिकाग्रे तु वर्त्तुलम् ।
ओष्ठस्योपरिजातार्चिःप्रस्फुरल्लोलविग्रहम् ॥ ५१ ॥
ताम्बूलं दत्तमस्यै तु सख्या तेन प्रभाऽभवत् ।
दाडिमीपुष्पवन्नूनं कर्पूरप्रचुरं चिरम् ॥ ५२ ॥
कण्ठे मुक्तावली तस्याः निक्षिप्ता कुचलम्बिनी ।
अन्ये नानाविधा हारा योजितास्तदनुक्रमम् ॥ ५३ ॥
रचितं कञ्चुकं सख्या तदङ्गे चन्दनैः शुभैः ।
कुङ्कुमागुरुकस्तुरीयक्षकर्दममिश्रितैः ॥ ५४ ॥
केयूरे योजिते बाह्वोः प्रकोष्ठे कङ्कणे तथा ।
सख्याङ्गुलीषु च न्यस्तमङ्गुलीयकवृन्दकम् ॥ ५५ ॥
मञ्जीरे पादयोः स्निग्धे न्यस्ते शिञ्जारवाङ्किते ।
तया काञ्चनशोभाऽऽढ्ये मौक्तिकालीविराजिते ॥ ५६ ॥
दुकूलवसना योषित् पिकमञ्जुलवादिनी ।
तन्वङ्गी स्मितनित्यास्या हंसवारणगामिनी ॥ ५७ ॥
सर्वालङ्कारपूर्णाङ्गी सर्वलावण्यसुन्दरी ।
ख्यातसर्वगुणोपेता भाति वल्लभकाङ्क्षिणी ॥ ५८ ॥
शय्यालये प्रदीपाभे नानाचित्रविचित्रिते ।
धूपगन्धिनि पत्तोर्णविताने संस्थिता निशि ॥५९॥कुलकम्॥
पल्यङ्के पुष्पसंभारो गजदन्तविनिर्मिते ।
क्षिप्तः कर्पूरचूर्णेन मिश्रितो रतये तया ॥ ६० ॥
रामो विरामः सूतश्च प्रसूतः प्रहरा इमे ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चत्वारो राम एतेषां सम्भोगाय निगद्यते ॥ ६१ ॥
रामे यामेऽतिपश्यन्ती पत्यागमनमुत्तमम् ।
दृशं द्वारे दधात्येषा जातरोमाञ्चकम्पना ॥ ६२ ॥
एतस्मिन्समये जाते मण्डनः केलितत्परः ।
आगतो मन्दिरं तस्याः सख्याहूतः शुचिस्मितः ॥ ६३ ॥
कन्दर्पस्यास्त्रविद्येव मूर्ता व्यामोहिनी परा ।
दृष्टा लावण्यपूर्णाङ्गी रम्भेव रतिकामुका ॥ ६४ ॥
आदावालिङ्गितौत्सुक्याच्चुम्बिता तदनन्तरम् ।
योषोपभोगिता तेन मण्डनेन मनोहरा ॥ ६५ ॥
एवंविधानामबलाजनानां मनोरथः सिद्ध्यति येन सोऽयम्।
सङ्घाधिपो मण्डननामधेयः कन्दर्पलावण्यतनुश्चकास्ति॥६६॥

इतिश्रीकाव्यमनोहरे महाकाव्ये महेश्वरकृतौ श्रीमण्डनकेलिवर्णनो नाम तृतीयः सर्गः ॥

अथोच्यते सदृतुवर्णनं हि यथाक्रमं कोविदतोषदायि ।
उरूपभोगांश्चमथाधिगम्य श्रीमण्डनस्यातिविभोगिनस्तु ॥ १ ॥
तेषामृतूनां प्रथमं वरिष्ठा शरन्मनोज्ञाऽतिकुतूहलाढ्या ।
निगद्यते पाण्डुरमेघमाला श्रीमन्महातोषविधायिनी च ॥ २ ॥
स्वच्छोदकाः सत्पुलिनास्तटिन्यो यस्मिन्नृतौ पावननामधेयाः ।
याताःप्रसादं मुनिसेव्यमानाः पुरोज्झिताः पङ्कमलाऽऽविलाऽद्रिः॥
सरांसि पत्रोत्पलपूरितानि ध्रुवं निषेवन्त इहैव हंसाः ।
मुदान्विता निर्मलतोयतोषान्महीतलोल्लासभरेण पूर्णाः ॥ ४ ॥
श्यामायदत्तौ परितोऽभिरामाः छायामती गौरपयोधराभ्याम्(?)।
प्रफुल्लकाशांशुकराजमाना वसुन्धरा भाति वराङ्गनेव ॥ ५ ॥
निशीथिनी चन्द्रिकया महत्या विराजते कौतुकदायिनीव ।
कामातुराणामभिसारिकाणां सङ्केतवाञ्छाऽऽकुलदुर्मतीनाम् ॥६॥
प्रावट् तमोविस्मृतचन्द्रिकाभा भ्रान्त्या गजावक्रितशुण्डयेव ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्पृशन्ति दन्तद्वयमाभयात्ते नीतं किमेतन्न तु वेति शुक्रयाम्(?)॥७॥
कुर्वन्ति लाङ्गूलविलोकनानि द्रष्टुं चमर्यः सितचामराणि।
नीतानि किंवा ननु वक्रमुख्यो विधूदये यत्र विजृम्भमाणे ॥८॥
भ्रान्त्या कचोले पय इत्यभीष्टं मत्वा बिडालो लिहति प्रकामम्।
विधुप्रभाभूषितमध्यदेशे यस्मिन्नृतौ सद्व्रजताभिरामे ॥ ९ ॥
महीरुहप्रोतमयूखजालान् भ्रान्त्या विशानां हि लुनन्ति हंसाः।
उन्मीलिते यत्र तु शीतरश्मौ नूनं शरत्कालजनप्रियेऽपि ॥१०॥
एवंविधं भ्रान्तिकरं सुधांशुं विजृम्भितं प्रेक्ष्य विभूषणार्याः।
वाञ्छन्ति सङ्केतमिहात्मसृष्टं कान्तेन दत्तं ह्यभिसारिकास्ताः॥११॥
सुधोपमं सर्वरसाभियुक्तमन्नं निधायोत्तमहेमपात्रे।
व्रजन्ति ताः स्वं रमणं महान्तं संकल्पलभ्यं रुचिरं यदर्तौ॥१२॥
कृष्णांशुकाश्चन्दनपात्रहस्तास्ताम्बूलयुक्ताश्चकितं व्रजन्त्यः।
स्निग्धाननाः सर्वविभूषिताङ्ग्यो मुक्ताभिरामामलहारपूर्णाः॥१३॥
ते कामिनस्ताः प्रसमीक्ष्य योषाः समागताः सात्विककायपूर्णाः।
उदीरयन्त्यो वचनं प्रियाणामग्रेऽद्य भीता इति कम्पमानाः ॥१४॥
गाढं प्रियालिङ्गनजाततोषाः सङ्केतके वै रतिमापुरेताः।
यस्मिन्नृतौ कौतुकनित्यपूर्णे विवर्णिते काव्यमनोहरेऽस्मिन् ॥१५॥
दीपोत्सवेऽस्यास्तु भवन्ति तुष्टा नीराजमाना धनिनः प्रियाभिः।
सुवर्णपात्रार्पितचैलपूगदीपच्छदाकुङ्कुमिताक्षताभिः ॥ १६ ॥
वाणिज्यकाराश्च वहन्ति चिन्तां देशान्तरं गन्तुमभीष्टकामाः।
नानासुवस्त्राहरणाय हृष्टा यस्मिन्नृतौ वाञ्छितलाभसङ्गाः॥१७॥
यस्यागमे भूपतयो महान्तः प्रस्थानमिच्छन्ति रिपून्विजेतुम्।
सैन्यैर्बलिष्ठैश्चतुरङ्गपूर्णैरत्युद्धताः पालितशूरसङ्घाः ॥ १८ ॥
व्रजन्ति तेऽमी परराष्ट्रमुग्रं कृत्वा पदातीन्पुरतश्च वाहान्।
स्तम्बेरमास्तद्द्वयपृष्ठतस्तु वादित्रघोषैः कृतवैरिकम्पाः ॥ १९ ॥
आच्छादितं वै खुरपांसुभिः खं तुरङ्गमाणां जवमाश्रितानाम्।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



राज्ञां ध्वजैश्चापि लसद्दुकूलैर्जयाभिलाषाकुले संमुखीनाम् ॥२०॥
निःशाणभीमध्वनिभिस्त्वमीषां भीतो जनो गच्छति वै दिगन्तान्।
गच्छन्तमेनं प्रसमीक्ष्य भूपा युयुत्सया यान्त्यनुयायिनस्तान॥२१॥
ते स्थायिनो भूपतयः समस्तान् सेनापतीन्स्वानिति भाषयन्ति ।
इमे तु याताः किमहो ! विधेयं विचार्य चित्ते झटिति ब्रुवन्तु॥२२॥
हे स्वामिनस्त्वद्य विलोकनीयं युष्माभिरत्यन्तकुतूहलं सत् ।
ध्रुवं भटानां परिपालितानामेषां ज्वलच्छस्त्रभृतां समाजौ ॥२३॥
स्वस्वामिनामग्रत एवमुक्त्वा ते वाहिनीशाः प्रसभं तदानीम् ।
कुर्वन्ति सम्भारमनेकधा हि युद्धाय योग्यं विलसत्पताकाः ॥२४॥
तेषां तु योधाः प्रथमं प्रवृत्ताः सज्जान्विधातुं करिणो बलिष्ठान् ।
मदोत्कटानङ्कुशमुग्रधारं करे दधानाः पृथुसाहसाढ्याः ॥ २५॥
आरोहणं कर्तुमतिप्रभावाः पल्याणतां सन्ततविक्रमौघैः ।
गृह्णन्ति दीक्षामतिसङ्गराय विचिन्त्य देवीं कुलपूजितां स्वाम् ॥२६॥
संनद्धबद्धं खलु सैन्यमेतत्तुरङ्गसद्वारणपत्तिभिश्च ।
विलोक्य राजन्यगणः सरोषात्स्वाज्ञां तु यच्छत्यनुजीवकेभ्यः॥२७
पुरो हि दृश्यन्त इमे नृपालाः करायुधा हन्तुमभीष्टकामाः ।
स्थिराः किमर्थं ननु यूयमेते कुर्वन्तु युद्धं रिपुभिः सहैतैः ॥२८॥
वाहाधिरूढास्तुरगोन्निषण्णान्पदातयः पत्तिजनान्समस्तान् ।
गजोपविष्टाः पृथुवारणस्थान्मिथो हि निघ्नन्ति युयुत्सया ते॥२९॥
भल्लैः करालैः करवालवृन्दैः चापप्रमुक्तैः शरसञ्चयैश्च ।
निघ्नन्ति सर्वेऽपि परस्परं ते सुकीर्तिकामा विजिगीषवश्च ॥३०॥
खड्गप्रहारैस्त्रुटितानि भूमौ शिरांसि सेनाद्वयसंस्थितानाम् ।
पतन्ति केषांचिदतः कबन्धाः संभिन्नगात्रोद्गतशोणिताश्च ॥३१॥
केषांचिदत्रायुधसंहतानां महाहवे पादकटिप्रकोष्ठाः ।
पतन्ति चान्ये क्षुभिताः प्रहारैर्धावन्ति वीरान्विनिहन्तुमुग्रान्॥३२॥
द्विधाकृताः केचिदथारिवर्गाः करोल्लसच्चापविमुक्तबाणैः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कम्पन्त एते पतितास्तदानीं भल्लक्षताः क्रन्दनविह्वलाश्च ॥३३॥
रे रे भटाः ! प्राणमुचः स्मस्तान् किमर्थमस्मान्प्रहतातिरोपात् ।
यूयं शरण्या इति केचिदाहुर्भयेन दीनोत्तरभाषमाणाः । ३४ ॥
पदातिसद्वारणवाजियोधकलेवरोद्दारणजातरक्तः ।
मही तदानीं खलु भीषणेयं जाता तथा भैरवखेलनैश्च ॥ ३५ ॥
गृध्रः शिवाभिर्भषणैश्च काकैः सद्योगिनीभिश्च पिशाचिनीभिः ।
जाता तदा घोरतरा भ्रमद्भिर्विहङ्गमैश्चाप्यमितै रणोर्वी ॥ ३६ ॥
भूतानि तेषामतिसङ्गरेऽस्मिन् आगत्य खादन्त्यधितृप्ति मांसम् ।
तथा तदन्यानि पिबन्ति नूनं भूयिष्ठतोषाद्रुधिरं समाजौ ॥३७॥
नृत्यन्ति चान्यानि महच्छिरांसि पाणौ गृहीत्वा बहुखेलनाय ।
भीमान्त्रमालाकृतचारुहारसुशोभितान्याहतमर्दलानि ॥ ३८ ॥
क्रीडन्ति गायन्ति वदन्ति भूतान्यनेकधा चात्यतितोषितानि ।
शस्त्रैः सुगीतैर्वचनानि यस्मिन्तृप्तानि सन्तापितवीरमांसैः ॥३९॥
ये संहता सङ्गरभूमिकायां महाभटाः शस्त्रवरैः सुखङ्गैः ।
व्रजन्ति ते खलु नाकलोकं विमानमारुह्य सहाङ्गनाभिः ॥४०॥
अन्ये रणात्कापुरुषा दिगन्तान्धावन्ति निस्त्यक्तसमस्तसैन्याः ।
तृषातुराः साध्वसकम्पमानाः विकीर्णकेशाः पतितांशुकाश्च ॥४१॥
तत्रापरे ते स्वपुरीः प्रयान्ति जयश्रिया विस्तृतकीर्तयो ये ।
उक्ताशिषो विप्रवरैः प्रियाभिर्नीराजमानाः कनकाम्बरौघैः ॥४२॥
पौरादरैर्वर्द्धितचित्तसौख्याः स्वराजगेहं प्रविशन्ति भूपाः ।
तदागमानेकमहोत्स्वाङ्कं महर्द्धिसंघातविराजमानाः ॥ ४३ ॥
अन्तःपुरस्थान्नृपतीञ्जलार्द्रैर्दूर्वाङ्कुरैस्तानभिषेकयन्ति ।
द्विजोत्तमा वै कृतचारुयज्ञास्तत्कालयोग्यैर्बहलैर्हविभिः ॥ ४४ ॥
मूर्द्धाभिषिक्तास्तदनन्तरं ते स्वीयान्यपत्यानि कुतूहलेन ।
उत्सङ्गमारोप्य लसन्मुखानि चुम्बन्ति बाल्याभरणाञ्चितानि ॥४५॥
ते भावगर्भैर्विलसद्वचोभिः शृण्वन्ति वार्ता प्रमदाजनानाम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अभीष्टपत्यागमनोत्सवानां विलोलचैलाञ्चलगूढवाचाम् ॥ ४६ ॥
एवंविधं यद्गमनं नृपाणां यस्मिन्नृतौ तत्कथितं मयाऽत्र ।
अन्यत्तथावर्णनमिष्टमस्ति ग्रन्थस्य बाहुल्यभयान्न चोक्तम् ॥४७॥
अथोच्यतेऽर्तुर्महितो मयायं हेमन्तनामा वनिताप्रियश्च ।
कन्दर्पयोषापरधन्यलोकश्रीमल्लसन्मानसकारकश्च ॥ ४८ ॥

इति शरदमभीष्टां चारुहेमन्तमुक्त्वा-
प्यमलविविधभोगैर्नामराणां महान्तम् ।
वदति शिशिरमुख्यं सद्वसन्तानुगं च
खलु महितगुणाढ्यं वर्णनं काव्यकारः ॥ ४९ ॥

ऋतुद्वयेऽस्मिन् कथिते मयैवं श्रीमण्डनो भोगपुरन्दरः सः ।
नयत्यभीष्टं समयं सुकीर्तिः सदा यथाकालमृतूपभोगैः ॥५०॥

इतिश्रीकाव्यमनोहरे महाकाव्ये महेश्वरकृतौ श्रीमण्डनऋतुद्वयो-
पभोगवर्णनो नाम चतुर्थः सर्गः ॥

अथोच्यतेऽर्तुः शिशिराभिधानः कन्दर्पबाहुल्यकरो जनानाम् ।
हिमप्रभाकम्पितसर्वलोको वराङ्गनायोषितकामकेलिः ॥ १ ॥
दिनानि यस्मिन्विलघूनि सत्यं भवन्ति तृष्णादरसूचकानि ।
महावनीशोद्भवसत्प्रतापैर्यथारिवृन्दानि भयाकुलानि ॥ २ ॥

खाद्यानि लेह्यान्यपि चोष्यपेया-
न्यन्नानि धन्याः खलु भुञ्जतेऽस्मिन् ।
कोष्णानि नूनं रुचिकारकाणि-
विशेषतः षड्रसपोषितानि ॥ ३ ॥

हिमं यदीयं क्षपयन्ति धन्याः शय्यासु चोष्माश्रिततूलिकासु ।
योषाकुचालिङ्गनसन्ततोष्णैर्दिनेषु धूपार्चितवह्निभिश्च ॥ ४ ॥
वसन्तनामाऽयमृतुर्महीयान्निगद्यतेऽतः सुजनाभिरामः ।
वनस्थलीभासितपल्लवाढ्यः पिकादिपक्षिव्रजतोषकारी ॥ ५ ॥
महीरुहाः पल्लविताः समस्ता यस्यागमे सर्ववनस्थलीयम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पलाशजम्बूसहकारतालतमालशालप्रमुखास्तदन्ये ॥ ६ ॥
उदुम्बराशोकसुपाटलादिजम्भीरसच्चम्पककाञ्चनाख्याः ।
धात्रीसु वृक्षाः पनसास्तदन्ये बन्धुकरञ्जद्रुमपिप्पलाश्च ॥ ७ ॥
वटास्तथान्ये बकुलाभिधेयाः सद्देवदारूत्तमकोविदाराः ।
मन्दारवृक्षाः ककुभास्तदन्येऽम्लिकाः सुशाला बदरीद्रुमाश्च ॥८॥
अन्ये वसन्तागमभासमानाः प्रियङ्गुबिल्वाः खदिराः करञ्जाः ।
सन्मातुलिङ्गीतरुदाडिमेया नानाविधाः पादपजातयश्च ॥९॥
आदिकुलकम् ॥

एतद्गुणां पादपमण्डलीं सत्फलप्रसूनारुणपल्लवाढ्याम् ।
विलोक्य याता बहवो विहङ्गाः पुंस्कोकिलावर्त्किर-
सारिकाद्याः ॥ १० ॥
कुहूकुहूः सन्ततमित्युदारवाचं वितन्वन्ति महोत्सवैर्यं ।
पुंस्कोकिलाश्चूतसुमञ्जरीस्ते लुनन्ति चञ्च्वा मुषिता इहर्तौ ॥११॥
आरामनानाविधसत्तरूणां यथाभिलाषं फलपल्लवांश्च ।
विहङ्गमौघाः किल भुञ्जतेऽस्मिन्वसन्तनित्योत्सवमानसाश्च ॥१२॥
फलानि पक्वानि महातरूणामदन्ति सर्वाः शुकसारिकास्ताः ।
परस्परं शब्दितजाततोषाः कण्डूयमानाङ्गविशेषविग्राः ॥ १३ ॥
यथाप्रियं सर्वविहङ्गमास्ते लिहन्ति मुञ्चन्ति फलानि रुच्या ।
नानाविधान्युत्तमगन्धचारुसुगन्धितान्यादरकारकाणि ॥ १४ ॥
यथाप्रकारं हि वसन्तकाले क्रीडन्ति धन्या वनवापिकासु ।
सुवर्णसर्वाभरणान्विताभिः स्वकामिनीभिः कुचसंनताभिः ॥१५॥
सिञ्चन्ति नार्यः स्वपतीन्सुहेमशृङ्गार्पितानेकसुगन्धितोयैः ।
यस्मिन्वसन्तवनवापिकायां क्रीडाकुलाः स्रस्तनितम्बवस्त्राः ॥१६॥
वापीजलासिञ्चितमूर्त्तयस्ता विमृष्टसर्वातुलपत्रवल्ल्यः ।
कान्ताः प्रियालोकनजातलज्जा मज्जन्ति तोयेऽव्ययप्रकाशात् ॥
विहारदृष्टावयवैः प्रियाणां ते कामिनस्तत्समये युवानः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कामातुराः सात्त्विकभावभाजो याताः सुखेलाः सुरताभिवाञ्छाः॥
आलिङ्गनायोत्सुकजातपाणीन्पतीन्रमण्यो दिनजातलज्जाः ।
व्यग्रानिहर्त्तौ विदधत्यनेकवार्त्ताभिरिष्टोदकसिञ्चनैश्च ॥ १९ ॥
मुञ्चन्ति धैर्यं सुरताभिलाषात् व्यग्रीकृतास्ते बहुशोऽङ्गनाभिः ।
स्वकामिनीवाक्यमुदीरयन्तो लज्जाभिनम्राः किमितीह यूयम् ॥२०
वदन्ति नारीः प्रति कामिनस्ते हास्यं विधायातुलवाग्विलासैः ।
रात्रौ न लज्जा दिवसे किमेतत्किलेति युष्माकमलज्जितानाम्॥
सखीजने पश्यति चारु वारिविहारमेनं दिनकौतुकेन ।
यूयं कथं त्वहेथ कामकेलिं हे स्वामिनस्त्वद्य गता निशा किम् ? ॥
परस्परं भाषणजातलज्जास्ता योषितः केलिपराः प्रियेभ्यः ।
आलिङ्गनाद्यादरसंयुतानि ददत्यनेकानि वसन्तकाले ॥ २३॥
एवं परं कौतुकमत्यभीष्टं यस्मिन्नृतौ दृश्यत एव चान्यत् ।
स्मस्तमेतत्कुतुकं विनोदात्सदोऽपभुङ्क्ते किल मण्डनोऽयम् ॥२४॥
ऋतुद्वयेऽस्मिन्कथिते मयैवं श्रीमण्डनो भोगपुरन्दरः सः ।
नयत्यभीष्टं समयं सुकीर्तिः सदा यथाकालमृतूपभोगैः ॥२५॥

इति श्रीकाव्यमनोहरे महाकाव्ये महेश्वरकृतौ श्रीमण्डनापर–
ऋतुद्वयोपभोगवर्णनो नाम पञ्चमः सर्गः ॥

अथोच्यनेर्तुस्त्वपरो मयायं ग्रीष्माभिधेयो महदुष्णभीमः ।
सुशीतलेच्छाजनको गवाक्षानिजानुगानेकसुधान्यलोकः ॥ १ ॥
ग्रीष्मे महर्त्तावधिराजकन्याः कुर्वन्ति शैत्याभरणानि रुच्या ।
उष्णातुराः कञ्चुकमुञ्चमानाः प्रस्वेदसर्वाविलगात्रवल्ल्यः ॥ २ ॥
सुशीतलालङ्करणानि धत्तेकर्पूरकृष्णागुरुचन्दनाद्यैः ।
लिप्ताङ्गवल्ली शुभराजकन्या तन्मध्यगा काचिदिहागतेऽस्मिन् ॥३॥
पद्मानना मौक्तिकतारहारा सा मानिनी चन्दनकञ्चुकाढया ।
श्वेतस्रजाऽलङ्कृतविग्रहेयं विभाति यस्मिन्नतिकामुकेव ॥ ४ ॥
सा काचबद्धाङ्गणभूमिकायां मञ्चं निधायास्तरणं तनोति ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



निदाघतप्ता नवपल्लवानां चन्द्रोदये यत्र विजृम्भमाणे ॥ ५ ॥
सखीजनैः सा बहु वीज्यमाना तोयान्वितैः सद्व्यजनैर्निशायाम् ।
पत्यागमं पश्यति मञ्चकस्था सा राजपुत्री परिता सखीभिः ॥६॥
विलोकयन्ती रमणं क्षपायां राजन्यवंश्या गुणशीलपूर्णा ।
आज्ञां ददत्यालिगणेभ्य एभ्यस्त्वाकारितुं स्वं पतिमात्तकामा॥७॥
आकारितः सर्वविभूषिताङ्गो रत्युत्सुकश्चारुदुकूलधारी ।
कन्दर्पलावण्यतनुः प्रियोऽस्याः समागतः प्राङ्गणमङ्गनायाः ॥८॥
आलोक्य मञ्चात्सहसोत्थिता सा तमागतं वल्लभमायताक्षी ।
पत्यग्रतो वाक्यमुदीरयन्ती विलम्ब एवं किमहो ! प्रियाद्य ॥९॥
गते मदीये दिवसे प्रिय ! त्वं नैवागतोऽस्यद्य किमत्र कार्यम् ।
तत्रैव गच्छेति तमाह वाक्यं सा भामिनी कम्पपराधरोष्ठी॥१०॥
एतत्समाकर्ण्य वचस्तदीयं गतः सुहर्म्यं रमणोऽन्यनार्याः ।
विवादजातारुणलोचनः सद्गत्युच्चलत्कुण्डलउत्तमाभः ॥ ११ ॥
महाभिमानान्नृपजा तदानीं व्रजन्तमेनं पतिमत्युदारम् ।
ब्रवीति नैवातिरुषारुणाक्षी कम्पातुरा कर्कशवादिनी च ॥१२॥
गतेऽन्यकान्ताभवनं तदानीं स्वनायके मन्मथचारुवेषे ।
जाता पुरन्ध्री विरहाकुलाङ्गी भिन्नाऽतितीक्ष्णैर्मदनेषुभिः सा ॥१३
नरेन्द्रजाता विरहानुतापैः सन्तापिता रोदिति हि प्रगूढम् ।
अधोमुखी यत्र निरुद्धकण्ठी सखीमुखालोकनजातलज्जा ॥१४॥
विचिन्तयन्ती लिखति क्षितिं सा तदाङ्गना पत्युरनादरं तम् ।
भुजाङ्गुलीभिर्विलसन्नखाभिर्यस्मिन्नृतौ विस्मयकारिका तु ॥१५॥
चिन्तातुरा मन्मथतापखिन्ना मुञ्चत्यनेकानि विभूषणानि ।
मुक्तावलीमुख्यमहत्कृतानि सन्दह्यमाना विरहानलेन ॥१६॥
तद्वैपरीत्यं बहलं कृशाङ्गया जातं परिस्कारगणस्य तत्र ।
तापापहं वस्तु शरीरदाहं यद्दृश्यते चेति नृपाङ्गनायाः ॥१७॥
त्यक्तं तया धैर्यमनङ्गबाणैर्विभिन्नमूर्त्या गतसाधुमत्या ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विभाषयन्त्या वचनं विरुद्धं त्वेवंविधां तां प्रवदन्ति सख्यः ॥१८॥
हे राजकन्ये ! हठतस्तयोच्चैरनादरो यस्तव एष पत्युः ।
तस्य प्रसादात्सकलोऽनुतापः प्राप्तोऽयमङ्गान्तरवर्त्तमानः ॥१९॥
सख्यो हि युष्माभिरनेकवारं निवेद्य पत्युः प्रणतिं मदीयाम् ।
उपाय उच्चैर्विविधैर्विधेयो येनायमीड्यो गृहमेति भर्त्ता ॥ २० ॥
पत्या विना मां विरहाकुलाङ्गीं दहन्ति शैत्यान्यपि भूषणानि ।
कर्पूरकृष्णागुरुचन्दनाद्यान्यनेकधा कोमलपल्लवाश्च ॥ २१ ॥
स्थिरं तदैतत्खलु जीवितं मे यदा प्रियो मद्गृहमेष्यतीदम् ।
आल्यग्रतः सेति वदत्युदारं यस्मिन्नृतौ कौतुकनित्यपूर्णे ॥२२ ॥
वचः समाकर्ण्य तदीयमित्थमाल्यः प्रयाताः पतिगेहमस्याः ।
तदाऽभिनेतुं रतिकामुकायाः कन्दर्पसन्तापितमानसायाः ॥२३॥
गदन्ति तास्तद्भवमार्त्तचित्तं हे कान्त ! सा ते रमणी मृगाक्षी ।
त्वया विना तिष्ठति देहमात्रा व्रजेति तन्मन्दिरमार्त्तिपूरः ॥२४॥
कान्तोऽभिलाषादभिमानमस्यास्त्यत्तवागतस्तत्सदनं नरेन्द्रः ।
सोऽयं तदाहूत उदारचेता अत्युत्सुकः सात्त्विकपूर्णकायः ॥२५॥
तमागतं वल्लभमात्मगेहं प्रेक्ष्याङ्गना सा गमिताऽऽदरेण ।
आलिङ्गितुं स्वामिनमाशु तुष्टा यस्मिन्नृतौ वाञ्छितपूर्वकामा ॥२६
तौ दम्पती स्वं विरहं महान्तं परस्परं सद्वचसौ ब्रुवाते ।
प्रफुल्लनीलोत्पलपत्रनेत्रौ मुदान्वितौ मञ्जुलवादिनौ च ॥ २७ ॥
अथोच्यते सन्नृतुरेव सोऽयं वर्षाभिधेयः प्रमदोत्सवाढ्यः ।
अनेकचिन्ताकुलजातलोको देशान्तरस्थागमनाभिरामः ॥ २८ ॥
व्यग्रा इहर्त्तौ धनिनः समस्ताः पयोधरासारभयाद्विधातुम् ।
अनङ्गभीमायुधखिन्नदेहाः प्रगूढगेहं प्रमदामहेच्छाः ॥ २९ ॥
यस्यागमे चातकमण्डलीयं नदत्यनेकैर्विरुतैर्महद्भिः ।
विलोकयन्ती जलदं सुपूर्णं तडिल्लताविस्फुरणाङ्कितं च ॥ ३० ॥
कुर्वन्ति केकां रुचिरां मयूराः श्रुत्वा तदानीं घनगर्जितानि ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नृत्यन्ति चान्येऽतुलपिच्छभारमूर्ध्वं विधायातिकुतूहलेन ॥३१॥
पुरातितप्ता धरणी महोष्णैरुल्लासमासारभरेण याति ।
यस्मिन्नृतौ बालतृणाङ्कुरम्या पङ्काकुला गर्जितदर्दुराढ्या ॥३२॥
गुञ्जन्ति लोलभ्रमराः परागं नूनं निषेवन्त इहागतेऽस्मिन् ।
सुगन्धिनीनां जनतोषदानां सत्केतकीनां विलसद्दलानाम् ॥३३॥
यस्यागमे वै पथिकाङ्गनौघः पत्यागमं पश्यति सादरेण ।
अनेकसंवत्सरजातचिन्तस्त्वज्ञातकौशल्यशुभप्रतीतिः ॥ ३४ ॥
तासां तदानीं पथिकाङ्गनानां भाग्योत्कटानां रमणाः प्रयाताः ।
देशान्तरानेकसुवस्तुपूर्णाः सञ्जातनित्योत्कटलाभसङ्गाः ॥३५॥
तासां तु मध्ये वनितापि काचित्प्रष्टुं प्रवृत्तिं रमणस्य याता ।
नाद्यागतो मे रमणोऽत्र यूयं देशान्तराद् ब्रूत किमर्थमेवम् ॥३६॥
ते पृच्छ्यमानाः प्रवदन्ति नारीं प्रियः कुतोऽज्ञातगतिर्गतस्ते ।
न ज्ञायतेऽस्माभिरिति प्रियार्त्तां विलज्जितां बाष्पनिरुद्धकण्ठीम्
श्रुत्वा तदीयं वचनं विरुद्धं भूमौ लुठत्यद्भुतदुःखपूर्णा ।
विशीर्णसर्वाभरणा रुदन्ती सा कामिनी धूसरगात्रवल्लिः ॥३८॥
सुखातिबाहुल्ययुतानि पत्युः स्मरत्यनेकानि वचांसि योषा ।
उक्तान्यनेकानि तदा विविक्ते सुकोमलान्यादरपूरितानि ॥३९॥
तं तारहारं प्रसमीक्ष्य योषिद्भृशं तदानीं कुरुते विलापम् ।
आरोपितो यः प्रणयेन कण्ठे विद्योतमानो मणिरत्नभाभिः ॥४०॥
मुक्तावलीपूरितसर्वखण्डं दुकूलरम्यं मृदुकञ्चुकं तत् ।
विलोक्य सा रोदिति गाढमेव विभाविहीनं पतितं यदग्रे ॥४१॥
कर्णार्पिते काञ्चनचारुपत्रे त्यक्ते तया दुःखितया तदानीम् ।
रत्नप्रभाभूषितगेहमध्ये विभावरीकल्पितसत्प्रदीपे ॥ ४२ ॥
पत्या विनेयं कुसुमाभिरामा कथं विभासेत ममाद्य शय्या ।
कर्पूरचूर्णप्रचुरेति चित्ते विचार्य दूरं पतिता पृथिव्यां
स्ववल्लभेनातिसुखप्रदेन धिग् जीवितं मे विगुणं विनैव ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विचारयन्ती विहृदि प्रपन्ना समुत्थिता साऽतिविलम्ब्य धैर्यम्॥४४॥
व्रजाम्यहं तद्वसतिं क्षणेन वह्नौ निपत्यामिषवत्सुदीप्ते ।
पुरः सखीनामुदिता तदानीमित्थं सती सा मुदिताऽपि वक्ति ॥४५॥
प्रबोधिता सा वनिता सखीभिस्तावत्तिरस्कृत्य वचोभिरेवम् ।
अत्रागमिष्यत्यचिरात्पतिस्ते मुञ्चाधुना शकममुं प्रिये! त्वम्॥४६॥
एवंविधे दुःसमयेऽतिभूते समागतः स्वं निलयं गृहेशः ।
द्वीपान्तरानीतविभूतिपूर्णो महोत्सवैः सत्पुलकाकुलाङ्गः ॥४७॥
योषा प्रवृत्तिं तव नोहि लब्ध्वा दुःखातुरा मुञ्चितभूषणेयम् ।
गाढं रुदन्तीति च कान्त ! कान्त ! तिरस्कृतास्माभिरियं
तदानीम् ॥ ४८ ॥
वृत्तं यदेतत्कथितं तदग्रे तच्छ्रूयमाणः परिचारिकाभिः ।
तूष्णीं स्थितोऽसौ बहुविस्मयेन व्रीडानतो लोचनपूरिताश्रुः॥४९॥
विबोधिताऽनेन वधूरभीष्टा यद्दुःसहं संप्रति दुःखमाप्तम् ।
मुञ्चाधुना तत्सकलं मदर्थमिति प्रिया सा गमिता प्रसादम्॥५०॥
व्यग्रा इहर्त्तौ कृषिकारका वै कृषिं विधातुं परमोत्सवाढ्याः ।
बीजादिकान्संग्रहिणः समन्ताद् गोपालकाः क्षेत्रविशुद्धिकाराः॥
क्षेत्रं विशुद्धं प्रथमं विधाय वपन्ति बीजानि यथाक्रमं ते ।
सस्यस्य निष्पत्तिं समीक्ष्यमाणा यस्मिनृतौ सस्यफलाप्तिकामाः ॥
बीजानि तान्यङ्कुरितानि दृष्ट्वा कुर्वन्ति रक्षां महतीं सदा ते ।
पश्वादितः सन्ततवीक्ष्यमाणा यस्मिनृतौ स्वान्तमहोत्सवाङ्काः॥५३
सस्यं सगर्भं किल जातमात्रं पक्षादितस्ते विदधत्यनेकाम् ।
चिन्तां महातोषितमानसास्तु समीक्ष्यमाणाः फलहेतवेऽपि ॥५४॥
एवंविधोक्ता ध्रुवमात्मशक्त्या प्रावृण्मया सा विबुधानुभाजा ।
मधुव्रतालीविलसत्कदम्बो प्रसूनरुङ्गः सुविभाति यस्याम्॥५५॥
ऋतुद्वयेऽस्मिन्कथिते मयैवं श्रीमण्डनो भोगपुरन्दरः सः ।
नयत्यभीष्टं समयं सुकीर्त्तिः सदा यथाकालमृतूपभोगैः ॥५६॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इति श्रीकाव्यमनोहरे महाकाव्ये महेश्वरकृतौ श्रीमण्डनऋतुद्वय-
वर्णनो नाम षष्ठः सर्गः ॥

श्रीमन्मण्डनसङ्घपस्य रुचिरां वंशप्रशस्तिं परा-
मुक्त्वा वर्णनमेतदेव विविधं विद्वन्मनस्तोषदम् ।
रम्ये काव्यमनोहरे विरचिते व्याख्यातसन्नायके
तन्नानाविधदानमानविनयप्रीतिप्रहृष्टः कविः ॥ १ ॥

यदुद्भवाः पुण्यधियो महान्तः कीर्त्याश्रिता जीवदयाकुलाङ्काः ।
नन्दन्ति जन्याः स तु लोकमध्ये श्रीमालवंशो जयति प्रकामम् ॥२

गोत्रे स्वर्णगिरीयके समभवज्जावालसत्पत्तने ।
ह्याभूरित्यभिधानभृन्मतिमतां वर्यः प्रधानेश्वरः ।
श्रीसोमेश्वरभूभुजः प्रतिदिनं यातोन्नतिः ख्यातिते
व्यापारे निखिले सुकीर्त्तिविमले लोकोत्सवालङ्कृते ॥३॥

तस्यात्मजस्त्वभयदोऽभवदत्र वंशे ह्यानन्दनामनृपतेःसकलप्रधानम्
चातुर्यनिर्मलगुणोत्तमकर्मकीर्त्तिः सद्याचकौघसततामितदत्तभूतिः॥
यो गुर्ज्जरान्नृपवराद्विजयश्रियं वै लेभेऽभ्यमित्र इह धैर्यगुणैःप्रशस्तः।
जावालनाम्नि नगरे स बभूव वर्यं श्रीमन्निकेतनविभासितदिग्विभागे॥

तस्मादभूदम्बडनामधेयः स्वविक्रमैस्तर्ज्जितवैरिवर्गः ।
योऽरोपयत्स्वर्णगिरौ गरिष्ठे राजन्यवर्ये वरविग्रहेशम् ॥६॥

समजनि कुलप्रदीपः तदङ्गजः सहणपालनामेड्यः ।
यो मोजदीननृपतेर्लेभे सर्वप्रधानमुख्यत्वम् ॥ ७ ॥

कच्छपतुच्छाह्वयजं देशं नद्धं नृपालसैन्यैस्तु ।
क्रन्दितजनकारुण्यात्स्वव्यापारैर्विमोचयामास ॥ ८ ॥

एकोत्तरशतताक्ष्यान्पवनाधिपभूभुजे प्रीत्या ।
स ददौ तेनातिमुदा तस्मै दत्तामरत्तवाः सप्त ॥ ९ ॥

आसीत्ततो वंशधुरं दधानो नैणाभिधानो गुणकीर्त्यमानः ।
श्रीमत्सुरत्राणपरंपराहजलालदीनार्पितसर्वमुद्रः ॥ १० ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यात्रां व्यधाद्यो जिनचन्द्रसूरिमुख्यैर्महद्भिर्गुरुभिः समं यः ।
सिद्धाचले रैवतनामधेये तीर्थेऽर्थिभिः सन्ततयाच्यमानः ॥११॥
तस्याभूत्तनयो दुसाजुरिति यो नाम्ना गरिष्ठः सतां
नूनं संप्रति चण्डराउलमहद्राज्ये प्रधानेश्वरः ।
तद्वच्छ्रीतुगलकसाहिनृपतिर्यस्मै ददौ सादरं ४८
श्रीमन्मेरुतमानदेशममलं त्वाकारयित्वाऽऽत्मनि ॥ १२
तत्सुनुरासीन्महितः सुधर्मा वीकाह्वयः सर्वदिगन्तकीर्त्तिः ।
श्रीवीतरागातुलपादपद्मे दिने दिने निश्चितचित्तवृत्तिः ॥ १३ ॥
शक्तिसाहं निबद्धं तु सप्तभूपैः समन्वितम् ।
पादलक्षाद्रिभोक्तारं मोचयेद्योऽधिकारवान् ॥ १४ ॥
सर्वं तदुचितं ज्ञात्वा पातसाहेन रञ्जितः ।
अतिमानेन सोऽप्यस्य गाजिद्रं प्रत्यरोपयत् ॥ १५ ॥
यश्चित्रकूटे बहलं जनेभ्यो दुर्भिक्षपीडाकुलितेभ्य एव ।
अदान्मुदा सस्यमनेकवारं ज्ञात्वा परां जीवदयां हि वंशे ॥१६॥
नान्द्रीयदेशेऽभवदार्यवृत्तः श्रीगोपिनाथाखिलराज्यमन्त्री ।
तत्कुक्षिजः सञ्चितकीर्त्तिवित्तः श्रीमण्डनाख्यो गुरुदेवभक्तः॥१७
नत्वा गुरुभ्यः प्रथमं क्रमेण श्रीशान्तिनाथस्य महीयसो हि ।
बिम्बं प्रतिष्ठापयत्युत्तमाभं प्रह्लादनाख्ये पुटभेदनेऽपि ॥ १८ ॥
सङ्घाधिपः सो हि बभूव दत्त्वा सङ्घाय वस्त्रद्रव्यघोटकांश्च ।
उद्यापनान्युत्तमशीलपूर्णः सुकीर्तिकामः कृतवान्महीयान् ॥१९॥
पुण्यशालाः कृतास्तेन सच्चामीकरभूषिताः ।
गुरूणां हि निवासार्थं देवानामपि तादृशम् ॥ २० ॥
श्रीमज्झञ्झणसङ्घपस्य तु ज्यत्न्येते सुता मण्डपे
श्रीमच्चाहडसङ्घपस्तदनुजः श्रीबाहडाख्यस्ततः ।
श्रीमद्देहडसङ्घपोऽतिरुचिरः श्रीपद्मसङ्घाधिप-
स्त्वाल्हाख्यः पृथुसङ्घपश्च महितः श्रीपाहुसङ्घाधिपः ॥२१॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रीचाहडस्य तनयौ सनयौ सवेषौ
चन्द्रश्चकास्त इति चानुजखेमराजः ।
राजन्मयूखमणिकाञ्चनकुण्डलाढयौ
कन्दर्पचारुतनुसंनिभविग्रहौ च ॥ २२ ॥

रापल्यभिधानके पुरवरे श्रीचाहडः सङ्घपो
यात्रां संविदधे तथार्बुदगिरौ तीर्थे व्ययं तादृशम् ।
सर्वत्रागतसङ्घपालनपरो वंशे प्रयातोन्नतिः
वित्तैर्वाजिभिरंशुकैर्बहुविधैः संपूरयन्तं पृथक् ॥ २३ ॥

श्रीमद्बाहडसङ्घपस्य तनयौ द्वावुत्तमाभौ भृशम्
राजेते तु समुद्रसङ्घप इति ख्यात्या विशिष्टो भुवि ।
श्रीमन्मण्डनसङ्घपस्तदनुजः श्रीमालभूषामणिः
दारिद्र्यौघतमःप्रचण्डतरणिः सत्सूरिचिन्तामणिः ॥२४॥

श्रीबाहडः संविदधे सुतोषाद्यात्रां गिरौ रैवतनामधेये ।
सङ्घाधिपत्यं प्रथमं विधाय वित्तैस्तुरङ्गैर्बहुचारुचेलैः ॥ २५ ॥

श्रीदेहडस्य तनयोऽपि जयत्यभीष्टः
श्रीधन्यराज इति विस्तृतनामधेयः ।
लावण्यमन्मथतनुर्गुणराजमानः
केयूररत्नमणिशोभितपादपद्मः ॥ २६ ॥

श्रीनेमिनाथतनयेऽर्बुदनामधेये (?)
यात्रां व्यधान्महितदेहडसङ्घपः सः ।
अत्यन्तसङ्घपरिपालनधीरचेता-
श्चातुर्यवर्यपरिपूरितदिग्विभागः ॥ २७ ॥

श्रीकेशिराजनृपतिं हरिराजसंज्ञं
भूपं तथाह्यमरदासमहीपतिं च ।
योऽमोचयद्दृढलशृङ्खलपीडिताङ्गं
सर्वोपकारकरणैर्विलसत्सुकीर्तिः ॥ २८ ॥

सोऽयं वराटलूणारबाहडोत्तमजन्मनाम् ।
लोकानामुपकारार्थं मोचयद्बन्धनानि वै ॥ २९ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रीपद्मसङ्घाधिपतिश्चकार यात्रां मनोज्ञां निजदेवभक्त्या ।
श्रीपार्श्वनाथस्य च कामदस्य व्यापारसंप्रीणितपातसाहिः॥३०
श्रीमङ्गलाख्ये नगरे सुयात्रां सुतीर्थ आल्हाभिधसङ्घपालः ।
दानं ददानः सततं जनेभ्यो वित्तौघपूर्णः प्रथितः पृथिव्याम्॥३१
जीरापल्लीमहातीर्थ मण्डपं तु चकार सः ।
उत्तोरणं महास्तम्भं वितानांशुकभूषितम् ॥ ३२ ॥
श्रीपाहुसङ्घाधिपतिश्चकार यात्रां स्वकीयैर्गुरुभिः समं सः
दानाय तुष्टो जिनभद्रमुख्यजीरादिपल्लयर्बुदनामतीर्थे ॥ ३३ ॥
एवंविधाः षट्तनया महान्तो जयन्ति ते झञ्झणसङ्घपस्य ।
सम्पन्नवित्ताः सचिवाःसमस्ताः षुन्दालिमस्यार्जितकीर्तिसङ्घाः ।
एतत्कुले श्रीजिनवल्लभाख्यो गुरुस्ततः श्रीजिनदत्तसूरिः ।
सुपर्वसूरिस्तदनुक्रमेण बभूव वर्यो बहलैस्तपोभिः ॥ ३५ ॥
ततोऽभवच्छ्रीजिनचन्द्रसूरिः जिनादिसूरिर्जिनपद्मनामा ।
ततो गुरुः श्रीजिनलब्धिसूरिस्ततोऽभवच्छ्रीजिनराजसूरिः॥३६
जयत्यतः श्रीजिनभद्रसूरिः श्रीमालवंशोद्भवदत्तमानः ।
गम्भीरचारुश्रुतराजमानः तीर्थाटनैः सन्ततपूतमूर्तिः ॥३७॥
क्रमेणैवंविधेनैव गुरवः पट्टभाजिनः ।
राजन्ते वरभक्त्या मे पूजिता ये तदन्वये ॥ ३८ ॥
एवंविधानुक्रमराजमाने वंशे गरीयान्किल मण्डनोऽयम् ।
सुहृज्जनैर्नन्दति सार्द्धमेव परोपकारैकविचारचेताः ॥ ३९ ॥
जिनप्रसादात्सकलोन्नतिस्ते भूयाद्गभीरस्य च पुण्यसिन्धोः ।
आचन्द्रतारं भुवि मोदमानः श्रीमान्यशस्वी भव मण्डन ! त्वम्॥४०
सेव्यः सेवानुगानामगणितधनदो याचकानां पराणाम्
जेता नीतावभिज्ञः सफलितवचनः सत्सभास्तूयमानः ।
गाम्भीर्यौदार्यधैर्यप्रभृतिबहुगुणैः ख्यातितः सर्वदिक्षु
क्ष्मालोके सश्चिरायुर्भवतु गुणनिधिर्मण्डनो वै वदान्यः॥४१
चातुर्याधिगतो यथोचितकृतिर्धर्मैककृत्यादरो

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विप्राणामनुपूजको यशसि सुप्रीतिः शुचिर्भाषणः ।
शक्त्याधिक्यधनार्थिदोऽमलमतिर्मानोन्नतिः सन्ततम्
दीर्घायुर्भव मण्डन ! क्षितितले कीर्त्येकचित्तः सदा ॥४२॥
सुश्रीकः श्रुतपारगः सुवचनः सत्यप्रतिज्ञः सदा
साहित्यामृतलालसो बहुमतः सङ्गीतशास्त्रादरः ।
दातृत्वैकनिधिर्गुणैकजलधिश्चातुर्यचर्यावधि-
स्त्वायुष्मान्भव मण्डनावनितले संस्तूयमानो बुधैः ॥४३॥
हेमाद्रेर्गिरयो गरुत्मत इमाः पक्षालयो भास्वत-
स्तेजांस्यादिकिरस्य सूत्रगणा वृक्षाः सुरद्रोरिव ।
श्रीमन्मण्डन ! निम्नगा जलनिधेश्चिन्तामणेः प्रस्तरा
यस्यायान्ति गुणैर्नृपा ननु तुलां स त्वं चिरायुर्भव ॥४४॥
दानेनार्थिजनाः कृता नृपतिसत्प्रौढया कृता दीनवत्
ज्ञातृत्वेन विवादिनः प्रतिदिन येन क्षणान्निर्जिताः ।
ऐश्वर्येण जिताः समस्तधनिनो व्यापारसन्मण्डिनो
जीयान्मण्डनसङ्घपः स तु मुदा दारिद्र्यदुःखापहः ॥४५॥
सोऽयं नन्दतु मण्डनः क्षितितले देवाः स्वहस्तार्चिता
येनोद्धूपसुगन्धचन्दनमहत्पुष्पोपहाराक्षतैः ।
साकं पुत्रकलत्रसेवकजनैस्तादृक्सुहृद्भिर्मुदा
दुर्गे मण्डपनामधेयरुचिरे सौधप्रभादीपिते ॥ ४६ ॥
एवंविधं काव्यमनोहरं वै महेश्वरेणात्ममतिप्रभावात् ।
अकारि यत्नेन महीयसेदं श्रीमण्डनेन्द्राय विदेऽभिधातुम् ॥४७॥
इतिश्री काव्यमनोहरे महाकाव्ये महेश्वरकृतौ श्रीमण्डनवंशवर्णनो
नाम सप्तमः सर्गः ॥
संवत १५०४ वर्षे मार्गशिर्षकृष्णपक्षषष्ठ्यां रवौ दिने लिखितं
विनायकदासकायस्थेन ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ॐ अर्हम्

श्रीहेमचन्द्राचार्यग्रन्थावली.

## मण्डनग्रन्थाङ्कः

# मण्डकादम्बरीदर्पणम् ॥

महस्तन्मङ्गलं नित्यं भूयसे श्रेयसेऽस्तु वः ।
कामं पुष्णाति यत्पुंसां कामवर्जितमप्यहो ! ॥ १ ॥
वंशः सोनगिरो नाम वर्द्धते वसुधातले ।
श्रीमाल इति विख्यातः श्रूयते यः शुभावहः ॥ २ ॥
प्रसन्नमधुरोदारप्रकृतिर्व्या[व्या]प्तभूतलः ।
महतां मन्त्रिरत्नानामाकरो यः प्रशस्यते ॥ ३ ॥
तत्रासीच्झंझणो नाम विभुर्विश्रुतवैभवः ।
जाते यस्मिन्जगत्सर्वं महन्मङ्गलमन्वभूत् ॥ ४ ॥
चाहडप्रमुखास्तस्य शाश्वतौदार्यशालिनः ।
षडभूवन्सुता मूर्त्ताः षड्गुणा इव मन्त्रिणः ॥ ५ ॥
चाहडस्यानुजस्तेषु बाहडो मन्त्रिपुङ्गवः ।
वसन्त इव कालेषु माननीयोऽभवद्गुणैः ॥ ६ ॥
मान एव धनं बन्धुरतिथिर्दानमा[म]र्ज्जनम् ।
तस्य धर्मप्रवृत्तस्य बभूवुर्विश्रुता भुवि ॥ ७ ॥
तस्याभूत्तनयो नाम्ना मण्डनो विश्वमण्डनः ।
शोभते यः शुभोदारः स्वयंवरपतिः श्रियः ॥ ८ ॥
महालक्ष्मीसरस्वत्योर्बद्धसापत्न्यवैरयोः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वर्द्धते महती स्पर्द्धा मन्दिरे यस्य बन्धुरे ॥ ९ ॥
तरुच्छायेव तप्तस्य तृषितस्येव दीर्घिका ।
निर्द्धनस्येव च निधिर्जगतो योऽत्र जायते ॥ १० ॥
सर्वज्ञचूडामणिना सर्वपापापहारिणा ।
सदानन्दकृता येन द्विचन्द्रं दृश्यते जगत् ॥ ११ ॥
कृतिनो रूढसत्त्वस्य कृष्णस्येवाच्युतात्मनः ।
भ्राता समधरो यस्य बलभद्र इवाभवत् ॥ १२ ॥
महीतलमहेन्द्रस्य मालवानामधीशितुः ।
स मन्त्री समभूत्प्राज्ञो वाचांपतिरिवोज्ज्वलः ॥ १३ ॥
न भ्रातृषु न मित्रेषु न ज्ञातिषु न बन्धुषु ।
भवत्युर्वीपतेरस्य तस्मिन्यत्प्रेमशाश्वतम् ॥ १४ ॥
स कदाचिन्नृपः सायं समये शर्वरीमुखे ।
विद्यानिधिममुं प्राह विद्वद्गोष्ठीमधिष्ठितः ॥ १५ ॥
कादम्बरीकथाबद्धकौतुकं हृदयं मम ।
कदापि कालो न श्रोतुं निविष्टस्य नृरक्षणे ॥ १६ ॥
तदिदानीं त्वया सम्यक् सा संक्षेपेण कथ्यताम् ।
मतिवैभवनिस्तीर्णवाङ्मयेन ममाग्रतः ॥ १७ ॥
इत्येवमर्थितो राज्ञा प्राज्ञेषु प्रथमेन सः ।
बद्धाञ्जलिरिदं प्राह मण्डनो मन्त्रिशेखरः ॥ १८ ॥
कादम्बरीकथा स्वामिन् ! महती च महाद्भुता ।
सा संक्षिप्यैव कथिता बाणेनापि महाधिया ॥ १९ ॥
देवी कादम्बरी दिव्या चन्द्रापीडः सचन्द्रमः ।
तयोर्नैवावधिः शङ्के गौरवेषु गुणेषु च ॥ २० ॥
तथापि शासनाद्देव ! तव संक्षिप्य तां कथाम् ।
वक्ष्ये वाचां न गर्वेण मर्षणीयं महाजनैः ॥ २१ ॥
बाणस्य वर्त्मना गन्तुर्मम मास्त्वपराधिता ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मतङ्गजमतं वर्त्म मशकैः किं नु वर्ज्यते ? ॥ २२ ॥
श्रीमानभूदुज्जयिन्यां तारापीडाभिधो नृपः ।
आमेरुलङ्कमखिलामवनीमन्वभुङ्क्त यः ॥ २३ ॥
कूले कूले पयोधीनां कुञ्जे कुञ्जे च भूभृताम् ।
गीयते यस्य गीर्वाणगणैर्गुणवतो यशः ॥ २४ ॥
यस्य यात्रासु धरणी रमणीव रजस्वला ।
अभ्यषेचि द्विषामस्त्रैरसूत च सुतां श्रियम् ॥ २५ ॥
पीताम्भसि वियत्सिन्धौ यस्य यात्रासु पांसुभिः ।
तत्र स्वर्णसरोजानि दधुः स्थलसरोजताम् ॥ २६ ॥
मुक्तकोशे मुहुर्यस्य कृपाणे कृतिनो रणे ।
मुक्तकोशाः स्वयं चापि बभूवुरतिभूभुजः ॥ २७ ॥
ततो विलासवत्याख्या तस्य सर्वगुणोत्तरा ।
बभूव महिषी पत्युः पशूनामिव पार्वती ॥ २८ ॥
सर्वसौभाग्यसरणिः सौन्दर्यामृतचन्द्रिका ।
रराज सा रतिपतेः शक्तिर्मूर्तेव मोहिनी ॥ २९ ॥
समानगुणशालिन्या सदृशोदाररूपया ।
तया चकाशे भूपालः पौर्णमास्येव चन्द्रमाः ॥ ३० ॥
शुनासीरनिभस्यास्य शुकनास इति श्रुतः ।
वाचांपतिरिवान्योऽभून्मन्त्री मन्त्रविदां वरः ॥ ३१ ॥
प्राणेभ्योऽपि प्रियतमं प्रतिरूपमिवात्मनः
भूमेरर्द्धांशभोक्तारं वितेने तं विशांपतिः ॥ ३२ ॥
वशिष्ठादलघिष्ठस्य तस्य रुन्धत्यरुन्धतीम् ।
मनोरमेति नाम्नासीन्मन्त्रिणो वामलोचना ॥ ३३ ॥
विभुस्तस्मिन्स विन्यस्तविश्वभारो विचक्षणे ।
शेषन्यस्तधुरः सौरेरन्वहं सुखमन्वभूत् ॥ ३४ ॥
स पात्रं सर्वसौख्यानां भवन्नपि च पार्थिवः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सुखं न लेभे सुचिरं सुतजन्मसमुद्भवम् ॥ ३५ ॥
नृपः कदाचिन्निर्विण्णो निरपत्यतयात्मनः ।
बभूव चिन्ताविवशः सह देव्या च मन्त्रिणा ॥ ३६ ॥
किमर्चिता न कृतिनः किं सत्कर्म कृतं नवा ।
किं न पात्रे कृतं दानं किं मे वन्ध्यत्वकारणम् ? ॥३७॥
पुत्रस्त्रायत इत्येव पुन्नाम्नो नरकात्पितॄन् ।
स न चेदस्मि गर्ह्योऽहमुभयोरपि लोकयोः ॥ ३८ ॥
किमैश्वर्येण किं दारैः किं राज्येन किमायुषा ? ।
कुलधूर्वाहकः कोपि न चेल्लभ्येत नन्दनः ॥ ३९ ॥
अपुत्रिणः परार्थोऽयमाधिपत्यपरिग्रहः ।
मन्ये वर्षधरस्येव सत्कलत्रोपसङ्ग्रहः ॥ ४० ॥
विभुत्वं पुत्रहीनस्य विधवाकण्ठभूषणम् ।
भस्मन्येव हुतं भाग्यं सम्पत्काननचन्द्रिका ॥ ४१ ॥
पुत्रात्मनि पुमर्थेऽस्मिन्पौरुषाणामगोचरे ।
विना मम गतिर्नान्या भवं भक्तार्त्तिभञ्जनम् ॥ ४२ ॥
निश्चिन्त्यैवं नृपः पत्न्या सचिवेन च संयुतः ।
तपश्चरितुमारेभे महेशन्यस्तमानसः । ॥ ४३ ॥
ततः कदापि शर्वर्यां स्वप्ने स्वं विशदाननम्
अपश्यदैन्दवं बिम्बमवनीपालवल्लभा ॥ ४४ ॥
कयापि करयोर्दत्तं पुण्डरीकं प्रहृष्टया ।
ददर्श दयिता चापि शुकनासस्य शोभनम् ॥ ४५ ॥
ततः सा नृपतेः पत्नी तपसां महतां फलम् ।
बभार गर्भं चन्द्रस्य बिम्बं वीचिरिवाम्बुधेः ॥ ४६ ॥
आनन्दनमशेषाणामङ्गाभरणमद्भुतम् ।
दिने दिने.............यं दधौ दौर्हृदलक्षणम् ॥ ४७ ॥
रुरुचे रोमलतिका तस्या मध्ये तनीयसी ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शशिनः सत्त्वभूतस्य निशेव निकटस्थिता ॥ ४८ ॥
विधोर्गर्भस्य तस्यांशुभरिताविव पाण्डुरौ ।
स्तनौ नीलमुखौ तस्यास्तदङ्केनेव मुद्रितौ ॥ ४९ ॥
अलसस्निग्धताराक्षमानीलस्तनचूचुकम् ।
आलक्ष्यमध्यमवहद्वपुः पत्नी च मन्त्रिणः ॥ ५० ॥
ततोऽभिजाते दिवसे सुलग्ने शुभशालिनि ।
असूत चन्द्रमैन्द्रीव दिशा देवी विभोः सुतम् ॥ ५१ ॥
तस्मिन्नेव दिने सा च मन्त्रिपत्नी मनोरमा ।
मणिं महाब्धिवेलेव सुषुवे सुतमुज्ज्वलम् ॥ ५२ ॥
जगदानन्दजलधौ निमग्नमिव निर्भरम् ।
तत्सन्तानोदयादासीत्समस्तमुदितोत्सवम् ॥ ५३ ॥
ऋणेन मुक्तो रुरुचे पितृणां पृथिवीपतिः ।
परिवेषपरित्यक्तः पद्मिनीनामिवेश्वरः ॥ ५४
चन्द्रोपमं नृपः पुत्रं चन्द्रापीडामिधं व्यधात् ।
मन्त्री च वंशोचितया वैशम्पायनमाख्यया ॥ ५५ ॥
चन्द्रापीडानुगं चक्रे शुकनासः स्वमात्मजम् ।
पुष्पवद्भ्यामिवाकाशं ताभ्यां राजकुलं बभौ ॥ ५६ ॥
विधाय विद्याभवनं विभुस्तस्य पुराद्बहिः ।
अशिक्षयदमुं तत्र गुरुभिर्गुरुवत्सलम् ॥ ५७ ॥
शस्त्रेष्वस्त्रेषु वाहेषु शास्त्रेष्वपि सुशिक्षितः ।
स यथा समभूत्तस्य सखापि च तथाऽभवत् ॥ ५८ ॥
तत इन्द्रायुधं नाम पिता प्रजविनं हयम् ।
तत्रैव प्राहिणोदस्मै समुद्रात्कञ्चिदुद्धृतम् ॥ ५९ ॥
विहङ्गानामिव पतिं तुरङ्गाकारधारिणम् ।
उच्चैःश्रवसमुद्वीक्ष्य हसन्तमिव हेषया ॥ ६० ॥ युग्मम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तमश्ववर्यमाश्चर्यवपुषं वायुरंहसम् ।
समीक्ष्य चन्द्रापीडोऽपि सविस्मयमचिन्तयत् ॥ ६१ ॥
अहो ! न भविता सोऽयमश्वजातिसमुद्भवः ।
देवो यः कश्चिदेव स्याच्छापात्तुरगतां गतः ॥ ६२ ॥
अमुमत्यद्भुताकारमदत्वा नूनमम्बुधिः ।
उच्चैःश्रवसमुत्पाद्य वृत्राराति व्यलोभयत् ॥ ६३ ॥
इत्येवं चिन्तयन्नत्वा तमारुह्य तरस्विनम् ।
पितुः पार्श्वे ययुः पाकहन्तेव पतिमभ्रमोः ॥ ६४ ॥
अवलोक्य ततः पुत्रमासेचनकदर्शनम् ।
जैवातृकमिवाम्भोधिर्जहर्ष जगतीपतिः ॥ ६५ ॥
ततः स सत्त्वजनुषा वयसा भूषितोऽभवत् ।
भुजाभ्यां भूरिसाराभ्यां भूमेरुद्वहनक्षमः ॥ ६६ ॥
ततः स शुकनासेन संमन्त्र्य सह मन्त्रिणा ।
अकरोदस्य विधिवद्यौवराज्येऽभिषेचनम् ॥ ६७ ॥
बन्दीकृतां विजित्याजौ कुलूतेन्द्रकुमारिकाम् ।
पत्रलेखां नृपः प्रादात्तस्मै ताम्बूलदायिनीम् ॥ ६८ ॥
स पत्रलेखया पार्श्वे सञ्चरन्त्या निरन्तरम् ।
रराज राजतनयो राजलक्ष्म्येव मूर्त्तया ॥ ६९ ॥
अथापरेद्युर्हरितां विजयाय नृपात्मजः ।
वरूथिनीरजःपीतवारिराशिः स निर्ययौ ॥ ७० ॥
तस्मिन्निर्गच्छति तदा बलेन महतान्विते ।
चचाल सकला चोर्वी चलाचलकुलाचला ॥ ७१ ॥
शुकनाससुतोऽप्यस्य मुहूर्तविरहाक्षमः ।
अन्वगादवनीपालपुत्रं तं पत्रलेखया ॥ ७२ ॥
कमप्युन्मूलयन्नन्यं कमपि प्रतिरोपयन् ।
कस्मादपि हरन्नर्थं कारासु कमपि क्षिपन् ॥ ७३ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ऐन्द्रीं पूर्वमथागस्त्यभूषणीं वारुणीं ततः ।
अनन्तरमुदीचीं च स जगाम शनैर्दिशः ॥ ७४ ॥
चतुर्भिरङ्गैर्हरितश्च चतस्रोऽपि विजित्य सः ।
चतुराननवर्ण्येन चतुरो यशसाऽभवत् ॥ ७५ ॥
चतुर्भिर्वत्सरैः सर्वां स विजित्यैवमुर्वरीम् ।
वासं हैमजडं भेजे शूरः स्वर्णपुराभिधम् ॥ ७६ ॥
तत्र जित्वा रिपून्सर्वान्सुचिराध्वश्रमार्दितम् ।
बलं विश्रामयामास कश्चित्कालमुदारधीः ॥ ७७ ॥
ततः कदाचिन्मृगयां तत्राद्रेस्तटकानने ।
आतन्वानोऽयमद्राक्षीदद्भुतं किन्नरद्वयम् ॥ ७८ ॥
वपुषा मनुषाकारं मुखेन तुरगाकृति ।
तद्दृष्ट्वा हृदयं तस्य बभूवोदितविस्मयम् ॥ ७९ ॥
तद्ग्रहीतुमनास्तावत्कुमारः कुतुकावहम् ।
विमुक्तकुशयेवाश्ववेगाद्दूरमधावयत् ॥ ८० ॥
तथा स तरसा वाजी ययावुर्ध्वोल्लसत्सटः ।
यथा न याति पुरतो मनश्चास्य महोद्यमम् ॥ ८१ ॥
महत्या वाञ्छयाविष्टो वाजिना वायुरंहसा ।
अत्यवाहयदानीतः पन्थानं पञ्चयोजनम् ॥ ८२ ॥
इदं गृहीतमित्येव तस्यानुद्रवतः पुरः ।
अद्रेः शिखरमत्युच्चमश्वोऽगम्यमवाप तत् ॥ ८३ ॥
स विकृष्य कुशां तावद्धारयन्सत्वरं हयम् ।
करेणास्फालयन्कण्ठे विहस्यैवमचिन्तयत् ॥ ८४ ॥
अकस्मादागतमियमहो मदविवेकिता ।
महद्दूरमिदं वर्त्म वनं मानुषवर्जितम् ॥ ८५ ॥
किमस्मिन्कृतवानस्मि कौतुकं किन्नरद्वये ।
गृहीतेनागृहीतेन किं वानेन प्रयोजनम् ॥ ८६ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



क्वाहं क्व नु बलं क्वाध्वा क्व गन्तव्यमितः परम् ।
शिबिरं प्रति यास्यामि वर्त्मना केन वा पुनः ? ॥ ८७ ॥
गृहीत्वा यदि गमिष्यामि वर्त्म वाजिखुराङ्कितम् ।
तन्न दृश्यते पाषाणैः पर्णैरपि परिस्तृतम् ॥ ८८ ॥
विधिनाश्वमुखव्याजात्सत्यं नीतोऽस्मि सम्प्रति ।
भवन्ति भाजनान्येवमापदामविवेकिनः ॥ ८९ ॥
तुरगस्तृषितः सोऽयमहमप्यधिकश्रमः
पूषा ललाटं तपति पूर्वभागोज्झितं दिनम् ॥ ९० ॥
इति संचिन्तयन्नेव सलिलान्वेषतत्परः ।
शनैः सञ्चारयन्नश्वं चचार परितः श्रमी ॥ ९१ ॥
चरन्नितस्ततस्तत्र वने खिन्नः पदे पदे ।
कालेन महता कश्चित्पन्थानं पर्यलोकयत् ॥ ९२ ॥
विकीर्णं मिश्रशैवालैर्मृणालैरर्द्धखण्डितैः ।
पङ्किलस्थलमार्द्राभिः करिणां पदपङ्क्तिभिः ॥ ९३ ॥
पथानेन परं हृष्यन्नतीत्य स्तोकमन्तरम् ।
अपश्यदमलोदारवारिपूरं महत्सरः ॥ ९४ ॥
समुद्रस्येव हृदयं मानसस्येव मातृकाम् ।
सरितां जारमिव तत्सवितारमिवाम्भसाम् ॥ ९५ ॥
रविरथ्यतुरङ्गाणां खुरकुद्दालकुट्टनैः ।
अधस्त्रुटितमाकाशखण्डमेकमिव च्युतम् ॥ ९६ ॥
अम्भोभिररविन्दानां मकरन्दसुगन्धिभिः ।
अम्बुमानुषयोषाणामधिवासितकुन्तलम् ॥ ९७ ॥
सञ्चरत्याः सदा नैजसरोजविपिने श्रियः ।
दधन्नूपुरनिःस्वानधियं कारण्डनिःस्वनैः । ॥ ९८ ॥
अमृतस्वच्छसलिलमन्तराकीर्णशैवलम् ।
विधोर्बिम्बमिवाकाशाच्च्युतं सुस्पष्टलाञ्छनम् ॥ ९९ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कर्णानुकूलशकुनिकलकोलाहलाकुलम् ।
कौरवाणामिव स्थानं सञ्चरद्धार्त्तराष्ट्रकम् ॥ १०० ॥
स्वच्छां वरपरिष्कारपयोधरभरश्रियाम् ।
आतन्वदाशासु दृशामादर्शश्रियमद्भुताम् ॥ १०१ ॥
तमालतालहिन्तालकृतमालाभिर्द्रुमैः ।
विविधैर्बहुभिः पूर्णवेलावनिविराजितम् ॥ १०२ ॥
प्रत्युद्व्रजदिवाम्भोजबन्धुभिः वीचिमारुतैः ।
सर्वेन्द्रियानन्दकरं स ननन्दाभिवीक्ष्य तत् ॥ १०३ ॥
ततोऽवतीर्य तुरगाद्विपर्याणं विधाय तम् ।
भूमौ विलुठितं कृत्वा व्यगाहयदमुं जलम् ॥ १०४ ॥
परितः परिमृश्याङ्गं पाणिभ्यामात्मनो विभुः ।
अश्वमारचितस्नानमपाययत पुष्करम् ॥ १०५ ॥
तत उत्तीर्य सलिलान्मृणालानि विखण्ड्य च ।
तमालच्छायमाश्रित्य विशश्राम विभुः क्षणम् ॥ १०६ ॥
अथाकर्णितमश्वेन शश्वदुत्कर्णशालिना ।
स कण्ठतन्त्रीस्वरयोरशृणोदैक्यमद्भुतम् ॥ १०७ ॥
तदुद्भवं ततो ज्ञातुं व्रजन्नारुह्य वाहनम् ।
ददर्शास्योत्तरे तीरे शूलिनः शून्यमालयम् ॥ १०८ ॥
बद्ध्वा क्वापि बहिर्वाहं बद्धविस्मयमानसः ।
प्रविश्य दृष्ट्वा प्राणंसीत्तत्र शम्भुं चतुर्मुखम् ॥ १०९ ॥
देवस्य दक्षिणे भागे ददृशे कापि तस्थुषी ।
गायन्ती कौमुदी गौरा तरुण्यपि तपस्विनी ॥ ११० ॥
शङ्खगर्भादिवोद्भूता चन्द्रबिम्बादिवोदिता ।
श्वेतद्वीपादिवानीता श्वेतिम्नामिव देवता ॥ १११ ॥
सर्वानवद्यहृद्याङ्गीं तरुणीं च तपस्विनीम् ।
विसिष्मिये विलोक्याथ चिन्तामन्तरधत्त च ॥११२॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वपुर्महाद्भुतमिदं वयो मदनवर्द्धनम् ।
किं वा कारणमेतस्यास्तपश्चरणसाहसे ॥ ११३ ॥
अनुरूपमदृष्ट्वैकमथवा वरमात्मनः
तपश्चरति तं लब्धुं शङ्के चन्द्रार्द्धशेखरात् ॥११४॥
विचिन्त्यैवं विधिबलं निन्दन्नेव नृपात्मजः ।
गीतान्ते किमपि प्रष्टुकामः क्षणमुपाविशत् ॥११५॥
ततः सा नियमान्ते तं स्निह्यन्ती स्निग्धया दृशा ।
स्वागतादिवचःपूर्वमनयन्निजमाश्रमम् ॥ ११६ ॥
तत्र सा फलमूलाद्यैस्तस्यातिथ्यं यथाविधि ।
कृत्वा तेन कृतानुज्ञा तच्छेषं समभुङ्क्त च ॥ ११७ ॥
कुतोऽसि क्व नु गन्तासि कुत्रत्योऽसि च कोऽसि च ? ।
वद भद्रेति पृच्छन्त्यै सर्वं तस्यै ततोऽब्रवीत् ॥११८॥
श्रुत्वा शुभनिधेरस्य कुलं नाम च वैभवम् ।
दृष्ट्वा रूपं च शीलं च दधौ मनसि विस्मयम् ॥११९॥
ततो निगदितात्मीयवृत्तान्तो नृपनन्दनः ।
तस्याः पप्रच्छ बालायाः तपश्चरणकारणम् ॥ १२० ॥
सा तेन पृष्टा वज्रेण ताडितेवाश्रुलोचना ।
दीर्घमुष्णं च निःश्वस्य दधौ कामपि दुर्दशाम् ॥१२१॥
किं मया कृतमित्यन्तःखिन्नेनाश्वासितामुना ।
वक्तुमारभतात्मीयं वृत्तमाजन्मसम्भवम् ॥ १२२ ॥
भद्र ? पापीयसी साहं वक्ष्ये किंवात्र मङ्गलम् ।
तथापि तव वाञ्छां चेत्को दोषः शृणु कथ्यते ॥१२३॥
अस्ति राजा चित्ररथो मित्रभूतो बिडौजसः
राजा गन्धर्वलोकस्य सर्वस्यापि धुरन्धरः ॥ १२४ ॥
चक्रे चैत्ररथं नाम नन्दनादपि नन्दनम् ।
कैलासमेखलायां यः कमप्यारामपद्भुतम् ॥ १२५ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



हेमकूटतटे कृत्वा हेमकुटाभिधं पुरम् ।
देवो यस्मै ददाविन्द्रः स्वयं स्वर्गमिवापरम् ॥ १२६ ॥
दृष्ट्वा दिवस्पतेः सख्युर्मानसाख्यं महासरः ।
वितेने तत्प्रतिद्वन्द्वि येनाच्छोदमिदं सरः ॥ १२७ ॥
तस्य हंस इति ख्यातो भ्राता भ्राजिष्णुविक्रमः ।
यौवराज्याधिपत्यस्थो ज्ञायते ज्ञातिवंशजः ॥ १२८ ॥
तस्य हंसस्य गौरीति चन्द्रपादसमुद्भवा ।
बभूव महिषी मान्या शचीव शतयज्वनः ॥ १२९ ॥
तस्याहमभवं कन्या गौर्यामिर्यमतेजसः ।
महता श्वेतवर्णेन महाश्वेतेति नाम मे ॥ १३० ॥
पितृभ्यां पुत्रहीनाभ्यां पुत्र इत्येव मानिता ।
अभूवमथ कालेन शनैरुन्मुक्तशैशवा ॥ १३१ ॥
ततः प्रादुरभूत्कालो मधुर्वनविभूषणम् ।
कूलंकषी कृतानङ्गकोलाहलकुतूहलः ॥ १३२ ॥
उद्भिन्नस्तबकोदारस्तनीनामुज्ज्वलश्रियाम् ।
लतानामासललितः प्रथमार्त्तवविभ्रमः ॥ १३३ ॥
अकारि नूनमानङ्गमध्यापयितुमागमम् ।
झङ्कारछद्मना भृङ्गैरोंकारध्वनिरुच्चकैः ॥ १३४ ॥
मनोभवमहाराजमणिकाहलधूर्वहः ।
पञ्चमः परपुष्टानां कञ्चकारणकार्मुकम् ? ॥ १३५ ॥
अविकुर्वदनङ्गेन वस्तुनासीन्महीतले ।
दधुर्येन दिने तत्र तरवोऽपि गुणान्तरम् ॥ १३६ ॥
सपल्लवैः सप्रसवैः सामोदैः सालिकोकिलैः ।
सहकारैः कृतानङ्गसहकारैर्बभूविरे ॥ १३७ ॥
क्वचिन्मुखरकोकिलं क्वचनमाद्यदिन्दिरम् ।
क्वचित्सुरभिमारुतं क्वचनपुष्पितानोकहम् ॥१३८॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मनोहरमितस्ततो विहरमाणरागिव्रजम् ।
वनं तदिदमन्वहं मदयति स्म यूनां मनः ॥१३९ ॥

इतिश्रीमण्डनकादम्बरीदर्पणे प्रथमः परिच्छेदः

समये तत्र संवृद्धसकलोद्यानसम्पदि ।
सह मात्रा सरः स्नातुमच्छोदमिदमागमम् ॥ १ ॥
मातर्यत्राम्भसि स्नान्त्यां माधवारम्भमण्डितम् ।
व्यचरं वीक्षमाणाहं वनमेतन्मनोहरम् ॥ २ ॥
अथाघ्राय नवं कञ्चिदामोदमनिलाहृतम् ।
ततः शतपदीमात्रं समगच्छं तदुत्सुका ॥ ३ ॥
सञ्चरन्त्या मया तत्र पञ्चेषुरिव मूर्तिमान् ।
अलक्षि कश्चिदाश्चर्यविग्रहो मुनिनन्दनः ॥ ४ ॥
सख्युः सवयसो हस्तं समालम्ब्य सविभ्रमम् ।
वर्त्तमानो मधुरिव माधवेन वनान्तरे ॥ ५ ॥
वीतकामोचितेनैव वेषेण व्रतशालिना ।
कूलंकषभुजोन्मेषं कुर्वाणः कुसुमायुधम् ॥ ६ ॥
मुनिवेषधरो मूर्त्या विलास इव विग्रही ।
अनुतिष्ठन्निवानङ्गब्रह्मचर्यात्मकं व्रतम् ॥ ७ ॥
व्याकुर्वन्निव वेषेण व्रतिना रूपहारिणा ।
अदृष्टपूर्वमद्वैतमर्थयोः काममोक्षयोः ॥ ८ ॥
मदनस्येव मदनो विभ्रमस्येव विभ्रमः ।
सौन्दर्यस्येव सौन्दर्यं यौवनस्येव यौवनम् ॥ ९ ॥
कयापि सौरभाकृष्टकाननान्तरभृङ्ग्या ।
कान्तया वनमञ्जर्या कलितोत्तंसभूषणः ॥ १० ॥
ततस्तमीक्ष्यमाणायाः कौतुकान्मुनिनन्दनम् ।
मम प्राप्तावकाशोऽभून्मानसे मकरध्वजः ॥ ११ ॥
स च चान्द्रीमिव कलां दृष्ट्वा दिष्ट्याथ मां युवा ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विमुक्तनिजमर्यादो बभूवाब्धिरिवाकुलः ॥ १२ ॥
स व्याप सव्यनिर्मुक्तैस्तावत्संमोहनैः शरैः ।
समयन्नस्तदानङ्गः समं लक्षीचकार नौ ॥ १३ ॥
अन्योऽन्यमोहनास्त्राभ्यामावाभ्यामाव्रयोर्मनः ।
सहसा मोहयामास संत्यक्तस्त्वायुधः स्मरः ॥ १४ ॥
ततोऽहमेत्य तौ नत्वा तन्मित्रमिदमब्रुवम् ।
क एष कस्य तनयः कस्येयं कलिकेति च ? ॥ १५ ॥
स चाह श्रूयतां बाले ! यदि शुश्रूषसे स्फुटम् ।
श्रीमान्मुनिः श्वेतकेतुः श्रूयते स्वर्विभूषणम् ॥ १६ ॥
तमभ्रसरसि स्नान्तं दृष्ट्वा तत्राब्जवर्त्तिनी ।
असूत श्रीरमुं पुत्रं तत्सौन्दर्योदितस्मरा ॥ १७ ॥
पुण्डरीकाभिधः सोऽयं पुण्डरीके यतोऽभवत् ।
कपिञ्जलोऽस्य कौमारादारभ्य सुहृदस्म्यहम् ॥ १८ ॥
इदानीमिन्द्रसदनादेष नन्तुमुपागतः ।
कैलासमौलिकलितकल्याणायतनं महः ॥ १९ ॥
दृष्ट्वैनं दिविषत्पूज्यं देवी नन्दनदेवता ।
कर्णे कल्पद्रुकलिकामकरोदस्य सादरम् ॥ २० ॥
तस्मिन्नेवं वदत्येव सस्मितं स युवाऽब्रवीत् ।
यदि कौतुकमेतस्यां तव दास्यामि गृह्यताम् ॥ २१ ॥
इत्युक्त्वा स्वयमभ्येत्य स्वकर्णात्स्वेदशालिना ।
निदधे निजहस्तेन मम श्रवसि मञ्जरीम् ॥ २२ ॥
न विवेद तदा पाणिच्युतां स्फटिकमालिकाम् ।
अनयं हारपदवीमहमादाय तां द्रुतम् ॥ २३ ॥
तावत्समेत्य सहसा मातुर्मामाह चेटिका ।
स्नाता देवी त्वमायाहि स्नानार्थं भर्तृदारिके ! ॥ २४ ॥
इत्याकर्ण्य वचस्तस्या मातुर्वशविलीनया ।

For Private and Personal Use Only

मया गन्तुमुपक्रान्तं तत्र संस्थाप्य मानसम् ॥ २५ ॥
मनसा शून्यमिव च वर्त्तमानं पदे पदे ।
ततस्तं कुपितः प्राह कामलोलं कपिञ्जलः ॥ २६ ॥
क्व विरक्तिः क्व विषयः क्व समाधिः क्व लोकता ।
क्व प्रबोधः क्व वा मोहः क्व तपः क्व नु वा रतिः?॥२७॥
किमेवं क्षणमात्रेण जायसे विषयैर्जितः ।
त्वमप्येवं यदि सखे ! किं तपोभिः किमागमैः ? ॥ २८ ॥
कथं करतलभ्रष्टां कण्ठे च कलितां त्वया ।
अक्षमालामजानानो वर्त्तसे स्मरमोहितः ॥ २९ ॥
इति श्रुत्वा विलक्षो मां मन्वीथा मैवमाः सखे ! ।
अथवा नैव सोढाऽहमक्षमालाहरामिमाम् ॥ ३० ॥
इति कुप्यन्निव प्राह स च मां तरले ! त्वया ।
अदत्त्वा नैव गन्तव्यं ममाक्षलतिकामिमाम् ॥ ३१ ॥
निशम्य तन्निवृत्याहं चक्षुर्निक्षिप्य तन्मुखे ।
समुत्कृष्याक्षमालेति हारमेव ममार्पयम् ॥ ३२ ॥
स च मन्मुखविन्यस्तनिजनेत्राञ्चलो युवा ।
मम मुक्तावलीमेव मेने स्वामक्षमालिकाम् ॥ ३३ ॥
हाराक्षलतयोरासीत् परिवृत्तिर्यथावयोः ।
तस्मिन्नवसरे जाता तथैव मनसोरपि ॥ ३४ ॥
ततोऽहं सविधं प्राप्य मातुः स्नात्वा सरोवरे ।
तेन चोरितचित्तैव तया सदनमभ्यगाम् ॥ ३५ ॥
सखीः सर्वा बहिष्कृत्य तत्र तल्पैकसाक्षिणी ।
अनङ्गदुर्विलासानामभवं पात्रमादिमम् ॥ ३६ ॥
मुषितेव प्रसुप्तेव मूर्च्छितेव मृतेव च ।
अवाच्यामचिकित्स्यां च तादृशीमगमं दशाम् ॥ ३७ ॥
ततस्तरलिकां दृष्ट्वा सखीं तत्र विलम्बिताम् ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तत्करे स इमां मह्यं विलिख्यार्या वितीर्णवान् ॥ ३८ ॥
हारापदेशतो मम हरहर ! निक्षिप्य वागुरां कण्ठे ।
अयि सुमुखि ! मन्मथःस्वयमपहर्त्तुं प्राणहरणमुद्युङ्क्ते ॥३९॥
इति शश्वदिमामार्यां पठन्त्या मे पदे पदे ।
मनो बभूव महता शोकेन चुलुकीकृतम् ॥ ४० ॥
क्षणं तल्पे क्षणं सौधे क्षणमुद्यानवीथिषु ।
न मे कामार्थ्यमानायाः बभूव क्वापि विश्रमः ॥ ४१ ॥
न हारो न तुषाराम्बु न मृणालं न चन्दनम् ।
बभूवुर्विरहार्त्तायाः सन्तापशमनानि मे ॥ ४२ ॥
चिन्तातूलिकया चित्तफलकान्तर्विलिख्य तम् ।
अवेक्षमाणा व्यनयमहःशेषं तमातुरा ॥ ४३ ॥
ततस्तरलिकासायं तस्य मित्रं कपिञ्जलः ।
समेत्य सदनद्वारि वसतीति ममाब्रवीत् ॥ ४४ ॥
समाहूतो मया तावत्समानोत्कण्ठया मिथः ।
सख्युः प्रारभताख्यातुं सर्वपृष्टः स चेष्टितम् ॥ ४५ ॥
त्वयि यान्त्यां तदा तत्र चरन्तं तमितस्ततः ।
दृष्ट्वाहं प्रणयात्कोपं दर्शयन्निदमब्रुवम् ॥ ४६ ॥
त्वमेवं यद्यहं नात्र स्थास्यामीति तवान्तिके ।
निवृत्य कुत्राप्यगमं भावं तस्य परीक्षितुम् ॥ ४७ ॥
मय्यप्यन्तर्हिते दूरं मदनालसमानसः ।
स कामी सत्वरं प्रापत्पदवीं त्वत्परिष्कृताम् ॥ ४८ ॥
ततः क्षणवियोगार्त्तस्तस्याहं पुनरागतः ।
तत्रादृष्ट्वा सवयसमभूवमतिविह्वलः ॥ ४९ ॥
समन्तादपि चान्विष्य सरस्तीरलतागृहे ।
निषीदन्तं विषीदन्तं तं क्वापि समवैक्षिषि ॥ ५० ॥
विमुक्तमिन्द्रियग्रामैः विनाकृतमिवासुभिः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भूताविष्टमिव भ्रान्तचेतनं विवशाकृतिम् ॥ ५१ ॥
प्राबोधयममुं भूयो वचनैः सनिदर्शनैः ।
स चानुल्लङ्घितानङ्गशासनः प्राह सस्मितम् ॥ ५२ ॥
साफल्यमुपदेशानां तस्मिन्यस्य वशे मनः ।
मनो मम पराधीनं मन्मथाकुलितात्मनः ॥ ५३ ॥
यदीह स्निह्यति भवान्येन केनापि वर्त्मना ।
सखे ! यथाहं जीवामि तथा प्रयततामिति ॥ ५४ ॥
इति श्रुत्वा करोम्यामि का चिकित्साऽस्य का गतिः ।
इति संचिन्तयन्नासं कर्त्तव्ये कातरश्चिरम् ॥ ५५ ॥
श्रूयन्त इतिहासेषु विरहे याः प्रतिक्रियाः ।
ताः सर्वास्तापशान्त्यर्थं तस्याकार्षं समाहितः ॥ ५६ ॥
मृदुलैर्विहिताः शय्याः पद्मिनीगर्भपल्लवैः ।
मृणालवलयैश्चैव वितेने वपुरावृत्तम् ॥ ५७ ॥
सौरभ्यशालिभिः किं च सान्द्रैश्चन्दनपल्लवैः ।
आविःस्वेदममुष्याङ्गमवीजयमनुक्षणम् ॥ ५८ ॥
पाणियन्त्रेण निष्पिष्य पटीरतरुपल्लवम् ।
तत्र संमिश्र्य कर्पूरं चर्चितं सकलं वपुः ॥ ५९ ॥
तैस्तैः शीतोपकरणैरपि ताम्यन्तमातुरम् ।
तमवेत्य त्वदायत्तजीवितं त्वामुपागमम् ॥ ६० ॥
प्राणैर्निःश्वसितप्रायसञ्चारैः स तु वर्तते ।
इतःपरं भवत्येव प्रमाणमिह कर्मणि ॥ ६१ ॥
इत्युक्त्वा पूषणि ययौ पश्चिमाचलभूषणे ।
निवृत्य सन्ध्यानियमः सीदतः सख्युरन्तिकम् ॥६२ ॥
ततोऽहमपि तस्याज्ञां कर्त्तुं कौतुकशालिनी ।
अभूवमनुचिन्त्यार्त्ता पितृभ्यां परतन्त्रताम् ॥ ६३ ॥
अथ शश्वन्नवालोकबाणविद्ध इवांशुमान ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अवाप शनकैरस्तमसृजेवारुणाकृतिः ॥ ६४ ॥
समान्तरमितेनेव रागपूरेण पूरितम् ।
सायं सन्ध्यावृतं व्योम सकलं समलक्ष्यत ॥ ६५ ॥
अनुक्षणं मां मुञ्चन्तीमवेक्षितुमिवाक्षमाः ।
पद्मिन्यः परमैक्ष्यन्त मीलदब्जविलोचनाः ॥ ६६ ॥
महता मोहजालेन मदीयमिव मानसम् ।
तमसाऽजनि सान्द्रेण सर्वं कञ्चुकितं जगत् ॥ ६७ ॥
मम मत्वेव विफलं माहेन्द्री दिङ् मनोरथम् ।
संजहास समालक्ष्यचन्द्रबिम्बोदयच्छलात् ॥ ६८ ॥
सर्वत्र तमसां व्यूहं संहरन्नपि चन्द्रमाः ।
ममोत्पादयति स्मान्तर्महन्मोहमयं तमः ॥ ६९ ॥
सन्तप्यमाना शशिनो मयूखैर्वाडवोपमैः ।
दुरन्तया दुर्दशया गृहीत्वा समचिन्तयम् ॥ ७० ॥
चन्द्रमास्तापयेदेष कालकूटनिभैः करैः ।
मामिवाद्य मयिन्यस्तजीवितं जीवितेश्वरम् ॥ ७१ ॥
मन्मथो वपुषा तस्य विजितो बद्धमत्सरः ।
सहायं चन्द्रमासाद्य शङ्के तं प्रहरिष्यति ॥ ७२ ॥
स च स्यादियता कान्तः कालेन कलुषो मयि ।
बिभेति न च पित्रोर्मे महती विरहव्यथा (?) ॥ ७३ ॥
सञ्चिन्त्यैवं तरलिकाद्वितीया केनचित्पथा ।
बद्धाभिसारिकावेषा निरगच्छं निकेतनात् ॥ ७४ ॥
अभूदभिसरन्त्या मे कर्णान्ताकृष्टकार्मुकः ।
प्रदर्शयन्पुरो मार्गं पञ्चेषुः पदवीसखः ॥ ७५ ॥
तदा मे सविधं भर्त्तुः प्रयान्त्या अपि सादरम् ।
पदे पदे परमभूद्वैमनस्यमकारणम् ॥ ७६ ॥
अपि सर्वाणि शकुनान्यशंसन्नशुभोदयम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दधौ स्पन्दं पतदिव दक्षिणं मुहुरीक्षणम् ॥ ७७ ॥
विशङ्कमाना बहुशः स्थित्वा स्थित्वा पदे पदे ।
जातभीतिरभूवं च जनदर्शनशङ्कया ॥ ७८ ॥
ततः प्रयान्ती शनकैर्मूकमञ्जीरमेखलम् ।
कपिञ्जलस्याशृणवं क्रन्दितं कर्णदारुणम् ॥ ७९ ॥
हा हन्त ! हा गुणनिधे ! हा सखे ! हा सखिप्रिय ! ।
वयस्यं मामनापृच्छ्य क्व यासि कुपितोऽसि किम्? ॥८०॥
पूर्णकामोऽसि पुष्पेषो ! कृतार्थोऽसि क्षपाकर !
विधे ! त्वं भव विश्रान्तो वः प्रियं किमतः परम् ॥८१॥
धिक् पापे ? त्वां महाश्वेते ! शपाम्यद्य सहस्रधा ।
त्वदुपेक्षणतो ह्येतत्कुलमुन्मूलितं गुरोः ॥ ८२ ॥
प्रलापमवकर्ण्यैवं प्राणैर्मुक्तेव सत्वरम् ।
तल्लतासदनद्वारं प्रापं प्रस्खलितैः पदैः ॥ ८३ ॥
तत्रान्तरे तमद्राक्षं प्रियं प्राणैः समुज्झितम् ।
शयानमङ्के सुहृदः स्वपन्तमिव मूर्च्छया ॥ ८४ ॥
निशीथिनीपतिमिव निष्पीडितसुधारसम् ।
भस्मशेषमिवाङ्गारं हिमच्छन्नमिवारुणम् ॥ ८५ ॥
तं दृष्ट्वा प्राणसंत्यक्तं लतेव पवनाहता ।
निपत्य भुवि निःसंज्ञा व्यलपं शोकविह्वला ॥ ८६ ॥
ततः प्रबुध्य सुचिरात्संत्यक्तपरिदेविताम् ।
सखीमवोचं संनद्धा प्रियानुगमनं प्रति ॥ ८७ ॥
किं रोदनेन किं शोकैः किंवा प्रलपितैश्च मे ? ।
तथैव तानि कार्याणि स्थास्नुर्यास्यादितः परम् ? ॥८८॥
मयैव मारितः सोऽयं वल्लभो मन्दभाग्यया ।
तदेनमनुयास्यामि सखि ! संगृह्यतां चिता ॥८९॥
मम प्रतिज्ञामित्येवमवकर्ण्य कपिञ्जलः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



महादुःखमगात्तत्र वयस्यमरणादपि ॥ ९० ॥
तस्मिन्नवसरे चन्द्रबिम्बात्कश्चिद्विनिर्गतः ।
दिव्याकृतिः पुमान्दोर्भ्यां पुण्डरीकमुदक्षिपत् ॥९१॥
तमादाय पुनर्गच्छन्दिवं दत्तपथः सुरैः ।
कृतास्मितो मामवदत्किमेतदिति विस्मिताम् ॥ ९२ ॥
वत्से ! मागाः शुचं भूयो भविताऽनेन सङ्गमः ।
तनुं न मुञ्च तावत्त्वं तपश्चर समाहिता ॥ ९३ ॥
इत्थमाश्वस्य मामिन्दुमण्डलं स पुनर्ययौ ।
तमाश्लिष्य दृढं दोर्भ्यां दधद्दिग्व्यापिदीधितीः ॥ ९४ ॥
ममादाय वयस्यं क्व यासीति क्रुधान्वितः ।
तं दिव्यमन्वगाद्बद्धदृढवल्कः कपिञ्जलः ॥ ९५ ॥
इत्थमुक्त्वा गते तस्मिन् दिव्ये पुंसि दृढव्रता ।
विश्वस्य तस्य वचनं विधूतविविधस्पृहा ॥ ९६ ॥
तपश्चरन्ती वर्तेऽत्र पित्रोः प्रेमानपेक्षिणी ।
सखीद्वितीया तस्यैव पत्युरुज्जीवनोत्सुका ॥ ९७ ॥
इतः पूर्वमिदं वृत्तमितः किंवा भवेदिति ।
विधिर्वेत्ति स एवं यो विलोभ्य विदधाति माम् ॥९८॥
इत्थमुक्त्वा पुनश्चापि रुदन्तीं राजनन्दनः ।
नेत्रे विमृज्य निःसीमबाष्पे तामिदमब्रवीत् ॥ ९९ ॥
भद्रे ! त्वं मा कृथाः शोकं मरुतां न मृषा गिरः ।
हरदग्धोऽपि मदनो लेभे रत्या किं न पुरा ? ॥१००॥
दिव्येन केनचिद्देहो दयितस्य हृतो यतः ।
ततस्ते भविता सत्यं पुनरुज्जीवितः पतिः ॥१०१॥
तामित्याश्वास्य तत्रैव विधिं सान्ध्यं विधाय च ।
अपृच्छत्तां पुनः शय्यामधिष्ठाय शिलामयीम् ॥१०२॥
सा ते तरलिका क्वाद्य सखी दुःखैकसाक्षिणी ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इति पृष्टा समाचष्ट सा स्मितमुखाम्बुजा ॥ १०३ ॥
पूर्वमावेदितो ह्येष राजा चित्ररथो मया।
तस्य कादम्बरीत्यस्ति नाम्ना कन्या मम स्वसा ॥१०४॥
कान्तिश्चेत्कमला यस्याः कायायमवलम्बताम् ।
कलत्रमपि कामस्य दृश्येत दिनदीपिका (?) ॥ १०५ ॥
सा सद्गुणानामवधिः सौन्दर्योदधिचन्द्रिका।
स्वसापि स्वामिकन्यापि ममासीद्वत्सला सखी ॥१०६॥
सा मे तपस्यया खिन्ना संविदं व्यतनीदिमाम् ।
सखीनामपि सर्वासां पुरः पित्रोरसन्निधौ ॥१०७॥
महाश्वेता यदा तस्मै करं दास्यति कामिने ।
करं दास्यामि कस्मैचिदहं तस्मादनन्तरम् ॥ १०८ ॥
इति प्रतिज्ञां श्रुत्वास्याः तां निवर्तयितुं मया ।
प्रेषयामासतुः कञ्चित्पितरौ वेत्रिणं मम ॥ १०९ ॥
तेन क्षीरोदनाम्ना सा तदर्थं प्रेषिता मया।
श्वःप्रातरेष्यति च मे तत्सन्देशं निवेदितुम् ॥११०॥
श्रुत्वेति वचनं तस्यास्तदारभ्योदितस्पृहः ।
कादम्बर्यां कथंचिच्च तां निशामत्यवाहयत् ॥ १११ ॥
ततस्तरलिका प्रातस्तस्याः सन्देशधारिणी ।
केयूरकेन भृत्येन कादम्बर्या सहाययौ ॥ ११२ ॥
चन्द्रापीडं तमालोक्य सा दूरादेव तत्सखी ।
पुंमासमेव संजज्ञे पुण्डरीकाङ्गहारिणम् ॥ ११३ ॥
ततो नत्वा महाश्वेतां तावुभौ च शशंसतुः ।
कादम्बर्या निगदितं संविदोऽनतिलङ्घनम् ॥ ११४
संचिन्त्य तस्याः सा चान्तःसंविदःप्रतिमोचनम् ।
शक्यं कर्तुमनेनेति सस्मितं तं ततोऽब्रवीत् ॥ ११५ ।
यद्येव पितरावस्या यास्यतो महतीं शुचम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तद्गत्वा संविदो बालां विनिवर्त्तयितास्म्यहम् ॥ ११६ ॥
किमप्यन्यन्महाभाग ! क्रियतां भवतापि च ।
यदि ते मयि वात्सल्यं इतःकार्यक्षतिर्न चेत् ॥ ११७ ॥
दृष्ट्वा कादम्बरीं त्वं च दृष्टिसाफल्यमाप्नुहि ।
किञ्चित्त्वद्दर्शनात्सा च कृतार्थयतु लोचने ॥ ११८॥
सा कान्तिशीलसौजन्यसौन्दर्यप्रमुखैः गुणैः ।
भवादृशां भवत्येव प्रेक्षणीयेषु वस्तुषु ॥ ११९ ॥
इति श्रुत्वा प्रतिश्रुत्य तां व्रजन्तीं स कौतुकी ।
अन्वगारुह्य तुरगं हेमकूटपुरं ययौ ॥ १२० ॥
पुरं तदखिलोदारं पुरन्दरपुरोपमम् ।
चित्रं चैत्ररथं दृष्ट्वा प्रहृष्टः प्राप विस्मयम् ॥ १२१॥
सन्ध्यायमानमभितः सान्द्रैर्मणिमरीचिभिः ।
मध्ये तत्र महोच्छ्रायं महामेरुमिवापरम् ॥ १२२ ॥
संचरत्तारकावृन्दसौधमण्डलवेदिकम् ।
गेहं गन्धर्वराजस्य जगाहे जातविस्मयः ॥ १२३ ॥
तत्र चित्राः समुल्लङ्घ्य सप्तकक्षास्तया समम् ।
ददर्श दक्षिणराजमन्दिरस्य महाद्भुतम् ॥ १२४ ॥
नवरत्नमयं सर्वनयनानन्दवर्द्धनम् ।
कन्यकागृहमैन्द्रेण धन्वनेव विनिर्मितम् ॥ १२५ ॥ युग्मम् ॥
तत्र मुक्तामये कापि मध्ये महति मण्डपे ।
शरदम्बुदगर्भस्थं समाजमिव विद्युताम् ॥ १२६ ॥
समन्ततः पल्लवितं सान्द्रैराभरणांशुभिः ।
वीरुधामिव विद्योति कुलं कुसुमपल्लवैः ॥ १२७ ॥
तन्वपास्तसुरस्त्रैणमन्ववायमिव श्रियः ।
मन्यमानमनङ्गेन कन्यकावृन्दमैक्षत ॥ १२८ ॥
अथ नरपतिनन्दनस्तदानीमभिनवयौवनरूपभूषणानाम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



परिषदमवलोक्य कन्यकानामपर इवाभवदन्यतन्त्रभावः १२९

इति मण्डनकादम्बरीदर्पणे द्वितीयः परिच्छदः ।

तत्र दुग्धाब्धिविमलं मुक्तापर्यङ्कमास्थिताम् ।
श्रियं विष्णोरिवान्यत्र शेषपर्यङ्कमीयुषीम् ॥ १ ॥
पल्लवारुणया पादच्छायया सविधस्थलीम् ।
पादपीठं वितन्वानां परितः पद्मिनीमयम् ॥ २ ॥
पुष्पायुधपुरद्वारं मणितोरणमङ्गलम् ।
कदलीकाण्डचारुभ्यामुरुभ्यामुपचिन्वतीम् ॥ ३ ॥
जघनेन जितानङ्गपर्यङ्कपरमश्रिया ।
स्वलावण्यसुधाम्भोधेः पुष्णन्तीं पुलिनश्रियम् ॥ ४ ॥
अत्युन्नतस्तनोद्वाहादस्तीत्युह्यमचाक्षुषम् ।
अनङ्गस्याङ्गमपरं वहन्तीं मध्यमद्भुतम् ॥ ५ ॥
बिभ्राणामभ्रतटिनीविपुलाब्जमविभ्रमम् ।
नाभीमनङ्गराजस्य दधानां गृहदीर्घिकाम् ॥ ६ ॥
कुचकुम्भस्य तारुण्यकुञ्जरस्येव शुण्डया ।
कन्दर्पखड्गलतया रोचिष्णुं रोमलेखया ॥ ७ ॥
कुचेन पद्मकोशेन कोकद्वन्द्वस्पृहाकृता ।
प्रदर्शयन्तीं प्रत्यक्षं पद्मिनीभावमात्मनः ॥ ८ ॥
अभिपूर्णश्रिया नित्यमनिमीलनहारिणा ।
आननेन वितन्वानामरतिं चन्द्रपद्मयोः ॥ ९ ॥
विद्रुमद्रोहजनुषा बिम्बीफलविडम्बिना ।
रम्येणाधररागेण रञ्जयन्तीमिव स्मरम् ॥ १० ॥
मुक्ताविद्रुमयोरैक्यपिशुनेन प्रसर्पता ।
मन्दस्मितेन मधुरमालपन्तीमिवालिभिः ॥ ११ ॥
नेत्रेण स्निग्धदीर्घेण नीलोत्पलनिभत्विषा ।
मदनस्यापि मदनं सृजन्तीमिव चेतसि ॥ १२ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कल्हारगर्भं कबरीबन्धनं हारि बिभ्रतीम् ।
बाणैः पूर्णमिवानङ्गतूणीरं शोणितारुणैः ॥ १३ ॥
मुखलावण्यनिःस्यन्दमुक्तानासाविभूषणम् ।
कपोलकान्तिविफलमणिताडङ्कभूषणम् ॥ १४ ॥
समयौवनरूपाभिः सखीभिरभितोवृताम् ।
परितां पुष्पवल्लीभिः पारिजातलतामिव ॥ १५ ॥
केयूरकं पुरोयातं कृतकौतूहलं मुहुः ।
पृच्छन्तीमात्मनः प्रेमगर्भमेव मिथःकथाम् ॥ १६॥
विद्युन्मध्यादिवोदीर्णां विद्रुमादिव निर्मिताम् ।
आविर्भूतामिवाम्भोजादरुणादिव चोत्थिताम् ॥ १७ ॥
अङ्गीकृताङ्गनारूपां शृङ्गारस्यैव देवताम् ।
ददर्श दीर्घसौभाग्यां देवीं चित्ररथात्मजाम् ॥ १८ ॥
॥ कुलकम् ॥
सर्गाभ्यासफलं धातुः साम्राज्यं शम्बरद्विषः ।
सौन्दर्यमयमेतस्या वपुर्वीक्ष्य ननन्द सः ॥ १९ ॥
चक्षुरञ्जलिना शश्वत्पिबन्कादम्बरीं पुनः ।
उवाह मोहमुत्कूलरागश्चिन्तामधत्त सः ॥ २० ॥
अहो ! सुकृतमस्माकमासीन्नाजन्मनः फलम् ।
अदृष्टपूर्वा यदियमङ्गनासृष्टिरीक्ष्यते ॥ २१ ॥
श्रियःसृष्टिकृताभ्यासो विधिर्नूनं व्यधादिमाम् ।
न चेदेतादृशं तस्य कथं जायेत कौशलम् ॥ २२ ॥
अङ्गैराश्चर्यमधुरैरस्यास्तुलयितुं मया ।
यदि यत्किञ्चिदूह्येत तदेव न तु पातकम् ॥ २३ ॥
इदमेतादृशं गात्रं यदि जायेत योषिताम् ।
शङ्के पङ्केरुहादीनां युक्ता स्यादुपमेयता ॥ २४ ॥
कर्पूरममलं सान्द्रममृतं कान्तिरैन्दवी ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मन्दो मरुन्नत: पौष्पं सर्गेऽस्याःसाधनानि किम् ॥ २५ ॥
कचिन्नभः कचिच्चन्द्रः कचिदब्जं कचित्सरः ।
अस्याःसर्गविधौ नूनमपरःस्यात्सरोजभूः ॥ २६ ॥
संमोहनी मन्मथस्य शक्तिः किंवा शरीरिणी ।
इन्द्रियाकर्षणे पुंसामियं किमधिदेवता ॥ २७ ॥
इति संचिन्तयन्नेनां वीक्षमाणः स विस्मयी ।
निमेषवत्तामसकृन्निनिन्द निजनेत्रयोः ॥ २८ ॥
सा चाप्रतिमरूपं तं दृष्ट्वा पुंसृष्टिभूषणम् ।
बभूव विस्मयवती विवशा च मनोभुवा ॥ २९ ॥
चमत्कुर्वाणयोरेवमितरेतरमीक्षितैः ।
प्रबुद्ध इव पुष्पेषुः प्रहृष्यन्नुदभूत्तयोः ॥ ३० ॥
ततः सत्वरमुत्थाय महाश्वेतां प्रणम्य सा ।
परिष्वज्य च पर्यङ्कमध्यारोपयदात्मनः ॥ ३१ ॥
कृतातिथ्यः कृती सोऽपि तत्सख्या मदलेखया ।
तस्यै स्नेहाञ्जलिं चक्रे सा च नुन्नास्य तेजसा ॥ ३२ ॥
तत्पर्यङ्कशिरोभागे स्थापितं रत्नविष्टरे ।
निर्दिशन्ती नृपसुतं महाश्वेता जगाद ताम् ॥ ३३ ॥
अयि भद्रे ! कुमारोऽयमवन्तीभर्तुरात्मजः ।
चन्द्रापीडः स्वयं नाम्ना सरलश्चन्द्रमा इव ॥ ३४ ॥
दिग्विजये हरितामत्र विचरन्मृगयां वने ।
पुण्यैः पराकृतैः प्रापन्मम पूर्वेद्युराश्रमम् ॥ २५ ॥
तव संदर्शनायात्र पार्थितः प्रणयान्मया ।
ममानुज्ञाय वचनं तवालङ्कुरुते सभाम् ॥ ३६ ॥
आराधनीयो ह्यस्माकमखिलैरप्ययं गुणैः ।
भजन्ति भवनं दिष्ट्या पुरुषाः पुनरीदृशः ॥३७॥
इत्थं वदन्त्यां सा तस्यामेकान्ताभ्युदितस्पृहा ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तथैव तस्थौ सव्रीडं साशंसेर्ष्यं च सस्मितम् ॥३८॥
अनादृत्य सखीवाचमनालप्य च सारिकाम् ।
अविज्ञाय च कर्तव्यमनाज्ञाप्य च चेटिकाः ॥ ३९ ॥
विधाय पार्श्वस्थितया बीटीं चेटिकयाऽर्पिताम् ।
प्रसारितेन हस्तेन स्पृशन्त्यपि न गृह्णती ॥ ४० ॥
मोहेनाचान्तचित्तेव मुषितेव च मूर्च्छया ।
लीढेव चानुरागेण लुण्टितेव स्मराग्निना ॥ ४१ ॥
वचसा हंसदुहितुः मानिना पूर्वमेव सा ।
ततश्च प्रादाद्धस्तेन तस्मै ताम्बूलबीटिकाम् ॥ ४२ ॥
तत्र कन्यागृहोपान्तवर्तिन्युद्यानपर्वते ।
अकरोदस्य वसतिमात्मनः केलिमन्दिरे ॥ ४३ ॥
ततश्चित्ररथं तातं मातरं मदिरामपि ।
द्रष्टुकामा ययौ तावन्महाश्वेता गृहं तयोः ॥ ४४ ॥
तावत्कादम्बरी तस्मिन्क्षणे खिन्ना वियोगतः ।
तं द्रष्टुं सौधमारोहत्समप्राप्तसखीजनैः ॥ ४५ ॥
तत्रस्था केलिशैलस्थं तमपश्यत्तलोदरी ।
स च तां शश्वदुत्कूलविस्मयोत्फुल्लया दृशा ॥ ४६ ॥
परस्परे तौ पश्यन्तौ परस्परसविस्मयौ ।
विधेर्विधानचातुर्यं समं चमत्कुर्वताम् ॥ ४७ ॥
साभिलाषैः सप्रणयैः साभिप्रायैश्च सत्रपैः ।
अथावोचतुरन्योन्यमाकारन्ताववेक्षितैः ॥ ४८ ॥
सर्वमन्तर्गतं वृत्तं तत्तद्वयाकुर्वती तयोः ।
दृष्टिर्मध्ये ययौ दूत्यं यातायातं वितन्वती ॥ ४९ ॥
तावीक्ष्यमाणावन्योन्यं तथैव लिखिताविव ।
तिष्ठन्तौ दिनशेषं तावतीतं नावगच्छताम् ॥ ५० ॥
अथावरुह्य सा सौधान्महाश्वेतानुरोधिनी ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तस्मिन्विन्यस्तचित्तैव चक्रे स्नानादिकाः क्रियाः ॥५१॥
सायं भुक्तवते तस्मै सा ततो मदलेखया।
हारं कमपि नीहारगौराकारमदापयत् ॥ ५२ ॥
कादम्बर्यास्ततः कान्तिगुणगौरवचिन्तया।
अन्यतन्त्रात्मनस्तावदहःशेषः समत्यगात् ॥ ५३ ॥
तयोः सन्नद्धपञ्चेषुव्यथयोर्बद्धरागयोः।
कथं कथंचित्सा रात्रिः कालरात्रिरिवागमत् ॥ ५४ ॥
ततः प्रातः स्वशिविरं कृच्छ्रादनुमतस्तया।
केयूरकमुखैः कैश्चिद्गन्धर्वैरन्वितो ययौ ॥ ५५ ॥
ददर्शाच्छोदतीरस्थं स गच्छन्सैन्यमात्मनः।
आगतं निजमध्वानमवेत्याश्वखुराङ्कितम् ॥ ५६ ॥
सर्वैः प्रत्युद्गतस्तत्र सवैशम्पायनादिभिः।
विनिवर्त्य च गन्धर्वान्विवेश पटमण्डपम् ॥ ॥ ५७ ॥
स पत्रलेखया पृष्टः सायं सवयसः पुरः।
आरभ्य किन्नरद्वन्द्वमखिलं वृत्तमब्रवीत् ॥ ५८ ॥
महाश्वेतामयं तावन्मनो मारार्दितं वहन्।
स वैशम्पायनस्तस्य सखाऽन्तः समतप्यत ॥ ५९ ॥
अथापरेद्युरागत्य विभुं केयूरकोऽब्रवीत्।
दिदृक्षते पुनर्देव ! भवन्तं भर्तृदारिका ॥ ६० ॥
सर्वथा तत्र भवता सा परिष्क्रियतां स्थली।
इत्याहूतो ययौ सोऽथ तुरगी पत्रलेखया ॥ ६१ ॥
तत्र कन्यागृहं प्राप्य तामनङ्गज्वरातुराम्।
शयानां पुष्पशयने ददर्श हिमवेश्मनि ॥ ६२ ॥
विधीयमानैर्बहुधा सखीभिस्तापशान्तये।
अपि शीतोपकरणैरभिवृद्धस्मरज्वराम् ॥ ६७ ॥
कल्पितोचितसत्कारस्तल्पादुत्थितया तया।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रादर्शयत्पत्रलेखां बहुमन्यत सा च ताम् ॥ ६८ ॥
ततः स्वविषयं तस्या जिज्ञासुर्मदनज्वरम् ।
स स्मितोदरमधुरं साकूतं समभाषत ॥ ६९ ॥
काऽयं ज्वरः कुरङ्गाक्षि ! मदनामोदमावहन् ।
पुष्पेषुपातितमहो ! वपुस्ताम्यति तावकम् ॥ ७० ॥
इमां वक्रोक्तिमेतस्य श्रुत्वा सा च शुचिस्मिता ।
वदनं मदलेखायाः सख्या साकूतमैक्षत ॥ ७१ ॥
सा तयोर्विदिताकूतव्यापाराथ विचक्षणा ।
उवाच मधुरोदारमुचितं तावदुत्तरम् ॥ ७२ ॥
कुमार ! विषमो ह्यस्याः कोप्यदृष्टपुराज्वरः ।
मन्ये चित्तभुवः क्षोभात्कि न जायेत केवलम् ? ॥ ७३
कलये गात्रमेतस्या कुसुमादपि कोमलम् ।
तस्याधुना कथं शंस कुसुमेषुसहिष्णुता ॥ ७४ ॥
भवानेव हि जानाति भैषज्यं तदितः परम् ।
भवतः स्पर्शमात्रेण स्वैरमस्याः सुखं भवेत् ॥ ७५ ॥
इत्याकर्ण्य विदग्धोक्तिमेतस्याः स्मिताननः ।
मदनाग्निं पुरस्कृत्य तामुपायंस्त चेतसा ॥ ७६ ॥
तत्रैवं मधुरालापैः कृत्वा क्षणमवस्थितिम् ।
कृच्छ्रात्तया कृतानुज्ञः कृती स्वं शिविरं ययौ ॥७७॥
इयं प्रातरितो यायादित्येवं याचितस्तया ।
तथेति पत्रलेखां तां चक्रे तत्सविधस्थिताम् ॥ ७८ ॥
स प्राप्तशिविरस्तावत्सन्देशं पितुरागतम् ।
ददर्श दृष्टमात्रेण तूर्णमागम्यतामिति ॥ ७९ ॥
ततश्चोरितचित्तोऽपि स चित्ररथकन्यया ।
पितुर्वृत्तमजानानः प्रास्थित प्रेमदुःखित ॥ ८० ॥
मिथः प्राह स निर्गच्छन्मेघनादं चमूपतिम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अयि ! केयूरक: प्रातरागच्छेत्पत्रलेखया ॥ ८१ ॥
ततो यात्राप्रणामादि देव्यै मम निवेदय ।
त्वं च कैश्चिद्दिनैरेहि पुरो मां पत्रलेखया ॥ ८२ ॥
इत्थमादिश्य पार्श्वस्थं वैशम्पायनमाह च ।
अद्य गच्छाम्यहं तातपादालोकनकौतुकी ॥ ८३ ॥
प्रस्थाप्य मेघनादेन पत्रलेखां पुरः पुरीम् ।
विश्रामयन्पथि बलं शनैरेहि पुरीमिति ॥ ८४ ॥
तथैवारुह्य तुरगं निवृत्य निखिलान्नृपान् ।
परिमेयपरीवारः प्राप कैश्चिद्दिनैः पुरीम् ॥ ८५ ॥
तारापीडः समाकर्ण्य प्राप्तं प्रमदवान्सुतम् ।
प्रत्युद्ययौ पुरस्कृत्य शुकनासं स्वबन्धुभिः ॥ ८६ ॥
चिराध्वन्यतया श्रान्तां पश्चाद्विश्राम्य वाहिनीम् ।
वैशम्पायनमायान्तं तात तूभ्यां न्यवेदयत् ॥ ८७ ॥
ततः सुचिरसन्दृष्टैर्बन्धुभिर्बहुमानितः ।
कादम्बर्याः स्मरन्नेव तस्थौ तत्र स्मरातुरः ॥ ८८ ॥
ततः सा मेघनादेन पत्रलेखा पुरस्कृता ।
कुमारविरहक्षामा दिवसैः कैश्चिदाययौ ॥ ८९ ॥
साथ कादम्बरीं तस्मै शशंस दृढसंज्वराम् ।
अनुक्षणमनङ्गेन प्रापितप्राणदुर्दशाम् ॥ ९० ॥
सन्दिष्टं च तया तस्याः स निशम्य समाकुलः ।
महतीमगमच्चिन्तां मदनेनाप्यनुद्यतः (?) ॥ ९१ ॥
कथञ्चिन्नीतदिवसः स पित्रोरुपलालनैः ।
कल्पवत्कलयामास तल्पसाक्षिव्यथो निशाम् ॥ ९२ ॥
स चित्ररथकन्यायाः सन्देशं चरितानि च ।
नवं नवमिवाप्राक्षीत्पत्रलेखां पदे पदे ॥ ९३ ॥
न स्नानं नोज्ज्वलं वासो नानुलेपो न भूषणम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



न निद्रा चाभवन्नस्य स्वप्नेऽपि सुखहेतवः ॥ ९४ ॥
न नृत्ये नैव गीतेषु न वीणायां न वेणुषु ।
सक्तः स केवलं तत्र बन्दीव विदधे स्थितिम् ॥ ९५ ॥
स कदाचित्ततः शिप्रासैकतोपान्त्यभूमिषु ।
विनेष्यन्विरहश्रान्तिं व्यचरत्पत्रलेखया ॥ ९६ ॥
तत्र द्वित्रैरनुगतं तुरङ्गैस्त्वरितक्रमैः ।
स केयूरकमायान्तं ददर्शाध्वकृशाकृतिम् ॥ ९७ ॥
स तेन कृतसत्कारः सदनोद्यानवर्त्तिना ।
पृष्टः करुणमाचष्ट कादम्बर्या चेष्टितम् ॥ ९८ ॥
देवाकर्णय दत्त्वैनां मेघनादकरे मया ।
निवृत्तेनात्र भवतो वृत्तं देव्यै निवेदितम् ॥ ९९ ॥
महाश्वेता तदाकर्ण्य महादुःखमुपेयुषी ।
अगाद्वैराग्यतो देवीमनापृच्छय स्वमाश्रमम् ॥ १०० ॥
देवी धिक्कष्टमित्येव दवालीढेव वल्लरी ।
निपत्य भुवि निःसंज्ञा निष्प्राणेवाभवच्चिरम् ॥ १०१ ॥
ततः सा किञ्चिदुन्मील्य तालवृन्तानिलादिभिः ।
मदलेखे ! कुमारेण कृतमन्यः करोति किम् ॥ १०२ ॥
इत्युक्त्वा जातवैवर्ण्या प्रस्थाप्य सकलाः सखीः ।
कृतावगुण्ठना तल्पे तथैवापनयद्दिनम् ॥ १०३ ॥
ततः परेद्युरारभ्य तस्या गाढतरोज्वरः ।
विशेषतः शोषयति मृणालमृदुलं वपुः ॥ १०४ ॥
न हर्म्ये न हिमागारे न तल्पे न सखीजने ।
न वापीषु न चोद्याने तापस्तस्याः प्रशाम्यति ॥१०५॥
लिखिताविव लक्ष्येते करावस्याः कपोलयोः ।
सहजेवाश्रुधारा च सन्ततं दृश्यते दृशोः ॥ १०६ ॥
करुणं रुदती कामं मूर्च्छां मुहुरुपेयुषी ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सा निशां चक्रवाकीभिः समं नयति सव्यथा ॥१०७॥
चन्द्रालोकादपि विषं चन्दनादपि पावकम् ।
बोधादपि पुनर्मूर्च्छां भूयः सा बहु मन्यते ॥ १०८ ॥
कोलाहलैः कोकिलानां दत्तकर्णज्वरादिव ।
उद्वेगं भृशमुद्यानविहारेषु बिभर्ति सा ॥ १०९ ॥
विवर्णविकलस्रस्तविवशखिन्नविग्रहा ।
मुग्धा स्मरभुजङ्गेन मुहुर्दष्टेव मुह्यति ॥ ११० ॥
चलन्ति स्थानतो गन्तुं प्राणास्तस्याः प्रतिक्षणम् ।
तान्निरुन्द्धे पुनः कण्ठे तावत्त्वद्दर्शनस्पृहा ॥ १११ ॥
त्वदीयनामग्रहणैस्त्वद्गुणानां च वर्णनैः ।
त्वत्सम्बन्धिभिरालापैः सा धत्ते तत्र जीवितम् ॥ ११२ ॥
इत्थमेनां त्वदाधीनप्राणां प्रसवसायकः ।
सन्तापयति ते रूपात्रिजितो बद्धमत्सरः ॥ ११३ ॥
इति तन्मुखतः श्रुत्वा कामं कादम्बरीकथाम् ।
तथैव तस्थौ मोहेन चित्रन्यस्त इव क्षणम् ॥ ११४ ॥
पूर्वमेव स्मरार्त्तस्य पुनस्तस्या व्यथाश्रुतिः ।
तरोर्दावाभितप्तस्य वज्रपात इवाभवत् ॥ ११५ ॥
तस्याः सन्देशवचनं तज्ज्वरस्य संवृद्धये ।
अभ्युक्षणमिवाज्येन ज्वलतो जातवेदसः ॥ ११६ ॥
ततः केयूरकं प्राह परवानस्मि पातकी ।
किं करोमि कृतं पश्य विधिना वामवृत्तिना ? ॥ ११७ ॥
दुस्त्यजं प्रेम देव्याश्च दुस्त्यजाऽऽज्ञा पितुश्च मे ।
संकटे पतितः सोऽस्मि परितापैकभाजनम् ॥ ११८ ॥
संयोज्य तत्र नौ पूर्वं पुनरेवं वियोज्य च ।
व्यथयन्विधिचण्डालो न जाने किं करिष्यति ? ॥११९॥
तथापि येन केनापि वर्त्मना मदिरेक्षणाम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रयतिष्ये पुनर्द्रष्टुं प्राणैः कण्ठगतैरपि ॥ १२० ॥
इत्थमन्योन्यवचनैर्नीता तत्र निशाऽमुना ।
अश्रावि च बलं प्रातरथो दशपुरागतम् ॥ १२१ ॥
कृताश्वासः कृती तावत्केयूरकमुवाच तम् ।
दर्शनं भविता देव्या दैवादासन्नमेव मे ॥ १२२ ॥
सपत्रलेखस्त्वं गत्वा देवीमाश्वासय द्रुतम् ।
इत्यादिश्याश्वसाहाय्यं मेघनादं व्यधात्तयोः ॥१२३॥
प्रस्थाप्य तान्प्रतिययौ प्रत्यूषे सैन्यमात्मनः ।
तत्र केनापि न ज्ञातःसुहृदंद्रष्टुमुत्सुकः ॥ १२४ ॥
स वैशम्पायनगृहं पृच्छन्प्रतिपदं जनान् ।
क्व वैशम्पायनात्रेति केनाप्याक्षिप्तवागभूत् ॥ १२५ ॥
हा क्व यात प्राप्तशोको जज्ञे ( स ) स्वसैनिकैः ।
वैशम्पायनवृत्तान्तं विचित्रं वक्तुमक्षमैः ॥ १२६ ॥
नत्वा ततो नरेन्द्रं तं पृच्छन्तं सुहृदं प्रियम् ।
शशंसुरेवं सत्रासं सशोकं च सविस्मयम् ॥ १२७ ॥
देव ! दैवान्न ते सख्युर्न किञ्चित्कुशलेतरम् ।
मा कृथा मनसि क्षोभं वदामस्तस्य चेष्टितम् ॥ १२८ ॥
स वैशम्पायनस्तत्र भवतो निर्गमात्परम् ।
सकौतुकं सरस्तीरे बभ्राम विरहार्त्तवत् ॥ १२९ ॥
तत्र नष्टमिवान्विष्यन्स्मरन्निव च विस्मृतम् ।
भ्रान्त्वा सुचिरमध्यास्त क्वचित्तीरलतागृहम् ॥ १३० ॥
स्थितं चिराय तत्रैवतव भ्रम सविस्मयाः ।
इतो गन्तव्यमुत्तिष्ठ सख्युराज्ञां विधत्स्वते ॥ १३१ ॥
इत्थमुक्तो जगादास्मान्यूयमद्यैव गच्छत ।
चलितुं नैव शक्नोमि पदं चास्मात्प्रदेशतः ॥ १३२ ॥
को हेतुरिति नो जाने सख्यैव शतधा शपे ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इतो यदा चलिष्यामि तदा मे प्राणसंशयः ॥ १३३ ॥
कस्य दुष्कर्मणः पाकात्कस्य वाथ विधेर्बलात् ।
सुहृदालोकसौख्यस्य दूरेऽस्मि धृतदुर्दशम् ॥ १३४ ॥
तद्गत्वा तातपादेभ्यः सुहृदे च सुजन्मने ।
निवेदयत निर्हेतुमीदृशी मम दुर्दशाम् ॥ १३५ ॥
इत्युक्ता वयमेतेन विधिना विह्वलाशयाः ।
सान्त्वनैस्तर्जनैश्चापि शतधा बोधयाम तम् ॥ १३६ ॥
तत्सर्वमभवत्तस्मिन् भस्मन्येव परं हुतम् ।
कृताहारश्च तत्रासीत्फलाद्यैः प्रार्थितश्चिरम् ॥ १३७ ॥
ततस्त्रिदिवसादूर्ध्वं तं दृष्ट्वा तादृशस्थितिम् ।
संस्थाप्य तस्य रक्षायै तत्सैन्यं वयमागताः ॥ १३८ ॥
इत्याकर्ण्य सुहृद्वृत्तमसंभाव्यं कथास्वपि ।
विभुर्बभूव प्रथमं पात्रं प्रेमशोकयोः ॥ १३९ ॥
सुहृदः शोकजनकमपि वृत्तान्तमद्भुतम् ।
मेने कादम्बरीप्राप्तिकारणं पुनरात्मनः ॥ १४० ॥
ततो निवृत्य स ययौ शुकनासस्य मन्दिरम् ।
समाश्वासयता राज्ञा पत्न्या चापि परिष्कृतम् ॥१४१॥
हा वत्स ! हन्त ! केयमकालेन वनवासिता ।
पितरौ तौ परित्यज्य किं तपोभिः कृतैः फलम् ? ॥१४२॥
इत्याक्रन्दितमाकर्ण्य तन्मातुः शोकविह्वलः ।
ददर्श सचिवं तत्र वर्त्तमानं महीभुजा ॥ १४३ ॥
ततस्तं प्रणतं दृष्ट्वा तनूजं धरणीपतिः ।
जातमन्युर्जगादैवं शोकावेगसमाकुलः ॥ १४४ ॥
वत्स ! बालो वनं प्राप्तो वैशम्पायन एष यत् ।
तवैव दोषस्तत्मन्ये कथ्यतां तत्र कारणम् ॥ १४५ ॥
इति तां वाचमाक्षिप्य शुकनासस्तमब्रवीत् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कुमारोपरि कौलीनमारोपितममर्षयत् ॥ १४६ ॥
देव ! त्वत्तोऽपि दयया कुमारो ह्यतिरिच्यते ।
तस्मिन्या प्रीतिरेतस्य सा न देव्यां न च त्वयि ॥१४७॥
सर्वानवद्यचारित्रः कृती कृतयुगोचितः ।
मैवं वाच्योऽत्र भवता दोषस्तस्यैव दुर्मतेः ॥ १४८ ॥
पुंसः पुराकृतैः पापकर्मभिः कामचारिणः ।
शत्रवः पुत्रतामेत्य दुःखयन्ति दुरीहिताः ॥ १४९ ॥
चन्द्रापीडं समाक्षिप्य स्तनं प्रस्नुतमात्मनः ।
अपाययत देवीयं अमुना तच्च विस्मृतम् ॥ १५० ॥
किं कृतो हीनकक्षायां कुमारादपि च त्वया ।
किं नार्चयन्ति भूपालाः कृतप्रणतयो भुवि ? ॥ १५१ ॥
किं नैश्वर्यं किं न राज्यं किमूनं त्वत्प्रसादतः ।
मन्दभाग्यो वने वासं सर्वं संत्यज्य वाञ्छति ॥ १५२ ॥
किमन्यत्केलिसुहृदं स्वामिनं च सुखावहम् ।
स चन्द्रापीडमुन्मुच्य कृतघ्नः किं न जायते ? ॥ १५३ ॥
य ईदृशगुणः पापः पित्रोः शोकानलेन्धनम् ।
शुकवत्पाठितः सोऽयं शुकजातौ पतिष्यति ॥ १५४ ॥
इति शोकाकुलस्यास्य वाचं श्रुत्वा महीपतिः ।
तमाह शापो न शिशौ कार्यः कोपेऽपि च त्वया ॥१५५॥
सर्वथाऽत्र तमानीय तस्य विज्ञाय निश्चयम् ।
अनुरूपं विधास्यामो मनः शोकाय मा कृथाः ॥ १५६ ॥
तस्मिन्नेवं वदत्येव कुमारो रचिताञ्जलिः ।
असहिष्णुरमुं प्राह दोषं विन्यस्तमात्मनि ॥ १५७ ॥
आनेष्याम्यहमेवैनमनुज्ञा तात ! दीयताम् ।
न चेन्नराः करिष्यन्ति मय्येवापयशो महत् ॥ १५८ ॥
इति ब्रुवाणं नृपतिरेतदानयनोत्सुकः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तमन्वमंस्त निर्गन्तुं सचिवन्यस्तजीवितः ॥ १५९ ॥
विधिना मन्त्रिपुत्रस्य वैराग्यजनुषाऽमुना ।
कादम्बरीं करानीतामात्मनस्ताममन्यत ॥ १६० ॥
अपरेद्युरथ प्रातः ससैन्यः शासनात्पितुः ।
निर्ययौ निर्भरानन्दपूर्णेन मनसा पुरात् ॥ १६१ ॥
मनसानुभवन्नेव मदनोन्मेषशालिना ।
कादम्बरीं दिनैः कैश्चिन्महद्वर्त्मात्यलङ्घयत् ॥ १६२ ॥
ददर्श सख्युर्वृत्तज्ञं पथि तं पत्रलेखया ।
त्रिभिरध्वभिरच्छोदान्मेघनादं निवर्त्तितम् ॥ १६३ ॥
ततो गच्छत एवास्य सकलाशानिरोधकः ।
कालदूत इव प्राप कालस्तनितहुंक्रियः ॥ १६४ ॥
तं हनिष्यन्नभःसर्पः स पुरोवातपूत्क्रियः ।
विद्युन्मणीनभ्रफणानुदस्यन्भृशमुज्जहौ (?) ॥ १६५ ॥
नृत्तलोलैः शिखिकुलर्नीपैर्निर्निद्रकोरकः ।
सान्द्राभिश्चाम्बुधाराभिश्चकम्पे तस्य मानसम् ॥१६८॥
शिथिलरथनिबन्धं शीर्णपर्याणवाहम्
प्रतिदिनमपि पश्चाल्लम्बिपादातमेषः ।
अविरचितनिवासः क्वाप्यनेहस्यमुष्मिन्
अथ बलमवकर्षन्प्रापदच्छोदतीरम् ॥ १६९ ॥

## इतिश्रीमण्डनकादम्बरीदर्पणे तृतीयः परिच्छेदः

ततस्तत्प्रावृषा वीतसर्वशोभं सरोवरम् ।
शोकाक्रान्तमिवालक्ष्य शोच्यावस्थमलक्षत ॥ १ ॥
तं द्रष्टुकामः प्रथमं सखायं सरसस्तटे ।
हयमारुह्य सौत्सुक्यमन्वियेष समन्ततः ॥ २ ॥
तत्र कुत्राप्यनालोक्य पर्यट्य परितः श्रमी ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



महाश्वेतामुखादेनं श्रोतुं प्राप तदाश्रमम् ॥ ३ ॥
तत्रापश्यत्तरलिकाधारितां दुःखवारिधौ ।
मज्जन्तीं तां महाश्वेतां प्रपच्छ च पराकुलः ॥ ४ ॥
सा समाश्वसिता तेन पृष्टा च प्रेमशालिना ।
रुदती विरसं प्राह बाष्पगर्भितया गिरा ॥ ५ ॥
कथं वा श्रावयिष्यामि कल्याणप्रकृतेस्तव ।
कृतं मया कितवया कुमार ! कुशलेतरम् ॥ ६ ॥
पुण्डरीकेन यत्पूर्वं महाभाग ! ममाभवत् ।
तत्तादृशमिदं चान्यदकस्मादागतं मम ॥ ७ ॥
श्रुत्वा केयूरकमुखात्त्वां पितुः प्राप्तमन्तिकम् ।
कादम्बर्यपतद्भूमौ मुमूर्च्छुरिव मूर्च्छिता ॥ ८ ॥
ततस्तव प्रयाणेन तस्यास्तापनव्याकुला ।
तामनापृच्छय वैराग्यादहमाश्रममागमम् ॥ ९ ॥
अथालक्षि मया कश्चिदेकाकी ब्राह्मणो युवा ।
आयुष्मत्सदृशाकारो भूताविष्ट इव भ्रमन् ॥ १० ॥
स ज्ञातपूर्व इव मां समुपेत्य शनैर्युवा ।
कुर्वन्कूलंकषं प्रेम कामी मामिदमब्रवीत् ॥ ११ ॥
क्व तपः कठिनं बाले ! क्व वा ते कोमला तनुः ।
क्व वा ग्रीष्मातपो घोरः क्व वा चान्द्री कला नवा ?॥१२॥
तपसा तापयसि चेन्मृणालमृदुलं वपुः ।
देयं निवापसलिलं देवायापि मनोभुवे ॥ १३ ॥
अथवा मोहनैरस्त्रैरवधुर्यैक्षवं धनुः ।
तपोवने तवैवास्तां वल्कली मकरध्वजः ॥ १४ ॥
ततोऽनुरूपं रमणमङ्गीकृत्य त्वमञ्जसा ।
सफलीकुरु तारुण्यं भूरिलावण्यभूषणम् ॥ १५ ॥
वदन्तमेवं तरुणं मदनार्त्तमहं रुषा ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दृढव्रता पुण्डरीके दूरं सख्या न्यवारयम् ॥ १६ ॥
तस्मिन्नेव दिने रात्रावुदिते रजनीकरे ।
स्मरन्त्याः पुण्डरीकस्य निद्राऽभून्नेत्रयोर्न मे ॥ १७ ॥
तावत्स तरुणो गाढं तापितश्चित्तजन्मना ।
समेत्य सविधे तस्थावभूच्च हृदि मे भयम् ॥ १८ ॥
कस्त्वं किमत्र ते कार्यमिति पृष्टो भिया मया ।
जातकम्पो जगादैवं कामार्त्तः कलिताञ्जलिः ॥ १९ ॥
क्वचित्कामः क्वचित्सोमः क्वचिन्मन्दानिलश्च माम् ।
तापयन्ति चकोराक्षि ! रक्ष मां शरणागतम् ॥ २० ॥
इत्युल्लङ्घितमर्यादामुक्तिं तस्यावकर्ण्य ताम् ।
आत्मानमपि नाजानं ज्वलन्तीव रुषा क्षणम् ॥ २१ ॥
तत इन्दोरभिमुखा पुण्डरीकं विभाव्य तम् ।
आचम्य जलमादाय कामण्डलकमब्रवम् ॥ २२ ॥
यद्यहं न प्रमाद्यामि पुण्डरीकमनुव्रता ।
भवेत्तारापते ! सत्या भगवन्मम भारती ॥ २३ ॥
शुकस्येव श्रुतं यस्य कामाचाराय कल्पते ।
सोऽयं शुभेतराचारः शुक एव भवेदिति ॥ २४ ॥
ततः स मद्गिरा किंवा स्वदुष्कर्मफलेन वा ।
पपात पादयोर्वज्रघातेनेव पराहतः ॥ २५ ॥
मृतस्तदैव विधिना विभाते विरहार्त्तया ।
आयुष्मन्मित्रमाख्याहि शोचन्त्या तस्य सेनया ॥२६॥
इत्थमायुष्मतो मित्रवियोगप्रतिपादिनी ।
तदा प्रभृति शोकाब्धौ तरामि हितजीविता ॥ २७ ॥
श्रुत्वेति वृत्त सुहृदः स्वभावविरसं शुचा ।
पफाल हृदयं तस्य पद्मकोशमिवोषसा ॥ २८ ॥
तात्र त्पतन्तमालिङ्ग्य धारयन्ती तमाकुला ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



हा कष्टमिति हंसस्य पर्यदीदिवदात्मजा ॥ २९ ॥
दृष्ट्वा तस्य दशां कष्टां सर्वे तदनुयायिनः ।
चक्रन्दुर्दारुणं शोकात्पुत्रा इव पितुः क्षये ॥ ३० ॥
हा हताः स्मो वयं सर्वे हा विधे ! किं कृतं त्वया ? ।
अनाचारस्तवैवायमाः पापे दुष्टतापसि ! ॥ ३१ ॥
हा नाथ ! किमिदं वृद्धौ विहाय पितराविमौ ।
अनाथानपि नः स त्वमधुना क्व नु गच्छसि ॥ ३२ ॥
क्व ते प्रसन्नमुखता क्व ते मधुरभाषिता ।
क्व नीतिः क्व नु पाण्डित्यं क्व प्रतापः क्व वा यशः ! ॥३३॥
क्षितिरेषा भगवती किं नु वैधव्यभाजनम् ।
क्व वा गतिर्महालक्ष्म्याः कमालम्बेत भारती ॥ ३४ ॥
इत्थं विलप्य बहुधा तत्र सर्वे चमूचराः ।
स्वैः स्वैरेवायुधैरासन्स्वयं सह मुमूर्षवः ॥ ३५ ॥
तस्मिन्नवसरे तत्र देवी चित्ररथात्मजा ।
पत्रलेखामुखाच्छ्रुत्वा पत्युरागमनं ध्रुवम् ॥ ३६ ॥
तां पत्रलेखामालम्ब्य सख्या च मदलेखया ।
समागमन्महाश्वेतासंदर्शनकृतच्छला ॥ ३७ ॥
तदवस्थं तमालोक्य तत्र सा पतिता भुवि ।
मूर्च्छामये मुहुर्ध्वान्ते ममज्ज मनसोज्झिता ॥ ३८ ॥
ततः कादम्बरी वीतमोहा स्मेरमुखाम्बुजा ।
अनुयानपरा तस्थावनुन्मुक्ताश्रुलोचना ॥ ३९ ॥
दृष्ट्वा मनोरथपतिं दैवाप्तं माप्तदुर्दशम् ।
द्रवत्स्वेदसुधार्द्रेण परं पस्पर्श पाणिना ॥ ४० ॥
तत्करामृतसम्पर्कसञ्जातपुलकाङ्कुरात् ।
तस्याङ्गात्सहसा ज्योतिरुदभून्महदुज्ज्वलम् ॥ ४१ ॥
दिवि तद्ददृशे देहिविकीर्णस्मितचन्द्रिकम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कादम्बरीदत्तदृष्टि शशंस च तदग्रजाम् ॥ ४२ ॥
वत्से ! किं नु महाश्वेते ! भवती वेत्त्यमुं जनम् ।
पूर्वमाश्वासयंस्त्वां यः पौण्डरीकं हरन्वपुः ॥ ४३ ॥
ममाङ्गमविनाशीदं वह्निसान्मा विधीयताम् ।
कादम्बरीकरस्पर्शात्काममस्त्विदमक्षतम् ॥ ४४ ॥
कादम्बर्या ममाप्रत्युज्जीवं तत्प्रतिपाल्यताम् ।
भविता पुण्डरीकेण तवाप्युपगमश्चिरात् ॥ ४५ ॥
इत्युक्त्वाऽन्तरिते तस्मिन्सर्वे विस्मयिनोऽभवन् ।
मेने कादम्बरी विघ्नं प्रियानुगमनं प्रति ॥ ४६ ॥
ततः सा पत्रलेखा तु किमितः परमावयोः ।
इतीन्द्रायुधमाकृष्य पपाताच्छोदपाथसि ॥ ४७ ॥
सरसस्तावदुदभूत्सलिलार्द्रजटाधरः ।
वल्कली मधुरस्मेरवदनः स कपिञ्जलः ॥ ४८ ॥
तमालोक्य महाश्वेता सहर्षं जातविस्मया ।
कपिञ्जलोऽयमुदकात्कथमागतवानहो ! ॥ ४९ ॥
इति सत्वरमुत्थाय प्रत्युद्गम्य प्रणम्य ताम् ।
कादम्बर्याः पुरः प्राह कपिञ्जलमुदञ्जलिः ॥ ५० ॥
महाभाग ! वदाशेषमधुना ज्ञायते मया ।
क्व नाथः पुण्डरीको मे को वा दिव्याकृतिः पुमान् ? ।
तमनुद्रुत्य यातेन किमकारि त्वया ततः ।
इति पृष्टस्तया सर्वमाचष्ट स्पष्टमादितः ॥ ५२ ॥
शृणु भद्रे ! ननु तदा सख्युर्गात्रापहारिणम् ।
तमनुद्रुत्य पुरुषं दिव्यं दिवमुपागमम् ॥ ५३ ॥
स पुनस्तारकाचक्रं समतिक्रम्य सत्वरम् ।
चान्द्रं लोकमगात्सान्द्रसुधासुरभिदिङ्मुखम् ॥ ५४ ॥
महोदयायां सदसि तत्रात्यद्भुतसम्पदि ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तं निक्षिप्य सुधागर्भे पर्यङ्के मामभाषत ॥ ५५ ॥
शृणु भद्राधुना वृत्तं सुहृदस्ते कपिञ्जलः ।
अस्य लोकस्य नाथं मामवेहि हरभूषणम् ॥ ५६ ॥
सुहृत्सोऽयं तवासन्नमरणो मदनार्दितः ।
त्वयि क्वापि गते कोपादशपन्मामनागसम् ॥ ५७ ॥
यदेवं विरहक्लिन्नं मां मारयसि चन्द्रमः ! ।
तवापि च दशा सेयं भूयाज्जन्मनि जन्मनि ॥ ५८ ॥
श्रुत्वेति सोऽहं कुपितः शापं दत्तमकारणम् ।
तमेव तस्मै व्यतरं शापं मह्यमदायि यः ॥ ५९ ॥
जन्मनीति द्विरुक्तं यच्छापं तेन प्रयच्छता ।
तस्माद्द्वयोर्धरालोके भवितैव द्विरुद्भवः ॥ ६० ॥
मन्मयूखभवा गौरी महाश्वेता तदात्मजा ।
तदाश्वास्य मुमूर्षुं तां वपुर्जामातुरानयम् ॥ ६१ ॥
इतो जन्मद्वयं नीत्वा यावद्देष्यति तामयम् ।
अविनाशि भवेदङ्गं तावदस्यामृतद्रवैः ॥ ६२ ॥
तदद्य भारते वर्षे तारापीडो धरापतिः ।
तपस्यति तनूजार्थी तस्य यास्यामि पुत्रताम् ॥ ६३ ॥
सुहृत्ये शुकनासस्य सुजातयशसो भुवि ।
तन्मन्त्रिणस्तनूजत्वं प्राप्य मे भविता सखा ॥ ६४ ॥
त्वमेतत्सुहृदो वृत्तं तत्पित्रे श्वेतकेतवे ।
विज्ञाप्य विधिवत्तेन कर्मायुष्यं च कारय ॥ ६५ ॥
इत्यादिष्टः शशाङ्केन सुहृद्विरहशून्यधीः ।
व्रजन्कञ्चित्तपस्यन्तमत्यलङ्घ्यमम्बरे ॥ ६६ ॥
स रुष्टो मां शशापाथ दुर्विनीतस्तुरङ्गवत् ।
मामुल्लङ्घितवान्येन ततस्त्वं तुरगो भव ॥ ६७ ॥
इति श्रुत्वा मयि कृतप्रणतौ प्राह शान्तधीः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तस्यान्तस्तत्र शापान्तो भवेद्यं किल वक्ष्यसि ॥ ६८ ॥
इन्दुरुज्जयिनीभर्तुरुपयास्यति पुत्रताम् ।
तस्य याहि तुरङ्गत्वं सख्या तत्र चरिष्यतः ॥ ६९ ॥
तथेति शिरसा तस्य वहन्नाज्ञां महामुनेः ।
मत्वा शापममुं लाभमम्भोधेरपतं जले ॥ ७० ॥
उपेत्याथ तुरङ्गत्वमुदभूवं पयोदधेः ।
कश्चिद् गृहीत्वा मां प्रादात्तारापीडाय भूपतिः ॥ ७१ ॥
मामिन्द्रायुधनामानं मारुतोल्लङ्घ्यरंहसम् ।
तारापीडस्तनूजाय चन्द्रापीडाय दत्तवान् ॥ ७२ ॥
चन्द्रापीडः शशी तस्य स वैशम्पायनः सखा ।
शप्तस्त्वया शुकतया पुण्डरीकः प्रियो हि ते ॥ ७३ ॥
तदिदानीमहं तस्य चरितं श्वेतकेतवे ।
मुक्तशापो निगदितुं यास्यामीत्यगमद्दिवम् ॥ ७४ ॥
हा नाथ ! हा त्वदापत्तिकरी जन्मान्तरेऽपि च ।
जीवामि हतजीवेयं इत्यार्त्ता विललाप सा ॥ ७५ ॥
कादम्बरी च कान्तस्य तस्य चन्द्रात्मनो वपुः ।
तच्छासनेन रक्षन्ती पितुः प्राप न मन्दिरम् ॥ ७६ ॥
ततस्त्वरितकं नाम दूतं चित्ररथात्मजा ।
प्राहिणोत्पुत्रवृत्तान्तं तारापीडाय वेदितुम् ॥ ७७ ॥
तच्छ्रुत्वा सुतयोर्वृत्तं सामात्यो नृपतिः शुचा ।
संत्यक्तराज्यः सविधं पुत्रस्याप प्रियासखः ॥ ७८ ॥
तमक्षताकृतिं पुनः पुत्रं दृष्ट्वा प्रजापतिः ।
विधूतोज्जीवनाशङ्को मेने जीवन्तमेव तम् ॥ ७९ ॥
निरीक्ष्य च स्नुषां तत्र नृपश्चित्ररथात्मजाम् ।
तद्रूपगुणसौभाग्यविस्मितो बह्वमन्यत ॥ ८० ॥
तपश्चरन्तं तं तत्र पुत्रस्योज्जीवनावधि ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भक्त्या पर्यचरत्सा च श्वसुरं स्वयमन्वहम् ॥ ८१ ॥
चन्द्रापीडाह्वयश्चन्द्रः स पुनः शूद्रकाह्वयः ।
जन्मद्वितीयं जायायां विदधे विदिशापतेः ॥ ८२ ॥
चन्द्रापीडस्य या विद्या यद्रूपं ये च ते गुणाः ।
तथैव तस्मिन्नभवन्शूद्रकेऽपि शुभावहाः ॥ ८३ ॥
पितुरन्त शनैः प्राप्तराज्योऽयं प्रौढयौवनः ।
सत्सु सत्स्वपि दारेषु विमुखो विषयेष्वभूत् ॥ ८४ ॥
स विश्वविजयी सर्वनरेन्द्रार्चितपादुकः ।
आसेतोरा च कैलासादशेषामशिषद्भुवम् ॥ ८५ ॥
शापेन हंसदुहितुः ततो विन्ध्यवनान्तरे ।
शुकनाससुतः प्राप शुकतां शाल्मलिद्रुमे ॥ ८६ ॥
जननी जातमात्रेऽस्य विधिनाऽऽप परासुताम् ।
पिता स्वपक्षे निक्षिप्य मातेवावर्द्धयच्च तम् ॥ ८७ ॥
ततो मृगयुरारुह्य तं कश्चिच्छाल्मलिद्रुमम् ।
अपातयदधस्तस्मादखिलाञ्शुकपोतकान् ॥ ८८ ॥
पक्षगर्भात्पितुरधः पतितोऽयं शुकार्भकः ।
अभूदगोचरस्तस्य गुप्तः पत्रान्तरे क्वचित् ॥ ८९ ॥
गते तस्मिन्गृहीत्वाथ शुकानन्यान्स्वगोचरान् ।
निर्गत्य विलुण्ठना स तृषितो दीर्घिकासुतः (?)॥ ९०
आतपार्त्तमवेक्ष्यैनमजातगरुदञ्चलम् ।
जहार जातकारुण्यो हारीतः स्नातुमागतः ॥ ९१ ॥
जाबालिर्जनकस्तस्य तेन नीतं दयालुना ।
शुकार्भकममुं दृष्ट्वा हसन्किञ्चिदवोचत ॥ ९२ ॥
शुक एष स्वयं भुङ्क्ते स्वस्य दुष्कर्मणः फलम् ।
विवेकहीनो विपदां परं पात्रं भवेदिति ॥ ९३ ॥
ततः स पृष्टो मुनिभिस्तं पुरस्कृत्य विस्मितैः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जन्मद्वितयजं वृत्तं तस्याह सकलं मुनिः ॥ ९४ ॥
शुको जाबालिकथितजन्मद्वितयचेष्टितः ।
सस्मार सहसा हंसदुहितुर्दुःसहस्मरः ॥ ९५ ॥
सखा कपिञ्जलः क्वाद्य चन्द्रापीडः क्व वा सखा ।
इति संचिन्तयन्नेव तस्थौ तत्रैव तद्दिनम् ॥ ९६ ॥
अपरेद्युरथागत्य तमाश्वास्य कपिञ्जलः ॥
त्वमाशापान्तमत्रैव तिष्ठेन्युक्त्वा ययौ दिवम् ॥९७॥
चन्द्रापीडं सखायं च महाश्वेतां च वल्लभाम् ।
स्मरन्नेवावसत्तत्र यावत्पक्षसमुद्गमम् ॥ ९८ ॥
अथ हंससुतां द्रष्टुं प्रस्थितः प्राप्तपक्षतिः ।
जनङ्गमेन केनापि जगृहे पथि खेदितः ॥ ९९ ॥
स प्राप्य सान्द्रपिशितचिक्कणं क्वापि पक्वणम् ।
शुकं तं स्वामिकन्यायै व्यतरद्विहलाशयम् ॥ १०० ॥
अकरोदमुमादाय सा च चण्डाल कन्यका ।
पञ्जरेऽस्थिमये क्वापि रचितघ्राणसंज्वरे ॥ १०१ ॥
अपरेद्युरथालक्षि पक्वणं पुरमद्भुतम् ।
तदेवसौरभोद्गारि पञ्जरं मणिपिञ्जरम् ॥ १०२ ॥
ततः शुकं तमादाय प्रातश्चण्डालकन्यका ।
विदिशाधिपतेः प्राप शूद्रकस्य सभां शुभाम् ॥१०३॥
संचरन्तीमिव लतां स्तनस्तबकशालिनीम् ।
प्रत्युज्जगाम तां तत्र नृपनेत्रालिमालिका ॥ १०४ ॥
मणिश्यामां लसत्पाणिशुकां शोणस्तनांशुकाम् ।
जनङ्गमीसमामेतां मतङ्गकुलदेवताम् ॥ १०५ ॥
स्वामिन्नेष शुको वेत्ति स्वजन्मान्तरचेष्टितम् ।
इति पञ्जरमुद्घाट्य तस्मै साथ ददौ शुकम् ॥ १०६ ॥
स ततः पृच्छते तस्मै शुको जाबालितः श्रुतम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शशंस सकलं वृत्तं चन्द्रापीडस्य चात्मनः ॥ १०७ ॥
जगाद जन्मान्तरजवृत्तश्रवणविस्मितम् ।
किञ्चित्कृतस्मिता साथ चण्डालतनया नृपम् ॥१०८॥
चन्द्रापीडाभिधानो यश्चन्द्रः कादम्बरीसखः ।
अवगच्छ तमात्मानमधुना शूद्रकाह्वयम् ॥ १०९ ॥
शापान्तसमयः सोऽयं तवास्य च समागतः ।
जानीहि जननीमस्य महीवल्लभ ! मां श्रियम् ॥११०॥
जातिस्मरत्वं जाबालेरविनीतोऽयमागतः ।
पुनर्द्रष्टुं महाश्वेतां प्रस्थितः प्रणयातुरः ॥ १११ ॥
आगताऽहममुं रोद्धुमादिष्टा श्वेतकेतुना ।
न चेदितोपि नीचत्वमेव यास्यति कामुकः ॥११२॥
आक्रान्तिपरिहारार्थं जातिर्जानङ्क्ष्मी च मे ।
तव ज्ञापयितुं नीतः सोऽयं जन्मान्तरस्थितिम् ॥११३॥
इत्थमुक्त्वा नृपं लक्ष्मीरुत्पपात स्वरुच्चकैः ।
विलुम्पन्ती दिशो विद्युत्पिङ्गेन स्वाङ्गरोचिषा ॥११४॥
कादम्बरीं पुरस्कृत्य कर्णान्ताकृष्टकार्मुकः ।
अतुदन्मदनस्तावदमुं संमोहनैः शरैः ॥ ११५ ॥
शुकं च शूद्रकं चाथ प्राणान्तं प्रहरिष्यतः ।
सहायो मदनस्यासीत्समयः सौरभोत्तरः ॥ ११६ ॥
ततः शरीरमुन्मुच्य शूद्रकस्य सुधाकरः
आपदच्छोदतीरस्थं चन्द्रापीडस्य तद्वपुः ॥११७॥
तत्र कादम्बरी तस्मिन्समये काममोहिता ।
परिरेभे वपुस्तस्य परासोः पत्युरादरात् ॥ ११८ ॥
स तावदधुना तन्वि ! स्वैराश्लेषसुखेन ते ।
उज्जीवितोऽस्म्यहमिति वदन्नभवदुत्थितः ॥ ११९ ॥
सुहृत्तस्यापि शुकतां विहाय पितृगौरवात् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अविशच्चन्द्रलोकस्थमात्मनो बिम्बमादिमम् ॥१२०॥
हारं स हंसदुहितुर्वहन्कण्ठे मनोहरम् ।
कपिञ्जलकरालम्बी वसुधामवतीर्णवान् ॥ १२१ ॥
तारापीडः समाश्लिष्य पुत्रं प्रत्याप्तजीवितम् ।
आननन्द चिरान्नष्टमन्धो नेत्रमिवागतम् ॥ १२२ ॥
शुकनासस्य या प्रीतिरपूर्वा पूर्वमात्मजे ।
पुण्डरीकात्मनि पुनस्ततः शतगुणाऽभवत् ॥ १२३ ॥
श्रुत्वा जामातरौ मुक्तशापावुज्जीवितौ पुनः ।
हंसचित्ररथौ हेमकूटं निन्यतुरागतौ ॥ १२४ ॥
सुतयोरुभयोस्तत्र स्वैश्वर्योचितमेव तौ ।
अनुकूले दिने ताभ्यामथाग्राहयतां करौ ॥ १२५ ॥
जातप्रहर्षो जामात्रे राज्यं चित्ररथो ददौ ।
हंसोऽपि यौवराज्यं स्वं पुण्डरीके न्यवीविशत् ॥ १२६ ॥
इत्थं कादम्बरी दैवात्प्रत्यापन्नमनोरथा ।
चन्द्रं साश्रुमुखी प्राह सानुतापार्त्तमानसा ॥ १२७ ॥
सर्वे समागता यूयं नाथ ! जन्मद्वयागताः ।
पत्रलेखां न पश्यामि सखीं प्रेमाणसंमिताम् (?) ॥१२८॥
इति ब्रुवाणामिन्दुस्तामवोचदमलस्मितः ।
प्रिये ! सा रोहिणी प्राप्ता महीमद्विरहाक्षमा ॥ १२९ ॥
विमुक्तदेहा चाच्छोदे विपदाजनि मे पुनः ।
अनुवर्त्तितुमैच्छन्मामन्यस्मिन्नपि जन्मनि ॥ १३० ॥
मानुषं वपुरास्थाय भूयः किंवा प्रयोजनम् ।
त्वमत्रास्स्वेति सान्त्वेन निर्गतां तां न्यवारयम् ॥१३१॥
सोऽहं सुधामये तत्र शुभे वपुषि सत्यपि ।
त्वत्कृते प्राप्तवानस्मि वपुरेतच्च मानुषम् ॥ १३२ ॥
इत्थं सा भर्त्तुराकर्ण्य वाचं मधुरपेशलाम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विस्मयाकृष्टहृदया बहुमन्यत रोहिणीम् ॥ १३३ ॥
तारापीडं तपस्यन्तं सावरोधं समन्त्रिणम् ।
प्रत्यहं चार्चयच्चन्द्रः पुण्डरीकपुरःसरः ॥ १३४ ॥
कदाचिदुज्जयिन्यां च कदाचिच्चान्तिके पितुः ।
कदाचिच्चन्द्रलोके च कदाचिच्च त्रिविष्टपे ॥ १३५ ॥
कदाचिद्धेमकूटे च कादम्बर्या स कौतुकी ।
सह दारेण सह सख्या च व्यहार्षीद्विधुरन्वहम् ॥१३६॥
इत्थं पूर्णमनोरथः स वयसा निर्मुक्तशापःशशी
पित्रोः प्रेमपुरःसरं विरचयन्नभ्यर्चनामन्वहम् ।
कादम्बर्यनुकूलकामललितस्वेच्छोपभोगक्रमो
दीव्यन्नेव दिवि क्षितावपि दधावानन्दकोटिं पराम् ॥१३७॥

इति श्रीमन्मण्डनमन्त्रीन्द्रविरचिते मण्डनकादम्बरीदर्पणे
चतुर्थः परिच्छेदः

। समाप्तोऽयंमण्डनकादम्बरीदर्पणः ।

कादम्बरीकथासूक्तिमञ्जरीमण्डनोदिता ।
कर्णावतंसपदवीं कवीनामवगाहताम् ॥ ॥ १ ॥

लिखितं विनायकदासकायस्थेन । संवत. १५०४ वर्षे कार्तिक-
शुक्लअष्टमीमङ्गलदिने ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अर्हम्

श्रीहेमचन्द्राचार्यग्रन्थावली. ९.

मण्डनग्रन्थाङ्कः २.

# श्रीचम्पूमण्डनम्

१.

कमलयुगलबुद्ध्या सेवकानां मधूचाम्
सुरसमधुरवाचां दत्तमानुषजन्म ।
परिजनहृततृष्णे ! नौमि कृष्णेऽद्यमात-
स्तव चरणसरोजद्वन्द्वमानन्दहेतुम् ॥ १ ॥

कारुण्यपूर्णकलशा इव शारदेन्दु-
कुन्दप्रसूनधवलाः कमलायताक्षाः ।
विक्षालिताञ्जनगिरीन्द्रसमानमुद्र-
पापा जयन्ति जगतीह जिना जलाच्छाः ॥ २ ॥

कारुण्यपीयुषरसप्रणाली दुर्वारसंसारपयोधिपाली ।
या जीवसंजीवनरम्यशीला दृष्टिर्जिनानां जयतीन्दुलीला ॥३॥

निर्मदान्शर्मदान्वन्दे सन्तः सन्तापहारिणः ।
जगज्जनितशृङ्गारान्मुक्ताहारानिवोज्ज्वलान ॥ ४ ॥

सदाचाररतां चारुरससन्दोहदायिनीम् ।
मन्दा निन्दन्ति तान्वन्दे ये गां गङ्गामिवोज्ज्वलाम् ॥ ५ ॥

प्रायश्चित्तातिविमुखा गोःपदच्छेदकारिणः ।
अशुद्धरक्तरसनाः सन्ति पुण्यजनाः क्वचित् ॥ ६ ॥

अस्ति विस्तीर्णकीर्णगुणगणकिरणपटलपटलितनिखिल-धरणिखण्डप्रचण्डतरप्रकाशाडम्बरितम्, अम्बरद्योतिमार्त्तण्ड

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मण्डलायमानम्, यशःप्रकाशनिर्मलितदिक्कुलाचलवलयम्, निष्कलङ्ककुलतिलकम्, श्रीमालकुलम्। तत्र निबिडदैन्यनिगडखण्डनो बाहडनामा सङ्घपतिरप्रतिम आसीत्। तस्यात्मजन्मा सन्मानदः समस्तवस्तुनिवेशायतमालवदेशाचलमण्डपमण्डनायमानो विनोदमोदमानो जलद इवाखण्डताण्डवितसकलकलाधरशिखण्डमण्डलीको मण्डननामा सङ्घपतिः॥
अपि च-

सोऽहं वच्मि कथां नेमेः सुवर्णां गुणधारिणीम्।
मालावत्कोमलग्रन्थां सद्यः सन्तापहारिणीम्॥ १॥

कोमला पदविन्याससरसालङ्कारशालिनी।
करोति कस्य नाह्लादं चम्पूश्च प्रमदा सदा॥ २॥

चम्पूमण्डनमानन्दपीयूषरसपूरितम्।
करोति कस्य नो चित्तचकोरं चन्द्रिकोपमम्॥ ३॥

नित्यं पूर्वकवीन्द्रकाव्यसरसीहंसीकृतं यैः पुरा
तेषां मद्वचसो विलासरसिकं चित्तं कथं जायते?।
श्रीमन्नेमिकथाकथानकमिति श्रोष्यन्ति पुण्याशयाः
काव्यं मे सुधियोऽथवा परगुणं स्फारं विधातुं बुधाः॥४॥

सतां कृपावलोकेन काव्यं सौभाग्यभाग् भवेत्।
चन्दनान्तर्गतं दारु चारुतामेति चान्दनीम्॥ ५॥

जयति त्रिजयवर्द्धनमिति नगरं गरिमाणमुद्वहत्पूर्वम्।
यत्र विचित्रविलोकी लोकः शोकं जहात्यक्षणाम्॥ ६॥

यत्र जनपदो निर्जरजनसन्तानसुधर्मालङ्कृतः स्वर्गसुखमनुभवति। यत्र नित्यं सुपर्णवाहनाश्रैत्या मधुसुहृदोऽपि मधुसूदना इवाभान्ति। यत्र पक्षिणो विचारज्ञा हंसाः सुमतयो जनाश्च। यत्र सदा वसन्तो वने लोकाश्च नगरे सुखिनः। यत्र वापिकाः सकमलाः सर्वजनाश्च। यत्र प्राकाराः समाः कृतव-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सतयः प्राणिनश्च । यत्र तडागाः सदा सवनाः पुरप्रान्तभूमयश्च । यत्र क्रीडामयूराः सकलापाः पौराश्च । यत्र सशालानि गृहाणि वनानि च । यत्र सवारणानि गजमन्दिराणि राजद्वाराणि च । यत्र मदो गजेन्द्रेषु, न तु पौरेषु । यत्र त्रुटिर्गान्धिकहट्टेषु, न तु ग्रामी । यत्र हृदयभेदो मुक्ताफलेषु, न तु नागरेषु । यत्र भङ्गो विलासिनीभ्रूवल्लरीषु, न तु शूरेषु । यत्र चाश्चल्यं सुन्दरीणां चक्षुषु, न तु पौरहृदयेषु। यत्र न कोऽप्यमीअमीशब्दः, परं बहुवचने जनानाम् । यत्र कोशो महान्सरोजवनेषु मन्दिरेषु च पौराणाम् । यत्र विनीताः पुरवासिनः कृपालुकृषीबलक्षेत्रे कलमादयश्च । यत्र जीवनदाः सदा लोकाः पयोदाश्च । यत्र सुनीलाः कृतसरित इक्षुभूमयो मरकतस्थल्यश्च प्रासादमालानाम्। यत्र ऊर्मिवत्यो नद्यः,न तु जनताः ।यत्र काठिन्यं क्रीडापर्वतेषु, न च जनानां स्वान्तेषु । यत्र भयं भीतिशब्दे, न तु पौराणां मध्ये । यत्र त्रासो रत्नेषु रत्नवेदिभिरेव दृश्यते, न च कस्यापि वैरिणः ।

तत्रासीत्समुद्र इव गम्भीरगुणः समुद्रविजयो नाम राजा ।

अपि च–

यस्य क्षमेश्वरवरस्य सदैव कीर्ति-
माकर्ण्य कर्णपुटकीकृतचित्तवृत्तिः ।
आनन्दतुन्दिलतया किल निश्चलं स-
द्विश्वं न निश्वसिति कुड्मलिताक्षिपद्मम् ॥ १ ॥

किंच–

दण्डेन यस्य क्षयिता नृपाला
धरातलं सम्प्रति पालयन्तः।
श्रियं दधुः स्नेहलिनां निकामं
मात्सर्यमुत्सार्य निजं बलानाम् ॥ २ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अन्यच्च–

दुर्गाण्यदुर्गाणि कृतानि येन
तुरङ्गमाणां खुरघट्टनेन ।
पुराण्यरण्यान्यरिभूभृतां च
प्रयाणनिःशाणभियागतानाम् ॥३॥

अद्यापि गायन्ति यशांसि यस्य-
महीपते भूमिपुरन्दरस्य ।
कृपाणवज्रेण विदारिताना-
मालोक्य पक्षान्परभूधराणाम् ॥ ४ ॥

सकलसामन्तसेनाचक्राक्रमणसुविक्रमेण तेन सह सहज-कोपकोपितः कोपि नाभूदरातिः सङ्ग्रामेच्छुः नवखण्डमण्ड-लदलमण्डितकनकगिरिशिखरकेसरपुञ्जभासिनि भूवलयकुव-लये । भोगचञ्चुचञ्चरीकेण, विमलयशोविनाशिततमोराशिविं-शदीकृतदिग्वधूवदनकैरवसमूहेन कैरविणीधवेन निजकर-वज्रपञ्जरनिर्ज्जरीकृतशरणागतचकोरकुलदुःखभञ्जनेन, स्वकर-समर्पितामितधनधनदीकृतयाचकलोकपिनाकपाणिना धनुर्धरेण, तेन शिवादेवीति नाम्ना शिवस्वरूपा पतिव्रताऽऽर्या भार्या परिणीता ॥

अपि च–

श्यामलकमलद्वितयं कनकघटाविन्द्रनीलनीलमुखौ ।
घटितौ काञ्चनवल्ल्यां कल्याणमयीति सा देवी ॥१॥

अन्यच्च–

तस्यास्त्रपां लाजकुली कुलीन-
गुणान्वितायाः किमुशिक्षतेस्म ।
तया विनीतत्वमधारि तत्त्वात्
कथं लताभ्यः फलसंनताभ्यः॥

विकचकमलविमलकान्तिवदनारविन्दमन्दीकृतेन्दुमण्डल-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



खण्डितसौभाग्यभाग्योदयमात्सर्याश्चर्यकरी, स्थलकमलिनीव दिवसरात्रिविकासिनी, मणिनूपुरझणत्कारच्छलविलोलरा-जहंसनिःस्वना, अशोकलतेव पद्मरागसरागाङ्गुलीकिसलय-विलासयुता, कर्पूरकदलिकेवाभ्यन्तरलीनविचाररूपकर्पूरपूर-गर्भा, सुपर्णीव वर्ण्यमुखशुक्तिसम्पुटविमलवचनमुक्ताफलप-टलशृङ्गारितसेवकजना, भारतीव मनोहरार्थालङ्कारालङ्कृतज-नसौभाग्यदा, कल्पवल्लीवानल्पदातृत्वगुणगरिमधुरा, पतिव्र-ताव्रताचरणशुद्धान्तःकरणवर्या, पर्याकुलितधर्मकर्मस्थापनशर्मदा, पतिव्रतावृन्दवन्द्यपदारविन्दा, सरस्वतीवानवद्यविद्या ज्ञानचा-तुर्यमनोहरा।

अपि च–

चरणकमलरागं पद्मरागप्रकाशं
घनतिमिरप्रकाशं केशपाशं किलास्याः।
रचयितुरिह धातुः पौनरुक्त्यं प्रयातं
मणिगणतिमिराणां निष्फलारम्भभाजाम् ॥१॥

श्रीसारस्वतमण्डनस्य विदुषां सन्तोषदस्यानुजे
चातुर्योचितकाव्यमण्डनधृतभ्रातृत्वसंराजिते।
श्रीमन्मण्डनविन्दुना विरचिते श्रीमालवंशेन्दुना
चम्पूमण्डननामनीह पटलो ग्रन्थेऽयमाद्योऽभवत् ॥

## २.

ततस्तयोः शिवादेवीसमुद्रविजययोः परस्परं स्नेह-भराकृष्टत्रिविष्टपमुख्यसौख्ययोः समस्तवस्तुसार्थिकप्रार्थनयोः समुल्लसितसदयहृदययोः पवित्रीकरणयोर्मिलितयोः कमलिनी-भान्वोरिव महामहानि दिनानि महान्त्यपि तनून्यगमन्।

ततःसपर्यायो वसन्तो राजेव स्वजनपरिवारेण संवृतो प्रवव्रते का-मिनीसभ्रूभङ्गविभ्रमोपदेष्टा, कष्टानि वारयन्निव वियुक्तवधूवरमण-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यकोपसम्पन्नानि, परपुष्टपटुपटहनिनादमन्दीकृतरववैरिवैराग्यधरपुरुषपरुषाभिमानः, प्रस्थितषट्पदपदातिभारपदभरदलिताकुलितवनघनकुसुमस्तोमसमुद्धतधूलिचटुलपटलस्थगितदिगन्तः, समन्तात्पवमानसामन्तसमानीतचन्दनतरुपल्लवपरिमलमहामल्लः, पवनवेगवेल्लत्कनककदलिकादलराजिध्वजविराजितः, पराजितपलायमानमहामानकवचधरतपोधनयोधः, लतावधूपल्लवान्विधूनयन्मलयानिलकरेण, अतुच्छकुसुमगुच्छघनस्तनमण्डलान्युद्घाटयन, हसन्निवनवविकसितपुष्पसमूहेन, हेलया कामीव समीहितमनोऽभिलाषमखण्डितं कुर्वन्, दूत इव सर्वकामिमिथुनानि विघटितानि घटयन्, विटपिभिर्महाविटपभुजैराबद्धदलपुटाञ्जलिभिरालिङ्गितवल्लिवल्लभैरमितपरोपकारतुष्टैर्नमस्कृत इव ।

तत्र बहुला भ्रमरकुलाकुला याचकजनसङ्कुला उदारा नरा इव, मकरन्दजलवर्षिणः क्षीणजला जलदा इव, चूततरवः सरवकोकिलनिनादविडम्बितकादम्बिनीनिर्घोषाः; मधुरमधुसन्तोषाद् घूर्णिता इव मलयानिलान्दोलिताः कुसुमरागरक्ताः किंशुकाः मत्ता इवारेजुः ।

तत्र कनककुरबककुसुमनिष्कनिष्कासितजाम्बुनदाः, प्रमदाः, बकुलकलिकादामन्दीकृतधामविशालमुक्ताफलहाराः, मनोहराणि कुसुमाम्बराणि दधानाः, क्रीडन्त्यः कान्तैः सह कुसुमसमयमेव केवलं मन्यमानाः मानमपहाय, ससारं संसारं विचार्य नार्यः कुसुमशरशरजालजर्जरितमहाहङ्कारग्रन्थयः, कामकेलिमनुभवन्ति स्म सुस्मितमुख्यः सर्वाः ।

अपि च–

असमकुसुमभाराविद्धभुग्नद्रुशाखः
परिमलभरलुभ्यन्भ्राम्यदिन्दिन्दिरौघः ।
तनुतरदलरागाताम्रनम्राम्ररम्यः

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कलगलकुलगीतः प्राप रूपं वसन्तः ॥ १ ॥

अन्यच्च–

उन्निर्यत्पुलकाभचारुकलिकापुञ्जान्दधानाः परं
दन्तच्छिन्नसुकोमलाधरसमारक्तप्रवालाङ्कुराः ।
कम्पेनाकुलितास्तदागमपदासङ्गेन संवर्धिना
मुग्धानामदधुः श्रियं मधुकराश्लिष्टा लताःसत्कृताः

अथ तरुणजनमनःसुखकरणम्, अङ्गनानां रमणसमागमनसंशयनिवारणम्, अस्तमनमारब्धम् त्वरयदिव दिवसे परस्परावलोकनस्नेहलान, निशागमनसमुत्सुकान, भोगाभरणधरणाय प्रियान, जलनिधिमधिगम्य रवेर्बिम्बं कमनीयकुङ्कुमाभमरुचत्, अपरदिशावध्वा इव वदनं मधुपानरक्तायाः ।

अपि च–ततो जरत्कुञ्जरनिभपुञ्जितमिवाञ्जनम्, रञ्जितजगत्त्रयम्, निर्जितसमरतज्योतिः, ऊर्जितम्, अकाण्डदण्डितपुण्डरीकपटलपाण्डिम, दिनसङ्गतरथाङ्गयुगयोगभङ्गसमुद्भवत्कुन्दारधृतघनघृणप्रतिनादरुदितमयनदीतटम्, त्रस्यद्भिरिव दिवसपतिधृतानादैररविन्दैःकृतमुकुलच्छलाञ्जलिपुटैः प्रणम्यमानमिव, श्यामलितकुमुदवनजनितनीलोत्पलभ्रान्ति, दिनोदयमुदितकोकयुगक्षणशोकहरम्, प्रचण्डतरचण्डकिरणपरम्परादीपमालासङ्गमितगगनमण्डलखर्परोद्भ्रान्तम्, भ्रमरवर्णं कज्जलमिव तमः समस्तमाच्छादयति स्म ।

अपि च–

लोकबन्धुरधुना विगतोऽयं यद्भयान्मम पदं न कदाचित् ।
इत्युदीक्ष्य नु तमः शरभेद्यं छिद्रकज्जलनिभं प्रससार ॥ १ ॥

अपि च–

चोरयन्मृगदृशां मणिहारान्सञ्चरत्सुदृढमन्दिरमध्ये ।
दृश्यमेव जनता नयनानां धीरचोरवदचिन्त्यमलङ्घ्यम् ॥ २ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अन्यच्च–

उदयति दयिते ततो निशायास्तरलकराङ्कुरगौरवर्णबिम्बे ।
दिनसमयधियेव चापराधात्तिमिरभरः प्रययौ दरीर्गिरीणाम् ॥
यत्र निर्मलगुणाः शशिमुख्या नाशयन्ति जगतां पटुतापम् ।
भ्रान्तिदस्य निजमार्गगामिनां दुर्जनस्य तिमिरस्य कथा का

ततः प्रकटीबभूव चन्द्ररुचिः, विचित्रधवलिमधवलितगिरिशिखरपरम्परा, शरदिव दिवससमानकमनीयकान्तिः, ध्वान्तौघमेघपटलानि दूरीकृत्य गौरीकृतनभोमण्डला, जननयनकमलान्युल्लासयन्ती, जनपदहृदयानि सुखधराणि कुर्वती, धरायै मुक्ताफलनिचोलमिव प्रकाशमर्पयन्ती ।

सखीस्नेहविशेषेण सपरिवारेण कुसुमशरेण वैरिणो विजेतुं प्रस्थितेन विनिवेशः कृत इव भूप्रदेशः ।

यत्र सितपटकुटीनिभाः पटीयांसः पर्वताः, गन्धवहाव धूतद्रुमशाखास्तारवेषा गङ्गातरङ्गचारुचामरश्रियं भेजुः । काञ्चनाचलविशालदण्डं गगनमण्डलं सितातपत्रमिव लक्ष्यते स्म । विस्मयोऽभवद्गिरिजाजलधिजयोः कर्पूरगौरावेव हरिहरावलोकयन्त्योः । वल्लभवेश्मगच्छन्तीनां वल्लभानां संभाव्यते गमनं मणिमञ्जीरधीरध्वनिश्रवणेनैव, सान्द्रचन्द्रकिरणावलीकवलितानामलक्ष्याणामीक्षणैः ।

अपिच–

जलमपि निखिलं ततो नदीनां
विशदतया विजहास दुग्धसिन्धुम् ।
किल कुलमखिलं च कोकिलानां
मधुरगिरेन्दुसितान् निनिन्द हंसान् ॥ १ ॥

अन्यच्च–

हिमकरकरशुभ्राश्चक्रुरुच्चैश्चकोरा
दिशि दिशि मदधारा पारणं वारणानाम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दिनमिति कथयन्तश्चन्द्रिकाद्रावपाण्डुं
निशमतिमुदमापुश्चक्रवाका वराकाः ॥ २ ॥

अपि च–

स्मरसमरभुवा श्रमेण खिन्नं
स्वकरकृतामृतसेचनेन चन्द्रः ।
जगदतिगतखेदमादधौ यत्
परसुखदाः प्रभवो भवन्ति नित्यम् ॥३॥

श्रीसारस्वतमण्डनस्य विदुषां सन्तोषदस्यानुजे
चातुर्योचितकाव्यमण्डनधृतभ्रातृत्वसंराजिते ।
श्रीमन्मण्डनविन्दुना विरचिते श्रीमालवंशेन्दुना
चम्पूमण्डननामनीह पटलो ग्रन्थे द्वितीयोऽभवत् ॥

३.

पूर्वस्मिन्नचलासने मणिमये तिष्ठन्दिशो रञ्जयन्
सर्वाः स्वेन गुणेन भूमिवलयं निःशेषमानन्दयन् ।
कोशानुद्घटयन्करेण कमलोल्लासं च विस्तारयन्
राजा नव्य इवोदितोऽवनिभृतां भानुः कृशानुद्युतिः ॥१॥

रजनिकरकरनिकरकुञ्चित विशालकमलमुकुलबृहत्काराग्रृह-निबद्धमधुकरबन्दिनो दिनोदये मुञ्चन्, चतुरवेगतुरगसङ्गमितरथमारुह्य भूधरशिरः पथं कृत्वा सत्वरं पश्चिमदिशं विजेतुं जिगमिषुः, कोविदवृन्दवर्णितानवद्यगुणगणगरिमधरो, धरोदयाय दयापरो, द्विजचक्रकृतानन्द, सकलधर्मकर्मपालनाय कृतावतारः, दाहोत्तीर्णसुवर्णागण्यकिरणचयेन गिरीन्द्रान्काञ्चनाचलनिभान्कुर्वन्, सर्वभूवलयं हेमजलजरजःपिञ्जरितमिव प्रकाशयन् ।

अपि च–

सरसिजमुखा भृङ्गेक्षणा पयोधरानमन्त्यः
परिमलभरानद्धा हंसागमेन रम्यलीलाः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



खरमणकरासङ्गमोदं वहन्त्य एव नित्य
पुरयुवतयो रेजुर्गेहे सरस्यथो नलिन्यः ॥१॥

अथ प्राप्तो निदाघकालः काल इव पथिकविशाललोचनानाम्, आलानमिव विषमवारणस्य, क्षीणबलहेतुः, तृषाकुलानि वनचरकुलानि मृगजलनदीजललोलुपानि लुब्धक इव निपातयन्, द्रुतं द्रुतं द्रुतशातकुम्भरसप्रणालिकामिवांशुमालिकां विस्तारयन् सुवर्णकार इव, समस्तजलाशयशोषितजलो वडवानल इव जलनिधिमवमत्य आयातः, शीतलानपि मलयाचलानिलान् अङ्गसङ्गेनानलनिभान्कुर्वन् विरहानलतप्तो विरहीव, खदिराङ्गारस्फुलिङ्गकणनिभान्यभीक्ष्णं तीक्ष्णदाहानि कामिनो हाररत्नानि दीपयन् दीपिका इव, ज्वलन्तीर्दिशो दर्शयन् पथिकजनं वनखण्डवह्निरिव, पृथुकटाहसमान् जलाशयान्मकटतटान्स्फुटीकुर्वन् किञ्चिदवशिष्टजलान् चुल्लीज्वलन इव ।

तस्मिन्काले दाहमपनेतुं शिवादेव्या सह समुद्रविजयो नाम राजा जलदानपत्रबहुलच्छायमतुच्छाच्छजलं क्रीडातडागमवगाढुमगमत्, अनुचरीणां सुन्दरीणां लीलाचलच्चरणमणिनूपुरनिःस्वानानाकर्ण्य सज्जीकृतकर्णपुटानि बालमरालकुलानि दधानं मुखं समागतान्यहंसधिया प्रत्युद्गमनधृतचापलानि, विलासिनीनां लीलाकमलभ्रमणानिवारितानां मुखपरिमलवितानां रोलम्बानां पटलान्युपरीन्द्रनीलकान्तीनि समालोक्य जलदमण्डलभियोड्डीनकलहंसकुलम्, परस्परं कुरङ्गलोचनानां सेचनात्कमलास्फालनसमुच्छलितम्, कल्लोलविक्षालितनयनोत्पलकज्जलसुनीलकान्ति कालिन्दीजलमिव जलं दधानम्, राजयन्तं यदुराजमिव कान्तामण्डलान्तरालगतं तल्लोचनाञ्चलसंवलितं श्यामलम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अपि च—

हारानुद्ग्रथितान्विशालविगलन्मुक्ताफलान्खेलनात्
विन्यस्तं स्तनमण्डले प्रचलितं वासो विदुर्न स्त्रियः।
धौतं चाधररागमङ्गविगतं श्रीखण्डजं सौरभं
व्रातान्तःकुसुमप्रकीर्णकबरीभारं तरन्तं जले ॥१॥

अपि च—

परस्परनिषेचनक्वणितकङ्कणारावतो
विलोलजलनिःसरत्तरलवीचिकास्फालनात् ।
दधुर्वियति मण्डलं प्रचलिता मराला भिया
सितातपनिवारणं धृतमिवाङ्गनानां स्फुटम् ॥ २ ॥

ततो ययौ राजा जलकेलिमनुभूय भूयः कान्तासखः, सुखविकसितमुखकमलः, ललनाकरतलसमुल्ललितचामीकरदण्डचारुचामरयुगलेन वीज्यमानस्तडागतरङ्गयुगेनेव चामरीकृतशरीरेण बहुकालखेलनघनस्नेहसमाकृष्टमानसेन, विकचारविन्दलोचना नयन्सन्सुरसाः, सरसो नीरमवगाह्य तीराभिमुखो गजेन्द्र इवोन्निद्रकमलाः कमलिनीः कर्षन् वर्षन्तीर्जलकणानगणान् । पुरसुन्दरीभिरवलोक्यमानः, प्रखरशेखरमाणिक्यचयसंवलितोऽशुमालीवांशुचयैरनुमितः, प्रोत्फुल्लवदनपद्माभिः पद्मिनीभिश्चानुगतः, स्वशरीरमरीचिसञ्चयेनेन्द्रनीलवातायनानि पुरमन्दिराणां चामीकरनिर्मितानीव कुर्वन, दिवसविरामसमये स्वराजमन्दिराणीन्द्रचापमुद्रामणिगणरचिततोरणानि विवेश ।

अपि च—

इन्दुः सुन्दरवेष एष पुरुषाकारं विधृत्यागतो
दृष्टिश्चामृतवृष्टिरस्य जगदानन्दाय संभाव्यते ।
कान्ता चास्य निशा विशालनयना श्यामाभिरामाकृतिः
पौराणामिति संस्तुतः कलगिरा राजा विवेशालयम् ॥१॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



द्विरदरदच्छेदसमानविशदकुसुमोत्तरच्छदेऽनल्पपरिमले शयने शयाना, परिचारिकाजनवालव्यजनवीज्यमाना, शचीसमानानन्तभोगभासमाना, त्रिशालहर्म्यचन्द्रशालायां चन्द्रकान्तस्थूले पार्वणपीयूषमयूखपीयूषस्यन्दशिशिरतरे प्रासादतले कनकगौरशरीरा, गङ्गातरङ्गाभमच्छमतुच्छकान्ति वासो वसाना, चम्पककलिकेव चन्द्रकिरणावरणा, शिवादेवी; निशागमनसमये स्वप्ने ददर्श द्विजमेकम्, आदर्शसदृशकान्ति कुङ्कुमरागपिञ्जरितकर्पूरपरागसुन्दरमधोवासो वसानम्, क्षीरोदधिवीचीसमीचीनमरीचिरुचिरमुपरिवसनं परिदधानम्, काञ्चनचम्पककुसुमधामानमिव क्षीरसमुद्रतो द्रुतमुपगतम्; विद्रुतनिद्रामध्यमोहरूपतमोभरम्, परम्, प्रकाशकरम्, करे विधृत्य स्वरागरञ्जितभूमण्डलम्, चिरत्नं रत्नत्रितयं कौस्तुभशुभशोभमुपस्थितम्।

अन्यच्च—तेन तद्रत्नत्रयं त्रिलोकदुर्लभमचिन्त्यप्रभं तस्याः करे दत्त्वा 'स्वीक्रियताम् इ'त्यवादि मुदितमनसा निशावसान एव केवलम्।

ततः प्रभातमभवत्, राजभवनघनमङ्गलतूर्यस्वनपूर्यमाणदिङ्मुखमुखरिताखिलकुलशिखरिशिखरम्, उदितदिनकरतरलकरप्रकरसङ्गभङ्गुरपलायमानतिमिरपटलश्यामलीकृतापरदिङ्मुखमण्डलम्, मलिनम्, अपराङ्गनावदनबिम्बमिव दिवसपतौ परिणीतप्राचीतरुणीरक्ते, रजनिकरजनितदुर्वियोगकोकयुगसङ्गपरमरमणीयकान्ति, कान्तानां निशि कुसुमशरसमरखेदच्छेदकारि, सन्तापहारि, स्फुटत्कमलकुड्मलदलदलनमिलितसुरभि, किञ्चिद्विश्रविटपिविटपपटुच्छदपुटमन्दमन्दपवमानम्।

अन्यच्च—शिवादेवी विचिन्तयामास—

लोककृता किं न कृता निद्रा चिरवासिनी मनीषितदा।
यस्यामभ्यन्तरलभ्यं कीदृक्दृगगोचरं रत्नम् ॥१॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अपि च–

विकसितमुखपद्मा सद्म विद्यागणानां
हसितविजितपुल्लन्मल्लिकाकुड्मलश्रीः ।
अचकथदथ राज्ञे सर्वविज्ञेयधात्रे
परिजनमनवद्यं स्वप्नवृत्तान्तमेनम् ॥ २ ॥
श्रीसारस्वतमण्डनस्य विदुषां सन्तोषदस्यानुजे
चातुर्योचितकाव्यमण्डनधृतभ्रातृत्वसंराजिते ।
श्रीमन्मण्डनविन्दुना विरचिते श्रीमालवंशेन्दुना
चम्पूमण्डननामनीह पटलो ग्रन्थे तृतीयोऽभवत् ॥

४.

राजापि चिरं स्वगतं विचिन्त्यापि प्रतीत्यैकं नवमाचार्यवर्यमाकार्य तदागतं स्वप्नार्थमथ कथयति स्म विस्मितमना बहुनाऽऽदरेण । आचार्योऽपि विचार्य स्वप्नकार्यं चिरं दध्यौ निर्मीलितनयनकमलः, संकुचितनिर्वातकुमुदकुड्मलो हृद इव निश्चलो निस्तरङ्गतया, विवेकाविवेकक्षीरनीरभरपृथक्करणप्रवीणसविनोदमनोरूपविलसद्राजहंसः, रत्नाकर इव निर्मलतरविचारचारुरत्नभूषितगर्भगूढसारो नानामतिसरित्समूहमोहनप्रौढः, चन्द्रकान्त इव निर्मलकान्तिः सज्जनवचनपूर्णचन्द्रसन्तोषतूर्णद्रवत्करुणारससन्दोहः, तापमोहखिन्नजनवदनकैरवगर्भभानुजनितसंकोचमोचनपरमवचनपीयूषः पार्वणशर्वरीश इव शिवामेवमुवाच च ।

अपि च–

शुभाय संभाव्यत एव सत्यं स्वप्नस्य वृत्तं भवता यदुक्तम् ।
रत्नस्य संदर्शनतस्तु रत्नलाभः परं ते भविता नृपाल ॥ १ ॥

अपि च–

फलं किलैतत्प्रकटं पटीयो निगद्यतेऽद्य क्षितिपानवद्यम् ।
त्रिलोकसौन्दर्यधरं पवित्रं पुत्रं भवान्प्राप्स्यति रत्नलाभात् ॥ २ ॥

अपि च–

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अशोकचारुप्रसवारुणाभ्यां चक्रे कराभ्यां ललिताङ्गुलिभ्याम् ।
ग्रन्थिं पटान्ते शकुनप्रवीणः स पूज्यमाचार्यमपूपुजच्च ॥ ३॥

ततः कनककेतकीकेतकमुकुलगर्भदलद्विगुणितविमलकान्तिना वदनारविन्देनेन्दीवरसुन्दरेक्षणेन लक्षिता, तस्य भूभर्त्तुः पत्नी, बभूवान्तर्वत्नी, रत्नगर्भा इवानर्घ्यरत्नगर्भभूषिता अन्तर्निलीनपीनरत्नगुणादभ्रविभ्रममयी, शरन्निशा इव उन्निद्रमुखचन्द्रमण्डलकिरणमण्डली प्रोज्ज्वलीकृतोच्चञ्चुकुचयुगलतुन्दिलनिश्चलचकोरयुग्मसङ्गमशोभमाना, अलसगमना, त्रिभुवनभरधरगर्भोद्वहनप्रयत्नभारभङ्गुरमध्यप्रदेशा, विशालोललोचनकमलानुमितामितविक्लवा, घनसारवल्लीवान्तर्लीनघनसारपूर्णगौरवा, परिमललुब्धमिवानिलमिलनक्षुब्धमिन्द्रनीलसुनीलमक्षियुगलं सुविभ्रमवद् भ्रमरद्वन्द्वं वहन्ती, समस्तवस्तुप्रार्थनासफलितमनोरथा सती; अप्राप्य वस्तुकथापि कर्णान्तराले नासीत्तस्याः । तदपि दोहदार्थमेवं समर्थयति स्म विस्मितस्य राज्ञः सुज्ञस्य पुरस्तात् ।

धव–खदिर–धन्वन–पलास–पनस–तिनिस-तिन्दुक–तिलक-बिभीतक–भल्लातक–कम्पिल्ल–बिल्व–कदम्ब–राजकदम्ब तुङ्ग–नागरङ्ग–पुन्नाग–सिन्दुवार–वरण–कर्णिकार–सहकार काञ्चनार–काञ्चन–मुचुकुन्द–मकरन्द–प्रियाल-शाल–सरल–रक्तफल–नक्तमालविशालच्छायासु, स्यन्दमानामन्दमकरन्दलवोत्फुल्लवनमल्लिकाकुञ्जलीनसमुज्जृम्भितमञ्जुलगुञ्जरञ्जितनिश्चलहरिणयुथासु, द्विरदमदभ्रान्तभ्रमरभरचरणाघातजर्जरितनिर्झरीतीरकरञ्जमञ्जरीरजःपाण्डुरितशिखण्डिमण्डलीषु, निष्कानन्त्वात् सदाफलबदरिकातलपतितबदरपटलपटुतरेङ्गुदीफलमुदितमुनिकन्यासु वन्यासु रिरंसुरहम् ।

अपि च–

भूपतिः स मुमुदे कुमुदाक्षीदोहदेन यतिसुनुशंसिना ।
अङ्कुरो मरुवकस्य धरान्तर्लक्ष्यते परिमलेन धरण्याः ॥१॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अपि च-

विकचकमललीलाशालिरम्याननश्री-
र्विमलजलसमानप्रोल्लसच्चित्तवृत्तिः ।
सर इव नरपालः पालयन्बालमेघ-
प्रसवदिवसमासीदुन्मुखस्तन्मुखस्य ॥ २ ॥

अपि च-

अर्थेन किं दुर्मदमेदुरेण किं विद्यया मत्सरनिन्द्यया च ।
स्यादङ्गजः कल्मषभङ्गजन्मा वदन्निदं प्राप मुदं महीपः ॥३॥

तनयजननकाले स्तोक एवावशिष्टे
वदनमभवदस्य प्रोद्यदुत्तालभासि ।
उदयसमयरूढे वासरेशप्रकाशे
कमलमिव विशालं किञ्चिदुद्भिन्नकोशम् ॥ ४ ॥

किंच-अपांसुलमृदुलतालवृन्तानिलसमानपवमानशोभमाने, मन्दारकुसुमामन्दतरामोदस्यन्दिमुदितमुदिरधारासम्पातचारुसम्पत्तौ, प्रबलमङ्गलतूर्यनिनादानन्दितदिवौकसि, पुण्डरीकपटलपाण्डुरवर्णप्रसन्नदशदिशि, प्रोल्लसितजनवदनकमले, विमलोद्भासिभास्करमहसि, दुर्द्धरभूभारधरणव्याकुलाङ्गसमुच्छ्वसितनागकुले, दुर्नयशासनकम्पमानपवमानहताश्वत्थदललीलोल्लसितनिश्चलधरणिमण्डले, आखण्डलप्रेरिताखिलजनादलोपिदिव्यतूर्यध्वनिपूर्यमाणदशदिङ्मुखे, चन्दनरसामन्दसेकविराजितपौराङ्गणे, आनन्दसम्भ्रमसविभ्रमनगरनायकागणे, प्रतिमन्दिररचितोचितमणिमयतोरणे, दरिद्रमुद्रयाचकलोकशोकहरजे, प्रतिचत्वरं त्वरितमङ्गलमालिकाविकासिपुण्ययुवतिजने, कुसुमभरनमितकलितवन्ध्यवने, समुज्जृम्भितमधुरगन्धर्वललितरागे, घनानन्दितत्रिभुवने, शुभदिने, शिवादेवी सुतमजनयत्, नयनसुखदेदीप्यमानशरीरतेजःपुररञ्जितधरणिमण्डलम्, कुतूहलेन बालवेषधरं कनकधराधरमिव ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कर्पूरपूरगौराङ्गमिन्दीवरविलोचनम् ।
मन्दीचकार नृपतिस्तं विलोक्यान्यलोकताम् ॥ १ ॥

अपि च–

तस्य क्षितीशस्य पुरातनेन पुण्येन लब्धेन सुदुर्लभेन ।
बभौ ततस्तेन सुतेन राज्ञी निधानकुम्भेन धरेव भव्या ॥२॥

अपि च–

असौ धर्मार्थचक्रस्य भारोद्धरणधीरधीः ।
अतस्तं नेमिरित्याह राजा सञ्जातकौतुकः ॥ ३ ॥

स भुवनभवनान्तस्थो निमलयन् दश दिशो महाभित्तीः ।
वर्द्धयति स्म समृद्धिं दीप इव दशाविशालरुचिः ॥ ४ ॥

अपि च–

गण इव गणनानां तेजसां देहधारी
ज्वलन इव परेषां सैन्यवन्यापहारी ।
इति जगति जनानां पश्यतां भ्रान्तिकारी
व्यरुचदिति स नेमिः क्रिडयाश्चर्यकारी ॥ ५ ॥

किञ्च–असौ बालकशृङ्गारभङ्गीमङ्गीकृत्य सव्रीडं क्रीडन्, पितृमानसे मुदं वर्द्धयन्, हृदयानन्दनकोमलशब्दसुखं ददानः, कुङ्कुमरागरक्तचरणकमलतलः, पक्षद्वयराजमानस्तु राजमानसजीवनशृङ्गारः, परिजनकरकमलवनघनसङ्गशोभमानः, बालमराल इव रराज । शुक इव शिक्षितवचनानुवदननिपुणः, सज्जनमनोरञ्जनमधुरवचनविलासः पिक इव, राजाङ्गणे विस्तारितकर्पूरधूलिधूसरगात्रमादधानः, धात्रीकरविरचितदुष्टजनदृष्टिपातबन्धनमृगमदपङ्कतिलकचारुललाटफलकः, सूक्ष्मशशकलक्ष्मलाञ्छितः शशलाञ्छन इव, कलङ्कबुद्धिभ्रान्तजनवचनभ्रममपनेतुमुज्ज्वलनिष्कलङ्कशरीरः समागत इव स्वर्गात्, भूभागं मणिमय-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मन्दिराङ्गणे रङ्गन्, अङ्गसङ्गतां निजच्छायाम् 'आयाहि' इतिवदन्, सदनस्थजनं सहसा हासयांचकार। धावन्मणिनूपुररवं पृथक्कृत्वा 'देहि' इति धात्र्या सह विवदमानः, मणिस्थलसङ्क्रान्तमात्मानमवलोक्याहर्तुकामः, धात्र्यङ्गुलीमवलम्ब्य विलम्बितगमनः, मनोरथं वर्द्धयन् नेमिः, अमितगुणः, पितुर्हृदयस्थं खेदं दूरीचकार इति, किं पुनर्दुःखमित्यक्षरद्वयमपि विस्मारयति स्म।

किञ्च–ततो भोगातिरिक्तमाल्यमिव बाल्यमपहाय तारुण्यमङ्गीचकार। दुर्जनभूवल्लभोपप्लवाय धूमकेतुशिखे इव नवनवस्फुटितकन्दलीसुनीले श्मश्रुणी बभार। अमन्दकान्तिजाम्बुनदशिलाविशालवक्षःस्थलोड्डुविडम्बिमुक्ताफलहारः, परमरमणीयजानुचरसरलदोर्दण्डभूषितमणिमयबाहुभूषणः, सुवर्णकदलीश्लाघालङ्घिजङ्घायुगलतरङ्गिताङ्गशृङ्गारितचैलः, शीलविलम्बिताम्भोधिगाम्भीर्यधैर्यः, फलभरनमिततरुवर इव विनीतः, शीतकर इव सकलजनाह्लादकरः, पञ्चानन इव सञ्चारितभयारिकलभभग्नाभिमानः, काञ्चनाचल इव काञ्चनविनिमयोर्जद्भुजयुगकल्पद्रुमद्वयसमाश्रितः।

अपि च–

औदार्यं सुरभूरुहाज्जलनिधेर्गाम्भीर्यमर्यादितं
लावण्यं कुसुमायुधान्मुनिजनात्कारुण्यमत्युत्तमात्।
आदाय क्षितिमण्डले तनुभृदाऽऽनन्दाय वन्ध्याकृते–
र्धाता तस्य चकार कारणपटोर्जन्माऽत्र सन्मानिनः ॥१॥

अपि च–

कन्दर्पदर्पं विफलीचकार रूपेण कोपेन बलं नृपाणाम्।
विश्वंभराभारधरः स्थिरश्रीर्नेमिर्भुजङ्गेन्द्रसमानबाहुः ॥२॥

अन्यच्च–

यशःसमुज्ज्वाल्य दिशोऽस्य राज्ञः कर्पूरपूरीकृतमेदिनीभृत्।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दिवे सरीसर्त्ति च मर्त्यलोकात् कलङ्किनो नाशयितुं कलङ्कम्॥३॥
अपि च–

यद्दानवारिसरितः परितः पुनन्ति
लोकान् जलं जलनिधेरपि पूरयन्ति ।
यद्दत्तकाञ्चनविवृद्धसमृद्धयश्च
सर्वेऽर्थिनोऽपि किल दातृगुणं भजन्ते ॥४॥

किञ्च–

यस्याङ्गसङ्गेन पुनः पटीरः पटीयसो भूधरसौख्यमाप ।
कदर्थितो येन पुरा पुरारिर्भुजङ्गसंसर्गमपास्य तं च ॥५॥
सकलगुणनिधानं सन्निधानं दधानं
हृदयगतसुधानां निर्मलानां बुधानाम् ।
सति महति समुत्थेऽगण्यतारुण्यरूपे
तदपि सपदि नेमिं मानयामासुरार्याः ॥ ६ ॥
श्रीसारस्वतमण्डनस्य विदुषां सन्तोषदस्यानुजे
चातुर्योचितकाव्यमण्डनधृतभ्रातृत्वसंराजिते ।
श्रीमन्मण्डनविन्दुना विरचिते श्रीमालवंशेन्दुना
चम्पूमण्डननामनीह पटलो ग्रन्थे चतुर्थोऽभवत् ॥

५.

विविधकलाधरविबुधमागधवर्णितगुणम्, कीर्त्तिवाल्लमल्लिकापरिमलपरिमलितदिगन्तवलयं शरत्कालमिव, यशश्चन्दनपरिमलमिलितामितवैतालिकललितालिमालिकमलयाचलमिव, तमाकर्ण्य वर्ण्यमानमहिमानम्, अनन्तलावण्यसम्पन्नम्, सम्पद्विनिमयपरायणम्, नेमिनाथम्; सञ्जातकौतुकः, तद्दर्शनविवृद्धतृष्णः, अथ कृष्णोऽनिसौहार्दात्कुर्दनसमुत्सुकः, विस्मयकारिपवित्रचरित्रभाजनम्, आयान्तम्, इयेष ।

किञ्च–ततो दूतोऽस्य शीघ्रगामी समीर इव, मनोवाहमारुह्य

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शैलान् लीलयैवोल्लङ्घ्य विजयवर्द्धनं पुरं ययौ। अध्वानमनल्पमल्पमेव मन्यमानः, समुद्रविजयं राजानं प्राप्य, 'जय' इति वाचमुच्चार्य प्राञ्जलिः प्रणम्य, सम्यक् तं कृष्णोदन्तं न्यवेदयत्।

राजापि सञ्जातानन्दः कृष्णोदन्तमाकर्ण्य पार्वणचन्द्रमण्डलगलत्पीयूषसुखदं निर्भरमानन्दजलभरिताम्भोधिरिव रराज। निजान्तःकरणसमुच्छ्वसितप्रचुररोमाञ्चसञ्चयकञ्चुकीकृतशरीरो धराधर इवाम्भोधरकालस्फुटत्कुड्मलकदम्बकुसुमनद्धः, निर्भरमानर्त्तितमनोमयूरः, स्फुरल्लोचनचातकयुगशृङ्गारितः,तुङ्गगङ्गाजलनिर्मलो जलद इव, स त्वरयामास नेमिं कुमारं सुहृत्स्नेहवर्द्धिष्णुं विष्णुं प्रति।

किञ्च—स नेमिः सभूतं रथं कृत्वा समारूढः प्रौढः सूर्य इवातिवर्यकान्तिः द्वारावतीं पुरं प्रति चलितः।

अपि च—

जननयनसरोजान्यञ्जसोल्लासयन्सन्
चतुरनगरमध्यं भासयन्भासमुहैः।
स्फुटकरपुटभृद्भिर्वन्द्यमानो जनौघैः
तरलतुरगवेगात्सङ्गतो नो रजोभिः॥ १॥

अपि च—

पवनमनुसरद्भिः कृष्णसारैरिवांशु-
क्षुरतरलितपांशुप्रांशुरोषात्त्यजद्भिः।
सपदि वरतुरङ्गैरुह्यमानो व्यपश्य-
न्नसितमणिसुरेखाकारवेषा वनालीः॥ २॥

अन्यच्च—

तव रथपथभूमेरुद्धतं धूलिजालं
प्रचलदचलशृङ्गाच्चातका विक्षमाणाः।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नवजलदमुदोऽमी संनदन्त्येवमाद्यं
स्मितविकसितवक्त्रं नेमिमाहाथ सूतः ॥

अपि च–

विषमसमभूमिसमुच्छलच्चपलतुरगवेगोत्पतन्तीभिः पतन्तीभिश्च रथशृङ्गारचामरपरम्पराभिः स्वयं विज्यमानो भगवान् गङ्गातरङ्गसङ्गीकृतो हिमाचल इव निर्मलकान्तिर्विलसति ।

पश्यन्नश्यद्द्रुतगन्धवाहवृद्धगमनवाहवाहितरथचक्रविघटितहाटकवर्णधरणिखण्डसमुड्डीनपीनरजोमण्डलम्, अर्द्धदण्डमातपत्रमिव, तव पृष्ठतोऽदभ्रम्, अभ्रगतं भ्रमति ।

अमी समीरयायिनो हरिणाः समीरास्फालनेन स्फालन्तः; भवतोऽतिचपलपलायमानरथयुगसङ्घटितस्कन्धवृद्धकोपस्तब्धकर्णदलतुरगगमनानि शिक्ष्यमाणा इव; निम्नाभिमुखमभिसरन्तः वेगमुकुलीकृतकर्णाः, भृङ्गवर्णाः, तव रथवाहाः कालिन्दीजलप्रवाहा इव नयनालक्ष्या लक्ष्यन्ते । विशालवंशविवरगतसमीरध्वनिमाकर्ण्य कर्णसुखमविलोलश्रवणदलमुक्तधराधरं लिखितप्रख्याङ्गं मृगद्वन्द्वमानन्दमयमाहर्तुकामो व्यामोहकृन्मृगादनश्चित्रस्थल इव पुरतस्तिष्ठति । वेष्टितानां च भोगैर्भोगिनः स्वबन्धनानि मन्दीकुर्वन्ति चन्दनानां किरातिकाकेशपाशानवलोक्य कलापिकलापभ्रमेण पुरो वनखण्डे । इतो दंष्ट्राङ्कुरोत्खातगुन्द्राङ्कुरा द्राक् महामहा अहङ्कारिणः स्यन्दननादमाकर्ण्य स्पर्द्धोद्धतसटाः कालायसशैलानुकारिणः क्रोडाः क्रीडन्त्येषु पल्वलजलेषु । इतः कण्डूविडम्बितकृतघृष्टविटपिकुसुमकुड्मलनिश्चलैः समुच्छलद्भिर्भ्रमरैः पटुकटमदलुब्धैर्विद्राविता द्रुतं द्रवन्ति दन्तिनो जलाशयान्प्रति विवशा निदाघतप्ता इव । इतश्च गङ्गातरङ्गसीकरशिशिरास्तरलयन्तो नवैलाश्चलान् कमलपरिमलशालिनोऽमी भवद्वदनसौरभ्यलोभिन इव वान्ति मन्दंमन्दमनिलाः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पुरः स्फुरति गौतमी चटुलभङ्गरङ्गज्जल-
स्फुटत्कुमुदकुड्मलाकुलितचक्रचक्राङ्किता ।
पयःप्लवनसङ्कुचन्नलिनकोशसन्दर्शना
निशागमनसंभ्रमाच्चलचकोरसङ्घाश्रिता ॥१॥

अपि च—

स्फटिकमणिरुचस्तटे तटिन्याः
कमलभुजो विलसन्ति तापसेन्द्राः ।
बहुलधृतघृणा द्रुमान्तरान्त-
स्तदनुचरा विचरन्ति राजहंसाः ॥ २ ॥

अपि च—

स्फुटमनुतटमेतत्कन्दलीकन्दलीनं
मुनिजनकरगर्भग्रासनिस्त्रासमास्ते ।
हरितहरिणयूथं श्यामलालोलनेत्रै—
र्नलिनचरमधूचां भृङ्गिकाभ्रान्तिदायि ॥३॥

अपि तु—

मृदुपवनवेल्लत्पल्लवोत्त्रासितानां
हरितरुचिनिकुञ्जं मञ्जुलं वञ्जुलानाम् ।
अनुतटघटितानां पेशलैरिन्द्रनीलैः
कलयति किल शोभाविभ्रमं कुट्टिमानाम् ॥४॥

कनककमलधूलीधूसरा राजहंसा
विदधति च सुपर्णस्वर्णवर्णं तटस्थाः ।
जलमपि न पिबन्तः प्रेक्ष्य चैतांस्त्यजन्ति
स्थलमितनिचुलानां वायुवेगा भुजङ्गाः ॥५॥

अपि च—

इह कचलोपसमूहा निर्भरकरुणारसैर्भरिताः ।
भ्रमयन्तश्चमराली मन्दं मन्दं पदं दधति ॥६॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इह नगरवधूनां शिञ्जितं नूपुराणां
सपदि मुदितचित्ता राजहंसा निशम्य ।
तदनुपरिसरन्तो मत्तहंसीनिनाद-
भ्रममधिगतवन्तो मन्दिरेष्वापतन्ति ॥७॥

पुरतो द्वारावतीसौधानां रुद्धांशुमालिरथपथा अदभ्रमभ्रंलिहा अमी चामीकरकलशाः कनकविहङ्गा इवोड्डीना आदृष्टिपातं निरन्तरा दीप्यन्ते । दिव्यमणिमन्दिरपताकाश्च गगनचुम्बनचपलाः विक्षिप्तपक्षपक्षिश्रियमाश्रयन्ति । समदमदगलबृंहितानि कलभवृन्दचीत्कृतानि चान्तरतरलतुरङ्गहेषितानि विपणिगतापणिकलोकक्रयविक्रयसम्भ्रमवचनानि चाकर्ण्यन्ते । देवालयोद्गमितधूपधूममण्डलानि बहुपरिमलानि चन्दनाचलानिलाः परस्परं विभागभाजिन इव विभज्य दिशि दिशि नयन्ति। तुङ्गधवलगृहवातायनस्था अन्तरिक्षकमलिन्य इव कमलवदना मदनातिगर्विताः समन्तात् दृश्यन्ते । इतः पद्मरागमरकतमणीनां तोरणानि गगनमण्डलमाखण्डलधनुर्लेखाङ्कितमिव रचयन्ति । इतः पौराणामक्षीणान्तरिन्दिराणां मणिमन्दिराणां हरिन्मणिशिलानि बद्धस्थलान्यङ्गणानि क्रीडाबालमरालमालिकानां शैवलजलाशयधियं वर्द्धयन्ति । अत्र निवासस्तम्भनिषण्णोत्पक्षपक्षाघातविक्षेपयज्झम्पितश्येनझम्पाप्रकम्पाकुलितस्तम्भसमुद्भ्रान्तानि शरदभ्रशोभाविभ्रमायमाणानि गगनोदरे चापाराणि पारापतमण्डलानि निर्भरं भ्रमन्ति । अत्र चन्द्रचूडनिबिडतपःखण्डनभूतदण्डस्तु कुण्डलीकृतकोदण्डः स्वगुरुनगरगर्वधरः परमरूपसम्पन्न एवावसन्नतपोधनजनमानः सुखेन खेलति रतिपतिः । अत्र कनकघटितघटीनिभतुङ्गतरशृङ्गतुलितकलधौतशैलशिखरपरम्परासु प्रतोलिकासु सततगतिरपि सततं सञ्चरन् विलम्बमान एवाम्बरान्तराले जर्जरितशरीरः कष्टेन तिष्ठति ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अत्र प्रतोलिकाशृङ्गे विश्रान्तहयस्य सप्तहयस्य हयानवलोक्य जलदमण्डलोर्जद्गर्जितान्क्रीडाशिखण्डिनस्ताण्डवाडम्बरिताः शिखण्डमण्डपान्मण्डलयन्त्युच्चतरप्रासादशिखरनिवासरसिकाः । अत्र मुक्ताफलधवलकिरणा धवलयन्तो गगनमण्डलमिन्दूपलप्रासादशैला द्रवन्तश्चन्द्रकरैर्निशि दिनकरकरसङ्गसमुच्छलत्तुहिनजलकल्लोलस्य तुहिनाचलस्य शोभां बिभ्रति । उपान्ते च उपवनराजयो दृश्यन्ते ।

जयोऽत्र कुसुमशरस्य । कुसुमधनुष्टङ्कारवशकाकुलिताः, कुसुमलतोद्भ्रान्तभ्रमरहुङ्कारपलायमानाः नगराङ्गनानां नयनोपान्तसम्पातकम्पायमानाः, अरण्यानीषु हरिणीलोचनाञ्चलश्रेणीभिरपि मुहुर्मुह्यन्ति तपोधनसमूहाः । चञ्चुपुटजर्जरितखर्जूरीपक्वफलगलद्रसास्वादनिर्जरीकृतशरीराः कीराः, पण्डिता इवाखण्डितं सुभाषितानि पठन्तस्तु लुठन्तः पादपपल्लवेषु, अभिनवगोष्ठीभिश्च रमयन्ति पथिकान् शमयन्ति च तेषां चिरभ्रमणश्रमान् । पटुतरविटपिकोटरान्तरालगताः किरातानभिसरतः सारिका धर्मोपदेशे स्थापयन्त्यो वनदेवतावचनविलासभ्रान्तिमुत्पादयन्ति । इह निर्भरमटन्षट्पदपदसंघट्टविघटितकनककेतकीपटुकुड्मलसमुच्छलद्धूलिपटलपांसुलासु वनस्थलीषु वेल्लदुत्फुल्लवल्लिकाजालजटिलतरुपल्लवोल्ललितनानाविहङ्गभृङ्गसङ्गभङ्गुरकुसुमभरगलदुत्तालमकरन्दजलकल्लोलकर्दमकर्दमिलासु कुर्दनगमना मज्जन्त इव पवना मन्दं मन्दमुच्चलन्ति । इह मृदुलपवमानवलनकिञ्चित्कणितवीणाकलकणनमूढमनसो मत्तमधुकरीझाङ्कृतिभ्रमझम्पितान्वीणासु पततः मधुकरान्समन्तात्समालोक्य किन्नराः किन्नरीभिः सहासमालपन्ति ।

अपि च—

भवति मधुरगीतं कोकिलानां कुलानां
विटपिदलपुटालीताललीलां दधाति ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इह च कुसुमवल्लीर्मन्दमान्दोलयन्सन्
स्वयमपि नटवेषं नाटयत्येष वायुः ॥१॥

अपि च—

नन्दनमिव वनमेतद्यत्र नराः किन्नरा इवाभान्ति ।
स्वरग्रवीणा वीणां क्वणयन्तो मधुरनिस्वानाम् ॥२॥

अपि च—

इति निगदिति सूते यावदुन्मेषमात्रं
रथनगणितभूमिर्द्वारिकामाप नेमिः ।
तमभिमुखमयासीत्केशवः स्यन्दनेन
प्रबलममिततूर्यं सैन्यमादाय मोदात् ॥ ३ ॥

श्रीसारस्वतमण्डनस्य विन्दुषां सन्तोषदस्यानुजे
चातुर्योचितकाव्यमण्डनधृतभ्रातृत्वसंराजिते ।
श्रीमन्मण्डनविन्दुना विरचिते श्रीमालवंशेन्दुना
चम्पूमण्डननामनीह पटलो ग्रन्थेऽभवत्पञ्चमः ॥

६

उत्तीर्णयोरथपथादथ सम्भ्रमेण
श्रीकृष्णनेमिनृपयोश्चिरकालमासीत् ।
आलिङ्गतोस्तदनुकज्जलहेमभूभृत्—
सङ्गस्य कान्तिरसितद्युतिपीतभासोः ॥१॥

अपि च—

नेमिमात्मरथं नीत्वा हेमचम्पकभासुरम् ।
पुरं निन्ये तमालेभे विद्युद्द्योतमिवाम्बुदः ॥२॥

अपि च—

लोकानेकान्तसुभगान् सन्नमांश्च समन्ततः ।
आलोकयन्नथ प्राप्तो नेमिनाथश्चतुष्पथम् ॥३॥

अपि च—

नीराजनाविराजितवदनः सदनेषु कृष्णनाथस्य ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यदुजननयनानन्दश्चन्द्र इव नवोऽभवन्नेमि ॥४॥

अपि च—

सद्वृष्णिना कृष्णेन सह नानाक्रीडनेन क्रीडतस्तस्य प्रचण्डदोर्दण्डमण्डपविश्रान्तसौन्दर्यशौर्यश्रीपरमरमणीयाकारस्य कुमारनेमेर्विवाहकार्यं निष्पादयितुं मुदितमनाः सपदि शिवादेवीं समुद्रविजयराजानमयमाह्वयांचक्रे उपक्रान्तकौतुकश्चक्रपाणिः । शिवादेवीसमुद्रविजययोर्द्रुतमायातयोस्तयोरपि दर्शनेनानन्दमयो भवति स्म सुस्मितमुखः कृष्णः ।

अपि च—

दुर्जयगर्वपर्वतायमानसर्वमानवपतिमानविक्रमाखण्डखण्डनाखण्डलोग्रस्य उग्रसेनस्य कन्या राजिमतीति नाम्ना आम्नायशुद्धचारुगुणा वर्ण्यते स्म कयाप्युग्रसेनशुद्धान्तवध्वा ।

तथाहि-कुङ्कुमाङ्कपङ्किलमिवेलातलमस्याश्चरणरागरञ्जितं शृङ्गारितमिव निपतितकोकनददलभङ्गभ्रान्त्या षट्पदमालिकाभिरभिगम्यते, बालिकाभिश्च नम्यते । कनकनूपुरच्छद्मना चरणपद्मद्वन्द्वंनिषेव्यते, सुवर्णेनाङ्गकान्तिविजितवर्णेनास्याः प्रसादमासादयितुम् । अस्या बाहुयुगभ्रूयुगलेन काञ्चनेन्द्रनीलवल्लीद्वयशोभां विभज्य भज्यते । अस्या बिम्बाधरद्वन्द्वबिम्बं विकासिहासधवलिमधवलितवक्षःस्थलतरलेन्द्रनीलहारमभ्यन्तरोद्भिन्नकुसुमसमुहं बालप्रवालयुगलं हसति । सरलः कुन्तलकलापः कालिन्दीजलमिन्दीवरं हसति लोचनश्रीश्च । अस्याः सहासेन वचनविलासेन निर्मलसुधाकल्लोलधवलधाम्ना सह स्पर्द्धमान इन्दुः सुधाबिन्दूयते । अस्याः कोमलकरतलरागमवलोक्य माणिक्यचयः स्वरङ्गमङ्गीकरोति, लज्जामवजानन् तदुपलकुलसहजकाठिन्यम् ।

अस्याः स्थलकमलिनीकोमलशरीराया नितम्बबिम्बविलम्बमानमेखलेन्द्रनीलमालिका अन्तःकिञ्चित्क्वणत्किङ्किणीभि-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्कारधारिणी परिमललुब्धेन्दिन्दिरसुन्दरदामरमणीयतामव-लम्बयति ।

अपिच–

अस्या दृष्टिरनञ्जनापि मधुपश्रेणीसमैणीदृशः
कण्ठे मौक्तिकमालिका जनदृगान्दोलाय दोलायते ।
आलप्तिः सुमनोहरा मधुलसत्सङ्गीतभृङ्गीध्वनिः
मूर्त्तिः सन्नतिशालिनी स्मरधनुर्वल्लीव सल्लीलया ॥१॥

इत्यगण्यलावण्यचन्द्रोदयभूषणां क्षणदामिव राजिमतिं संवर्ण्य साऽवरोधवधूचकोरी विरराम ।

अन्यच्च–

तमेव देवकीसूनुः कन्यामन्यां जगत्रयात् ।
नेमये समये तस्मिन्नुग्रसेनमथार्थयत् ॥ १ ॥

अपि च–

प्रार्थनां नान्यथा चक्रे चक्रपाणेः कृपानिधेः ।
उग्रसेनो विनोदाम्बुपूर्णोऽम्बुद इवोल्लसन् ॥ २ ॥
विवाहकौतूहललोलचित्तोऽभवत्सुतायास्तदनूग्रसेनः ।
द्वारावतीं वृष्णिपतिर्ययौ च प्रमोदसूर्योल्लसदाननाब्जः ॥३॥

अन्यच्च–ततः कन्याविवाहसमये उग्रसेननृपानन्दपूर्णेन्दु-महोदये परममुदितजनताविदनकुमुदवनमुन्निद्रमुद्रमभवत्, द्राक् मधुरतरं सरोवरायमाणं मथुरापुरं च । नानाविधविवाहविध्युक्त-कर्म निर्माण निपुण रमणीगण सञ्चरणासञ्चरणक्वणत्कङ्कणमञ्जु-शिञ्जाननूपुरकलकलभ्रियमाणगर्भमभूत् अन्तःपुरं च । अ-गण्यपुण्यपुरन्ध्रीसान्द्रधवलध्वनिमङ्गलवाद्यनादगर्जितप्रासादशैल-मालम्, विनोदमोदमाननगराङ्गनाजनारब्धमृदुमृदुमृदङ्गला-स्योल्लासितराजाङ्गणम्, नानालङ्कारशृङ्गारितचतुरपौरपरम्परा-ङ्गपरिमलबहलितवीथिकासनाथम्, रसालतरुदलनीलिमविट-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



म्बिमहानीलशकललितितोरणमालिकाविराजिराजपथम्, उचितरचितहासगोष्ठीभासमानसानन्दसमानजनरदनचन्द्रिकाकान्तिमण्डलचन्द्रमण्डलितमण्डपतलम्, मण्डपायमानगगनविडम्ब्युद्दण्डमण्डितरुचिरोल्लोचपवनवेल्लत्पल्लवोल्लत्कीलितकलधौतक्षुद्रघण्टिकापटुक्वणितपूर्णीकृताधोगायकवांशिकवेणुश्रुतिसंदर्भम्, नीलमणिमाणिक्यमुक्ताफलतोरणमालाकिरणचयरञ्जितमन्दिराजिररचिताभङ्गचारुचतुष्कनिष्कलङ्कभूप्रदेशम् ।

इति व्यतिकरेऽन्तःपुरे महामहानसमध्येऽध्यक्षसुपकाररचिता विशालकनकशिलातलकण्डितसमिता पिण्डनिर्मितडिण्डीरपाण्डुरमण्डकराशयोऽभूवन्, तुहिनाचलनिर्मलाः, घृतपुराश्च कर्पूरपरागपाण्डुराश्चन्द्रमण्डलानि विडम्बयन्तोऽन्तरुदारशर्करापूरशुद्धसुधारसाः, लड्डुकाश्चामृतगड्डूका इव स्वादुमृदवः सर्वान्नप्रसन्नकलशा इव, मधुशीर्षकशिखरिणीपानकानि जिह्वारञ्जनानि नानाव्यञ्जनानि च ।

किञ्च—एतस्मिन्नन्तरे वरागमनतरलमनस्कः स्फुरल्लोचनाम्भोजस्तु भोजयामासोग्रसेनो व्यग्रमनाः अष्टवर्ग्यान् सकलसामग्र्याढ्यमतिर्विधिना साधुनाऽऽत्मवर्ग्येण सह विहितकुलधर्मारम्भः शुभवेलायाम् ।

अन्यच्च—तत्र विचित्रसदकमोदकादनमोदमानाः, उत्फुल्लोदरगल्लाः, कल्याणकथाः कथयन्तः सन्तः सन्तोषमापुः। केचिदकष्टं घृतान्तर्घृष्टजर्जरितलड्डूकचूर्णान्यदन्तः, दन्तोत्पीडितसृक्किसर्पत्सर्पिष्प्रवाहा घृतवाहा इव रेजुः । कासांचिदवरोधवधूनां मेखला अपि न ननन्दुः शिञ्जितानि विस्मृता इवोदररुद्धावकाशाः।

अपि च—

हेमस्तम्भिनि मण्डपे मरुवकप्राचीनपीनद्युतौ
कर्पूरागरुपुष्पसौरभमिलद्भृङ्गौघतूर्यध्वनौ ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यावत्तिष्ठति भूपतिः स वरमाख्यातुं समभ्यागतो
दूतः श्रीहरिणा समुद्रविजयक्ष्मापेण संप्रेषितः॥१॥

अपि च—

वर इह मथुराया बाह्यदेशं प्रपन्नो
वचनमिति च तस्याकर्ण्य दूतस्य वेगात् ।
निजगणपरिवृत्तः प्रोन्नदद्दूर्यतूर्यः
प्रतिगमनमकार्षीदुग्रसेनः ससैन्यः ॥ २ ॥

अपि च—

नेमिं समुद्रविजयं कृष्णं चालोक्य भूपतिः ।
अवातरद्रथात्सैस्तु समालिङ्गि यथाक्रमम् ॥ ३ ॥

अपि च—

तस्मिंस्ततस्ते मिलिता विरेजुर्बन्धूपमाःस्नेहलदृग्विलासाः ।
धर्मार्थकामा इव मोक्षयुक्ताःकालेन केनापि वियुक्तयुक्ताः॥४।

अपि च—

वरं पुरस्कृत्य ततो वरेण्यं त्रयः पुरं ते विविशुर्नरेन्द्राः ।
हिमाद्रिमेर्वञ्जनपर्वतानां शोभां दधानाःपुर इन्दुभाजाम्॥५।
हयरथगजपत्तिस्फारनिर्घोषभृद्भ्या-
मुभयबलभराभ्यां मीलिताभ्यां तु भेजे ।
सुहृदुपगमाभ्यां प्राच्यवाच्यम्बुधीनां
छविरविरलभङ्गप्रोच्छलन्निस्वनानाम् ॥ ६ ॥
ततश्च कनकगिरिशिखरगरिमधराः काञ्चनोपकार्याः ।
पर्याकुलाःउद्यत्किरणरत्नगणतोरणध्वजराजिभिः॥७॥
ददावुग्रसेननृपतिर्वरनिवेशाय वराय सकलमपि सैन्यमन्य-
यदूनां यथायोग्यभोग्येषु स्थानेषु न्यवेशयत् ।
श्रीसारस्वतमण्डनस्य विदुषां सन्तोषदस्यानुजे
चातुर्योचितकाव्यमण्डनधृतभ्रातृत्वसंराजिते ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रीमन्मण्डनविन्दुना विरचिते श्रीमालवंशेन्दुना
चम्पूमण्डननामनीह पटलो ग्रन्थेऽभवत्षष्ठमः ॥

अपि च— ७

ततो लुलद्विचित्रपत्रपाश्याः, शोभिमुक्ताफलवालपाश्याः, भूषाभूषितशिरोरुहाः, महतां महिलाशालिन्यः, प्रोल्लीलवाल्हीकगन्धसारघनसारसारगन्धबहलिताः, पतिव्रताः पुत्रवत्यः सत्यवचना उद्वर्तनाभ्यङ्गं राजिमत्यै चक्रुः, शातकुम्भकुंभैर्निर्मलजलवर्षिभिश्चतुर्भिः । सा च राजिमती दिग्वनीताप्रान्तमिलितचतुरम्बुदाम्बुधारासिक्तकाञ्चनवल्लरी इव सुन्दरी व्यरुचत्, अन्तर्मिलज्जलबिन्दुचारुचन्द्रककबरीकलापधरी मयूरी इव निर्भरमानन्दभरिता नेमिकान्ताम्बुवाहोदये महोत्साहमये अच्छतरांशुकनिर्णीरितशरीरा स्फुरदुरुचामीकरकान्तिः विमुक्तविलम्बमानलम्बालकप्रकरा चरन्ती काञ्चनकमलिनी इवोपरिमिलत्पटलितरोलम्बमालिकासमुहा ।

अपि च—

ततस्तरलितमना अपि सा प्रसादसुमुखी चन्द्रमुखीभिः परिकर्मनर्मधारिणीभिर्धर्मचारिणीभिस्तिरस्करिणीमाबध्य चकितहरिणीविशाललोचना ।

इति व्यतिकरे निष्पादितोद्वर्त्तनकलधौतकलशस्नाननेपथ्यविधानः, स्वरूपसम्पन्निधानविधुरितमथुरापुरवधूसमालोकनदरिद्रमुद्रनयनमहादरिद्रः, ताण्डवितरत्नकुण्डलकान्तिमण्डलमण्डलितकपोलस्थलः, स्फुटद्रत्नकिरीटज्योतिष्पटलपटलितछत्रतलः, नभःखण्डसङ्गतमार्त्तण्डविडम्बिशरीरः, स्फुरच्छरीरमरीचिवीचिकासमीचीनमाणिक्यसुवर्णालङ्कारः, नेमिनाथस्तुङ्गं तुरङ्गमारुरोह मोहनमूर्तिर्जननयनानाम् ।

अपि च—

पटुतरपटहानां झल्लरीमर्दलानां

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रबलमदगलानां घण्टिकानां च नादैः ।
किमिति चकितचित्तान्दोलितैर्नाकलोकै-
र्वर इति मधुरश्रीर्नेमिरालोक्यते स्म ॥ १ ॥
निरन्तरं यादवराजसैन्यप्रोल्लासिसामन्तधृतातपत्रैः ।
निःशेषमन्तर्मुषितार्करश्मि धरातलं मण्डयितुं नु रेजे॥२॥
तत्र चरद्गजरथाश्वपदातिभार-
क्षुण्णक्षितिप्रचलितो रजसां महौघः ।
सद्यो मुषाण किल चौर इवार्करश्मि-
रत्नानि सम्प्रति दिवापि निरीक्षमाणः ॥३॥

अपि च—

ययावथो मण्डपमुग्रसेनमहीपतेर्नेमिरतुल्यरूपः ।
अनर्घ्यलावण्यविमोहितानां दृक्सन्निपातैः सह माथुराणाम् ४

अपि च—

स मण्डपद्वारिगतः प्रमोदात्क्रन्दारघोरान्हृदयप्रभेदि ।
पशून्गले गाढतरं प्रबद्धान्समीक्ष्य नेमिर्विषसाद साधुः ॥५॥

अपि च—

अमी निर्यदसवः पशवः कथं समानीताः ? शङ्कुभिः सह प्रभिन्नहृदयाः, बद्धाः, बन्धनिरुद्धगलकन्दलसमुच्छलत्कीलाः, लालभ्राहान्वमन्तः, समन्ततः प्रततं निष्पीडितकण्ठघोरतरघर्घर-रवाद् 'भवादुपरम' इति मां कथयन्तः, इव 'अद्य निन्द्यजीवितम्' इति पृच्छन् स्वच्छचित्तो नेमिः कृष्णेनाभिहितः प्राघूर्णकाय भवते प्राघूर्णकाचारार्थमुपालम्भः संभविष्यत्येतेषामिति संभाव्यते।

अपि च—

विवाहमाङ्गल्यं शल्यमिति ब्रुवाणः करुणापरायणःसमुद्रवि-
जयतनयोऽपि चेतसि विचिन्तयन्नाह—
जलशाड्वलसंवृद्धान् पशून्शून्यनिवासिनः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विनाऽपराधं बाधन्ते दुष्टाः कष्टं जीवितम् ॥१॥

अन्यच्च—

कुमुदोदरमन्दिरतो येन लब्धोऽर्कतोऽपि सन्तापः ।
सोऽपि निपतितो भृङ्गस्तुङ्गत्विषि गहनजे दहने ॥ २ ॥

स एवं विचार्य परमार्थधैर्यः सूर्य इवास्ताचलात्तुङ्गात्तुरङ्गादवतीर्य द्रुतं दुद्राव । प्रमोदशून्यानि राजन्यानि नलिनवनानीव मलिनानि तमोवृतानीव श्यामायमानानि वनानीव दवदहनक्रान्तानि दुःखीकुर्वन् जीवव्रजानां मूर्च्छाप्रपन्नानां घन इव जीवनं विक्रान्तानां सस्यानामात्मानं दर्शयन्नदर्शनं गतवान् ।

अन्यच्च—

अत्रान्तरे राजिमती गौरीं पूजयन्ती पवनाहता वैजयन्तीव पपात 'वरोगतः' इति विलपन्तीं जनतामालोक्य चण्डवाताहता कनककदलीव भूयसा धरणिघातेन मुहुर्मुमोह । ततोऽदभ्रभ्रमत्कोलाहलाभिरङ्गनाभिर्जलार्द्रतालवृन्तशीतलानिलैर्विनीतमूर्च्छा व्यबुध्यत मृतोत्थितेव ' हा दैव किम् ' इति विलपन्ती मातापित्रोर्हृदयशिलाशकलकारिणी टङ्किकेव मुहुर्विललाप ।

अपिच—

अधुना प्रिय ! हा विहाय मामपराधेन विना गतोऽसि किम्।
करुणा त्वयि चेद्गरीयसी मयि काठिन्यमकारि किं पुनः॥१॥

अपि च—

विधिना किल वैरिणाऽमुना विहिताहं न मृता न जीविता।
पतितापि विलम्बवल्कला द्रुमशाखेव कुठारखण्डिता ॥ २ ॥

अपि च—

अपि देव ! मया हाऽभव्यया प्रतिकूलं रचितं महत्तव ।
अधुनैव विवाहयोगतो विगतो राज्यमपास्य यद्भवान् ॥३॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अपि च—

प्रिय ! शून्यमिदं त्वया विना यदुराजन्यमवेक्ष्यते जनैः ।
जलसेकविवर्जितं स्थले कमलानामिव वृन्दमाकुलम् ॥४॥

अपि च—

उपलादपि योषितः परं कठिना इत्यवगम्यतेऽधुना ।
तव निर्गमशोकयन्त्रिकानिहतं मे हृदयं न भिद्यते ॥५॥

इति बहु विलपन्ती राजिमत्याकुलाङ्गी
नयनयुगलनीरैः पङ्किलीभूतभूमिः ।
अगमदनु च नेमिं तं स्मरन्ती च चित्ते
द्युतिरिव नलिनीशं प्रस्थितं पश्चिमायाम् ॥६॥

प्रचण्डमार्त्तण्डकरातपतप्तशर्करिलज्वलदिलातलजनितस्फोटदूषिताभ्यां पद्भ्यां स्खलन्तीं राजिमतीं पृष्ठत आयान्तीमालोक्य कूर्मकवचकठिनहृदयो नेमिर्मुहुः पलायनपरो बभूव ।

अन्यच्च—तस्मिन्वने विशीर्णद्रुमपर्णराशिविलुप्तमार्गप्रदेशे अज्ञातमार्गा मुक्तकेशी सा दुःखिता टिट्टीभीव पटुना शब्देन पुनर्विललाप कम्पमाना शोकस्फुटितहृदया ।

अपि च—

चलानिलान्दोलितपल्लवं त्यजन्निजं तारतुषारबाष्पतः
तद्दुःखतोऽतोषधरं रुरोद किं निशम्य परिदेवनं वनम् ॥१॥

अपि च—

रैवतकगिरेरुपान्तं प्राप्तो नेमिस्ततो ददर्श, हृदया[illegible]कं वनम्, चञ्चरीकचरणदलितदलकनकचम्पकबहुलमुकुलबहुलसमुच्छलितरजःपुञ्जपिञ्जरिततरुवलयमलयपवनमन्दमन्दान्दोलितमाकन्दराजिमञ्जरीपल्लवगलदमलमकरन्दलवकृतास्वादमुदितमेदुरभ्रमदलसविलसद्भ्रमरमधुरझाङ्कारदुःखविकारहारि, कुसुमभरामितनमिततरुवरच्छादितधरातलसमासीनकिन्नरगणवीणा-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रवणनसमाकर्णनलीनकर्णविस्मृतान्यपथमृगयूथमृगमदपरिमलब-हलधृतमदमदनकोदण्डदण्डितसर्वगर्वधराराातिगर्वधनम् , घनत-रघनसार वल्लरीपरी तदिनकरकर जाल मञ्जुकुञ्जनिली नतपोधन-ध्यानवर्द्धनम् ,अमितलवङ्गलतालिङ्गिततुङ्गपूगतरुतरुणजनमनोवि-नोदकारि, विसारिवारिनिर्झरझम्पितानेकपक्षिकुलकोमलकलक-लानन्दि, प्रबलतरुदलनिबिडपटुसम्पुटमन्दिरसुप्तेन्दिन्दिरयोगि-जनानन्दकरम् , कर्पूरकदलिकावनविकासिकर्पूरगन्धबन्धननि-ष्पन्देन्द्रनीलमुद्रालिमालिकाहारबुद्धियक्षबालिकासमूहमोहनम् ।
अपिच—

कोकिलालापमाधुर्यदुःखवैधुर्यदायकम् ।
आलोकयन्स्वनं नेमिर्ययौ रैवतकं गिरिम् ॥ १ ॥

निर्मलजलच्छायाहारि स्फुटत्स्फटिकतटरुचिरचितदिवानि-शम् , निशाकरोदयमभ्रभङ्गितुङ्गशृङ्गसङ्गिशातकुम्भकुम्भनिभभा-नुबिम्बमादधानम् , अतुलकलधौतकलसलसन्तम् , श्रीभग-वतो जिनेश्वरस्य प्रासादमिव प्रसादमापन्नम् , उपरिमिलज्जलद-पटलविशालरचितातपत्रसफलितधराधिनाथशब्दम् , शिखरपर-म्पराप्रचलदुत्तालनिर्झरजलकल्लोलबहुलकलकलभ्रियमाणकन्द-रामन्दनिनादमन्दितचतुरुदधिसमुच्छलद्वेलाचटुलतरङ्गरिङ्गणध्व-निम् , इन्द्रनीलमयसुनीलनितम्बस्थलगगनाधिरूढप्रौढप्ररोह-समूहसमुत्पादितश्यामलवनराजिधियम् , प्रबलमणिशिलास्फाल-नजर्जरितनिर्झरजललवपटलाकाण्डमण्डितप्रावृडाडम्बरम् , अम्बर-चुम्बिजम्बुपुष्पस्तबकलम्बमानरोलम्बमालम् , मञ्जरितकरञ्जमञ्ज-रीरजःपञ्जरितविविधतरुवनमञ्जुशिञ्जानकपिञ्जलकुलम् , सर्व-र्तुसमम् ।

इति व्यतिकरे दुर्द्धरकान्तारान्ते संचरणे सति मणिशि-लाशकलतिक्ष्णधाराव्रणदलितजपाकुसुमदलसदृशचरणकमलतल-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गलद्बहलशोणितरञ्जितरैवतपर्यन्तमार्गा'हादेव' इत्यार्त्तस्वरां सुकुमारां राजिमतीमतिविवशां हृदयान्तराले ध्यानाधीनभर्तृपदयुगलं चिन्तयतीं ज्ञानदृशा विलोक्य नेमिः करुणापरायणः सेवकलोकशोकहरणः प्रकटीबभूव ।

अपि च—

तस्य वीक्ष्य शशिबिम्बविनिद्रं प्रस्फुरद्द्युतिमयूखविभूषम् ।
सुस्मितं वदनमाशु मुमोच क्लेशमन्धतमसं सहसा सा ॥१॥

अपि च—

तेन साकमिति सा च बभाषे संनिपत्य पदपङ्कजमूले ।
अष्टजन्मजनितो ननु सार्थः त्यज्यते किमधुना किल नाथ॥२॥

अपि च—

बाले ! बालमृगाक्षि ! मा कुरु मृषा दुःखाभिभूतं मनः
पूर्वं चापि तपश्चचार भवती सार्द्धं मया तत्स्मर ।
आत्मज्ञानमुपेत्य सत्यवचसा श्रीनेमिना नोदिता
प्राप्ता राजिमती परं पदमथो नेमिः स्थितो रैवते ॥३॥

मुमुदे तत्र तुङ्ग स शृङ्गमारुह्य भूपतिः ।
विडम्बयन्भानुबिम्बमुदयाचलसंस्थितम् ॥ ४ ॥

अपि च—

निःस्नेहोऽप्यक्षयज्योतिर्निर्दशोऽपि दशान्तरम् ।
आदधानो महाधैर्यः शून्यदीप इवाबभौ ॥ ५ ॥
अन्तर्लीनमहाज्योतिर्निश्चलः शिखरे गिरेः ।
कुन्दद्युतिः शरत्काले विद्युद्गर्भ इवाम्बुदः ॥ ६ ॥

अपि च—

तृष्णाहरो निराधारो जीवत्राणपरायणः ।
कृपाजलभराधारस्तडाग इव निर्मलः ॥ ७ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आत्मानो झञ्झणस्यामितगुणनिधयश्चाहडो बाहडाख्यो
विख्यातो देहडोऽथ क्षितितलसुखदा पद्मसिंहोऽल्हराजः ।
पाहूश्चैते जिनेशप्रणतिपरिणता मण्डपे धर्मधुर्याः
श्रीमन्नालमसाहिक्षितिपतिविषये मुख्यतामेत्य रेजुः ॥८॥
तेषां सोनगिरान्वयस्य विलसद्भूषामणीनामिह
श्रीमद्बाहडसङ्घनाथतनयः श्रीमण्डनाख्यकविः ।
चम्पूमण्डनमेतदार्यचरितश्चक्रे परं पावनं
सद्यस्तद्विदुषां सुखाय भवतान्नेमेः प्रसादश्रिया॥९॥
श्रीसारस्वतमण्डनस्य विदुषां सन्तोषदस्यानुजे
चातुर्योचितकाव्यमण्डनधृतभ्रातृत्वसंराजिते ।
श्रीमन्मण्डनविन्दुना विरचिते श्रीमालवंशेन्दुना
चम्पूमण्डननामनीह पटलो ग्रन्थेऽभवत्सप्तमः ॥

संवत १५०४ वर्षे मार्गशिर्षकृष्णप्रतिपदि बुद्धदिने लिखितं विनायकदासेन ।

संवत १५०४ वर्षे शाके १३६८ प्रवर्त्तमाने आषाढशुक्लत्रयोदश्यांसोमदिने तारापुरस्थाने पुस्तकमलेखि शुभं भवतु ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अर्हम्

श्रीहेमचन्द्राचार्यग्रन्थावली

मण्डनग्रन्थाङ्कः

# श्रीचन्द्रविजयप्रबन्धः

कदाचिदाप्तैः कविभिः समेतो वाचांनिधिर्मण्डनमन्त्रिराजः ।
सायं दिने सौधगृहाङ्गणस्थः साहित्यगोष्ठीं सरसामकार्षीत् ॥१॥
सभामिवालोकयितुं तदीयां कलानिधिः कौशलशालिनीं ताम् ।
कृताभिलाषः किल गन्तुमैच्छत्समुन्नतं पूर्वमहीध्रसौधम् ॥ २ ॥
ततो दरस्रस्ततमिस्रकेशा प्रवृद्धसत्त्वा प्रमदेव भूयः ।
अन्तर्वहन्ती हरिणाङ्कबिम्बं पौरन्दरी पाण्डुमुखी दिशाऽऽसीत् ॥३॥
सद्भिः सनाथीकृतमभ्ररङ्गं संप्राप्स्यतश्चन्द्रमसो नटस्य ।
तिरस्करिण्या धृत एव मध्ये पुरः स्फुरन्त्या प्रभया बभासे ॥४॥
प्राविर्बभूव प्रथमाब्धिगर्भात् प्रालेयभानोः प्रथमो मयूखः ।
दिग्योषितो दर्शितपूर्वशैलकुचश्रियः क्षौमदशामकर्षुः(कार्षीत्)॥५॥
चन्द्रः कलामात्रतया समुद्यन्प्राचीदिशो भालरुचिं व्यतानीत् ।
काचित्पुनस्तत्र कलङ्करेखा कस्तूरिकाचित्रकतामयासीत् ॥ ६ ॥
कयाप्यराजत्कलया सुधांशोः पूर्वोत्थया पुष्करभागलक्ष्मीः ।
प्रदोषकालप्रियसङ्गमेन नवोदितेनेव नखक्षतेन ॥ ७ ॥
अशङ्कयतैतत्कलयाऽभिवीक्ष्यं बिम्बं विधोर्भासुरदीप्तिरेखम् ।
जनैर्जगत्सर्वमिदं जिगीषोराकर्णकृष्टं धनुरात्मयोनेः ॥ ८ ॥
दधाति यां यां दिवसेष्ववस्थां पक्षे सिते पञ्चदशी दिनान्तम् ।
तां तामवस्थां सकलामयासीदुद्यन्नुडूनामुदधेरधीशः ॥ ९ ॥
रागोत्तरश्री रमणो रजन्याः शनैः शनैरूढसमग्रबिम्बः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पूर्णोपमः पुष्करलोचनानां वक्त्रैरराजन्मदरागरम्यैः ॥ १० ॥
उत्कूलमुच्चैरुदधिं वितन्वन्रागेण साकं रमणीजनानाम् ।
मानेन निर्भिद्य महान्धकारान् चन्द्रः स्मरेणैव समुल्ललास ॥११॥
आवर्त्तवेगादमृतांशुरासीत् पयोधिमध्ये परिपूर्णमानः ।
आप्यास्तमासाद्य पुनः समक्षं पितुः प्रहर्षादिव जातनृत्तः ॥१२॥
प्राप्तोदयो मां प्रतिपद्य पूर्वं भास्वानभूदस्तगतो भवत्याम् ।
इत्येवमिन्दोरुदयापदेशात्प्राची प्रतीचीमहसत्स्फुटेर्ष्या ॥ १३ ॥
हन्तुं प्रदृप्तानसुरान्धकारानम्भोधिना सत्वरमच्युतेन ।
विमुक्तमासीद्वियदन्तराले समुज्ज्वलं चक्रमिवेन्दुबिम्बम् ॥१४॥
महेन्द्रदिङ्मौक्तिककर्णयन्त्रं मनोभुवो माङ्गलिकातपत्रम् ।
जगत्त्रयीजङ्गमदर्पणं तद्बिम्बं सुधांशोर्विमलं व्यराजत् ॥ १५ ॥
ताराऽस्थिमालाशतभूषितायाः कालान्धकारस्तनकञ्चुकायाः ।
कपाललीलामवहत्कलावान् कापालिकीवेषजुषो रजन्याः ॥१६॥
स तारकाभिः सह वार्द्धिमध्ये बिम्बं गतो व्यैक्षत शीतभानुः ।
शङ्खो हरेः पूर्वमिवाभिवीतो मुक्ताभिरात्मोदरनिर्गताभिः ॥१७॥
पत्युर्निशायाः परिपाण्डुभासो मध्ये कलङ्को मणिभङ्गनीलः ।
वियत्पथो विभ्रमपङ्कजस्य तस्यातनोत्षट्पदजाललीलाम् ॥१८॥
राजत्कलङ्कद्युतिराजबिम्बं तुषारगौरं सुतरामराजत् ।
आपूर्णिमाकालमिवात्तमुद्रं सुधाभिपूर्णं कलशं सुराणाम् ॥१९॥
मृणालगौरा मृगलाञ्छनस्य सम्पर्कभाजस्तमसा मयूखाः ।
शम्भोः कपर्दोपगता इवासन् नभःस्रवन्त्या नववारिपूराः ॥२०॥
पुष्पेषुणा पुष्करभित्तिमध्ये विलम्बितं विश्वजयैकसाक्ष्यम् ।
त्वचेव क्लृप्तं फलकं सुधांशोर्बिम्बं विरेजे विमलाभिरामम् ॥२१॥
बिम्बं तदन्तर्विलसत्कलङ्कं समुज्ज्वलं चन्द्रमसो व्यराजत् ।
मुक्तामयं मुद्रितमिन्द्रनीलैः पुरःस्थितं पेटमिव क्षपायाः ॥२२॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पातालतः पन्नगराजकन्यापर्यायपाणिद्वितयाभिघातात् ।
कामं जनः कन्दुकमुत्पतन्तं विधोरशङ्किष्ट चिराय बिम्बम् ॥२३॥
चन्द्रस्य धाराचषकस्य मध्ये सुधारसं शोषयति स्म रात्रिः ।
चन्द्रातपः छद्मनि निःसृतेऽस्मिन् कल्कं कलङ्कं कलयेव शिष्टिम् ॥
नभःपयोधौ नवमौक्तिकानां ताराकुलच्छद्मतया स्थितानाम् ।
प्रसूतिशुक्तेरकरोत्प्रतीतिं मध्यस्थितं मन्मथबन्धुबिम्बम् ॥२५ ॥
निहन्यमाना निधिना कलानां निशान्धकारा इव वेपमानाः ।
समीरणैः संततकम्पितानां छायास्तरूणां तरला व्य[वि]रेजुः ॥२६॥
दलान्तराद्दीधितयस्तरूणामनुष्णभानोरभितः पतन्त्यः ।
चकोरचञ्चूपुटखण्डनेन कीर्णा इवासन्किरणस्य लेशाः ॥२७॥
सिंहेन शीतद्युतिना विभिन्नकुम्भे तमिस्रात्मनि कुञ्जरेन्द्रे ।
तत्कुम्भमध्योदितमौक्तिकानां शोभामकुर्वन्नुडुमण्डलानि ॥ २८॥
आलिप्तसान्द्रामरचन्दनानामशेषमुक्तामयभूषणानाम् ।
अद्वैतताऽऽसीदमृतांशुपातैरदृष्टिहेतोरभिसारिकाणाम् ॥ २९ ॥
परं वितन्वन्परितापमेव पदे पदे पान्थविलासिनीनाम् ।
स कालकूटेन सहोदरत्वं प्रायो हिमांशुः प्रकटं व्यतानीत् ॥३०॥
गवाक्षमार्गेण गृहान्तरेषु कलानिधेः केऽपि कराः पतन्तः ।
तत्र व्यराजंस्तरलेक्षणानां विमोहनायेव वियोगभाजाम् ॥३१॥
तेजस्तिरस्कृत्य चिरं परेषां वियत्सभायां विहिताधिराज्यः ।
राजा रजन्या सहितो रमण्या पश्चाद्गिरिं सौधमगाद्विहर्त्तुम् ॥३२॥
जैवातृको जालिकवत्समन्तात् विक्षिप्य विस्तारितमंशुजालम् ।
सङ्गृह्य ताराशफरानशेषान पुनर्ययौ पुष्करतः परस्तात् ॥३३॥
सोमेन रात्रिः सुचिरोपभुक्ता समुच्छ्वसन्तीव मुहुः समीरैः ।
विच्छायतारा प्रसवान्धकारकेशा भृशं खेदवतीव जाता ॥३४॥
विकर्त्तने क्वापि गते विलासी तस्यावरोधे विहरन्नभोऽन्ते ।
समीक्ष्य शङ्कतमुपेतमिन्दुर्भयादगात्पश्चिमवर्त्मनेव ॥ ३५ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पथा चरन्येन पपात पूषा तमेव दैवात्समुपेत्य भूयः ।
पपात चन्द्रोऽपि परं पतिष्णोर्नश्येद्विवेको ननु जानतोऽपि॥३६॥
प्राचीं विहाय प्रथमोपपन्नां प्राप्तं सरागं प्रतिगृह्य पूर्वम् ।
वेश्येव कृत्वा विवसुं क्रमेण विवासयामास विधुं प्रतीची ॥३७॥
निधिः कलानामपि निर्मलोऽपि सतां पुरोगोऽपि समुज्ज्वलोऽपि
पतिर्द्विजानामपतत्किमन्यत्स वारुणीसङ्गमुपेत्य चन्द्रः ॥३८॥
अनुद्रुतः सन्किरणैरनूरोरपांनिधिं पश्चिममन्तरिक्षात् ।
विगाह्य तद्वीचिषु बिम्बलक्ष्याद्भयादिवाकंपत यामिनीशः ॥३९॥

तदनु निजरिपुं तं चन्द्रमाक्रम्य भानुः
सकलमपि च हृत्वा तस्य चैश्वर्यजातम् ।
अपरशिखरिशृङ्गादात्मपादोपघातैः
पयसि चरमसिन्धोः पातयामास भूयः ॥ ४० ॥

चन्द्रं समालोक्य स मण्डनेन्द्रः चण्डत्विषा खण्डितसर्वलक्ष्मीम् ।
तस्यैव संदर्भबलादधत्त वाञ्छां जयं वर्णयितुं सुधांशोः ॥४१॥

इति श्रीमालकुलतिलकस्य मण्डनामात्यस्य कृतौ चन्द्रविजये
प्रस्तावना नाम प्रथमः पटलः ॥

अस्त्यम्बुराशिः पतिरापगानां महानसं मन्मथशासनस्य ।
सत्त्वाधिकं यं समुपेत्य शैला दीव्यन्ति दम्भोलिभयानभिज्ञाः॥१॥
जाया हरेर्यज्जलमानुषीका फेनानि पीयूषरसो यदीयः ।
चिन्तामणिर्यत्सिकताविशेषो मन्दाकिनी यस्य च वामनेत्रा॥२॥
उदारवृत्तेरुदधेरमुष्मादुष्णांशुरुच्चैरुदभूदुदग्रः ।
पिता च यस्याम्बुनिधिः प्रतापं शुष्यत्यलं सोढुमशक्त एव॥३॥
वहन्नसौ मण्डलमात्मरक्तं नवोदये दर्शितसौम्यवृत्तिः ।
पश्चात्प्रतापेन निरूढमूलः सर्वं करैस्तापयति स्म लोकम्॥ ४ ॥
स कौशिकोन्मेषहरप्रतापः सर्वात्यलङ्घ्युग्रकरप्रचारः ।
दिने दिने दाव इवात्तमूर्तिर्दशास्यवद्दर्शयति स्मतैक्ष्ण्यम् ॥ ५ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



समाहरन्सारमशेषमुर्व्याः करैः प्रकामं कठिनायमानैः ।
सतां समुल्लासहरप्रवृत्तिः कस्यापि नानन्दकरो बभूव ॥ ६ ॥
स जातमात्रः सविता पयोधेः सकाशमुन्मुच्य समग्रगर्वः ।
सर्वत्र सोऽहं सवितेति नाम पुनः समुद्घोषयति स्म पूषा ॥७॥
उन्मेषदः पङ्कजमण्डलानामुन्मार्गवर्त्ती स्वयमुग्रतेजाः ।
स पद्मिनीभिः सह पुष्पिणीभिः सदा विजह्रे सरसाभिरर्कः ॥८॥
संत्यज्य सर्वाभ्युदयस्य हेतुं प्राचीं दिशं प्राक्तनधर्मपत्नीम् ।
स पश्चिमामेव समाजगाम पतिष्यतां पापरता हि वृत्तिः ॥ ९ ॥
स वारुणीसङ्गवशेन सद्यस्त्यक्ताम्बरस्थैर्य विना कृतश्रीः ।
मदेन मन्दीभवदात्मतेजाः पाश्चात्यभावं पतितः प्रपेदे ॥१०॥
पुत्रस्य पूष्णः पुनरेष वृत्तिमेतादृशीं वारिधिरीक्षमाणः ।
अमन्यतात्मानमपत्यहीनं वन्ध्यत्वमेवालमसाधुपुत्रात् ॥११॥
ततः कुलोत्तारकमेकमन्यं लब्धं कुमारं रमणो नदीनाम् ।
स्वमध्यभाजं सुचिरं तपोभिः मुरारिमाराधयति स्म शङ्के ॥१२॥
ततश्चिरात्सत्त्वनिधेरमुष्य पुराकृतैः पुण्यतपोविशेषैः ।
चन्द्रस्तनूजः सकलोत्तरश्रीर्लक्ष्म्यभिधायामुदभूद् गृहिण्याम् ॥१३॥
तं जातमात्रं तनयं पयोधिः विलोक्य शश्वद्विमलप्रकाशम् ।
उदूढवृद्धिः स्वयमुत्सवेन बभार विश्वाधिकं प्रहर्षम् ॥ १४ ॥
तमङ्कमारोप्य तरङ्गहस्तैः पुष्यत्पयोबुद्बुदरोमहर्षः ।
स लालयामास तदोपगूह्य सरित्पतिः सान्द्रतरप्रमोदः ॥१५॥
स जातसंस्कारविधिः क्रमेण प्राच्या दिशा प्रेमजुषेव धात्र्या ।
अवर्ध्यतादाय पितुः सकाशात्कुमुद्वतीनामधिपः कुमारः ॥ १६ ॥
समेधयन्ती चरमाथ सन्ध्या धात्रेयिका दत्तकरावलम्बा ।
सञ्चारयामास तटाजिरेषु बालं निशावल्लभमम्बुराशेः ॥ १७ ॥
अन्ते वसन्नभ्यधिकोन्नतस्य गुरोश्चिरायोदयपर्वतस्य ।
पुत्रो निधेः प्रौढवपुर्जलानां पूर्णःकलाभिःप्रबभूव कालात् ॥१८॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कलानिधिः कामुकचक्रवर्त्ती कान्त्या स्फुरन्त्या कमलेक्षणानाम् ।
कासां न चित्ते विषमेऽपि भूयः ........................... ॥ १९ ॥
स शीतभानुं सवितुः प्रियं तं समीक्ष्य चण्डद्युतिराहितेर्ष्यः ।
तमेव हन्तुं समुपोढवैराशङ्के सदा रन्ध्रसमीक्ष्यकोऽभूत् ॥२०॥
तमूढवैरं शशलाञ्छनोऽपि विलोकयन्नात्मनि वीतभक्तिः ।
विपत्तिमाशङ्क्य निजाममुष्मात्तत्याज तस्मिन् सहवासमेव ॥२१॥
स हन्तुमेनं तमसौ च हन्तुं परस्परं बद्धरुषावभूताम् ।
एकामिषत्वं हि सहोदराणां तनोति सापत्न्यमनर्थहेतुम् ॥२२॥
ततः प्रदोषस्य सुतां निशम्य पत्युर्महाभाग्यदलक्षणाढ्याम् ।
यूनः करे योजयितुं विधोस्तां निशाममुं नीरनिधिर्ययाचे ॥२३॥
तथेति तस्मै तनयां प्रदातुं निशामनेनाध्वनि नीयमानाम् ।
रुरोध सोमस्य रिपुर्विवस्वान् प्रदोषशत्रोः प्रियमित्रमह्नः ॥२४॥
तामुष्णभासा तनयां निरुद्धां श्रुत्वा प्रदोषाधिपतेः स्वकान्ताम् ।
बलेन हर्तुं विधुराचकाङ्क्ष वैरस्य मूलं वनिता हि पुंसाम्॥२५॥
सुधाकरः स्वं श्वशुरं तमेव वरूथिनीनामधिपं विधाय ।
प्रास्थापयत्तान्प्रतिरोद्धुमुर्व्यां करप्रचारान्कठिनांशवीयान् ॥२६॥
सचक्रयुक्तः शशलाञ्छनोऽपि सायं मुहूर्त्ते सकलाभिनन्द्ये ।
प्रस्थापितस्तद्विजयाय पित्रा प्रापोदयाद्रेः कटकं प्रहृष्टः ॥ २७॥
विसृज्य पूर्वं विधुरंशुदूतं विषादिनीं तां विरहेण रात्रिम् ।
श्वसत्समाश्वासयति स्म यूनोः सन्देशवार्त्ता खलु सञ्जकल्पा॥२८॥
सर्वं जगच्चन्द्रमसो गुणेन बद्धं जहर्षांशुमतो विपत्तौ ।
खरैः प्रतापैः कठिनात्मनोऽत्र को वा विपत्तौ कुशलाय साह्यः ॥
चन्द्रं समाकर्ण्य निजं सपत्नं स तारकासैनिकमापतन्तम् ।
स्वयं च तस्याभिमुखो बभूव स योद्धुकामः शतपत्रबन्धुः ॥३०॥
वृद्धोऽपि विश्वेन समुज्झितोऽपि वीतप्रतापोऽपि रुषा विवस्वान् ।
तेनैव योद्धा स बभूव राज्ञा सदाभिमानैकधना हि शूराः ॥३१॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



समन्ततो व्योमनि सञ्चरन्तः सायं विहङ्गाः स्वनिवासलोलाः ।
सन्धिं तयोः कर्तुमिव प्रवृत्ताः महाजना मध्यगता इवासन् ॥३२॥
काकाश्चरन्तः कतिचिन्नभोऽन्ते तयोर्द्वयोरन्तर एव विश्वम् ।
ग्रहीतुकामैः कितवैस्तमोभिः समीक्षणायेव चरा विमुक्ताः ॥३३॥
चन्द्रस्य भानोश्च तदाभिमुख्यात्समन्ततःकेऽपि कराश्चरन्तः ।
परस्परं हन्तुमथोत्थिताभ्यां शरा विमुक्ता इव शातशाताः॥३४॥
विचेष्टितव्याकुलराजहंसं विभिन्नचक्रं व्यथमानकोशम् ।
बलं समाक्रम्य विकर्तनस्य संकोचयामास सहस्रपत्रम् ॥३५॥
संरम्भभीताः शशलाञ्छनस्य संत्यज्य कान्तामपि चक्रवाकाः ।
चमूचरास्त्यक्तसहस्रपत्रकोशा ययुः क्वाप्यरुणस्य कोशाः ॥३६॥
मृगाङ्कमुक्तैर्विशिखैर्मयूखैर्विकर्त्तनस्याशु विभिन्नमूर्त्तैः ।
आरञ्जितेवास्रपरम्पराभिः पूर्वेतरा पुष्करभूमिरासीत् ॥३७॥
शशाङ्कमुक्तैःशतशो निशातैर्बाणैर्विभिन्ना इव भानुजालैः ।
शनैः शनैः सारसबान्धवस्य खञ्जा बभूवुर्निकराः कराणाम्॥३८॥
तेजोनिधिस्तीव्रकरोद्धतोऽपि स्थातुं न शक्तोऽजनि तत्पुरस्तात् ।
काले नियत्या कलितानुकूल्ये कः कं न शत्रुं कलयेदधस्तात् ॥३९॥
संत्यज्य राज्यं सकलं नभोऽन्तं विच्छायतामेत्य विशेषशोच्यः ।
स दीधितीभिः सह सुन्दरीभिः समाप भानुश्चरमाद्रिदुर्गम् ॥४०॥
सतां ध्रुवं सारसमुद्यतानां सम्पद्विपत्योः सदृशेव रीतिः ।
यदस्तमेत्याप्युदयस्थकल्पं प्रकाशमर्कः प्रकटीचकारः ॥ ४१ ॥
वितन्वते विप्रतिपत्तिमार्या विपद्गते नैव विभौ कृतज्ञाः ।
द्विजा यदर्कं दधदर्घ्यहस्ता ववन्दिरे सादरमस्तभाजम् ॥ ४२ ॥
पराजितः पङ्कजबन्धुरेषः पत्या रजन्याः परिहीणतेजाः ।
समुद्र एवापतितुं चकाङ्क्ष पराभिभूतेर्मरणं हि मान्यम् ॥४३॥
विजित्य चन्द्रं पुनराधिपत्यं प्रभाकरः प्राप्तुमुदूढकामः ।
ततान शैलाद्भृगुपातमुच्चैः मानी स्पृहां वैरिजयाय धत्ते ॥४४॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



समस्तदिग्मण्डलचारिणो ये राजन्यसन्मानधनेन पूर्णाः ॥९॥
यत्त्यागमेघोदय एव याते तृप्त्यन्वितो याचकचातकौघः ।
विलोक्यते कीर्तितडिल्लताभिः सुगर्जिते वर्द्धितभूरिसस्ये ॥१०॥
यत्त्यागचन्द्रोदय एव जाते विकासमायाति धनांशुभिस्तु ।
स गम्भीरविद्वत्कुमुदौघ एवामितप्रभे तोषितसच्चकोरे ॥ ११ ॥
यत्त्यागशीतांशुकलोदयेन बुधोदधिः शास्त्रसुवारिपूर्णः ।
अहो ! किमाश्चर्यमिदं हि दृष्टं दारिद्र्यवेलामभिलङ्घतेऽसौ ॥१२॥
विभ्राजते याचकमण्डलीयं सन्मानदानप्रणतिप्रसन्ना ।
श्रीमण्डनेनामितदायिना वै यथौषधीशेन महोडुमाला ॥१३॥
यथान्यदेशीय इहागतो यः सद्याचकौघो बहुदानमानः ।
गतो दिशं स्वां पृथुकीर्तिकारः प्रत्येकतस्तस्य वदन् गुणादीन् ॥
एके गता वर्णितुमस्य दानं प्राचीं सुराजन्यकदम्बकाढ्याम् ।
प्रयागतीर्थादिसुसेव्यमानां मुमुक्षुभिर्भासितपत्तनौघाम् ॥१५॥
केचित्प्रयाता ज्वलनाभिरामामाशां महिपालयशःप्रसन्नाम् ।
विस्फारितुं कीर्तिमनेकधाऽस्य तद्दत्तनानाविधभूतितुष्टाः ॥१६॥
केचित्सुहृष्टा दिशि दक्षिणस्यां स्थित्वा वदन्त्यस्य गभीरतां ते ।
ये प्रेषिताश्चैलतुरङ्गहेमचामीकरोद्भासितकुण्डलाढ्याः ॥ १७ ॥
अन्ये तु याता ककुभं तदन्यां सुशोभितां कोङ्कणराजवृन्दैः ।
स्तोतुं महौचित्यमनेकवारं मनोरथाधिक्यविहायितस्य ॥१८॥
ये वारुणीं वै गमितास्तु काष्ठां सुतीर्थपुण्यां नृपतिप्रसन्नाम् ।
ज्ञातृत्वमर्हद्बहुवर्ण्यमानमर्थिव्रजा मुक्तदरिद्रसङ्गाः ॥ १९ ॥
याता उदीचीमपरेऽर्थिनस्तु मूर्त्ताभिषिक्तप्रचुरां सुपुराम् ।
सौजन्यमस्यामितदायकस्य स्तुत्यं विधातुं परिपूर्णकामाः ॥२०॥
पिनाकपाणिप्रथितां च काष्ठां ये प्रस्थिता याचकपुङ्गवास्तु ।
गुणातिबाहुल्यमनेकधाऽस्य कर्तुं शुभप्राप्तसुराय एव ॥ २१ ॥
दिङ्मण्डलीकीर्त्तितकीर्त्तिपूरः समस्तविद्वद्विहितोन्नतिः सः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पूर्वाचलप्रस्थसभामुखस्थं प्रदोषवेलौषधिदीपिकाभिः ।
अनुष्णभानोरवदातकीर्त्तेरारात्तिकं मङ्गलमाततान ॥ ५८ ॥
महोदधेरुद्धतवारितूर्यं मध्यस्फुरन्मङ्गलरत्नदीपम् ।
तत्र स्थितो वीचिविलासिनीनां विलोक्य नृत्तं मुमुदे सुधांशुः॥५९॥
ततः समानीयत शर्वरी सा पित्रा प्रदोषेण विधोः सकाशम् ।
श्यामा चिराविष्कृतसान्ध्यरागा तमिस्रकेशा चलतारहारा ॥६०॥
तस्याः करग्राहविधिं स कर्तुं चन्द्रः स्वयं सम्भृतरागबन्धः ।
सहैव कालेन पुरोहितेन समुज्ज्वलां व्योमसभां प्रपेदे ॥ ६१ ॥
विकीर्णतारा प्रसवोपहारं विराजमानग्रहरत्नदीपम् ।
विभावरीचन्द्रमसोर्विरेजे वैवाहिकं मण्डपमन्तरिक्षम् ॥ ६२ ॥
क्वचिद्गुरुः क्वापि कविः सभायां क्वचिद्बुधः क्वापि च पार्थिवाद्याः।
समन्ततः साधुकृतोपचारा सेवामतन्वन्त चिराय राज्ञः ॥ ६३ ॥
तिरस्करिण्यामुभयोर्धृतायां मध्येसभं सान्द्रतमिस्रमय्याम् ।
अपाकृतायामभिलाषपूर्वमन्योन्यमालोक्य ननन्दतुस्तौ ॥ ६४ ॥
सान्ध्यांशुवह्नौ समयानुकूलं विकीर्णतारानवलाजमुष्टी ।
वितेनतुर्विश्वजनाभिनन्द्यौ विभावरीचन्द्रमसौ विवाहम् ॥६५॥
इत्येवमासाद्य निशीथिनीं तामिन्धानतेजःप्रसरः कलावान् ।
निरङ्कुशानन्दकरो जनानां नेत्रोत्सवं निर्भरमाततान ॥ ६६ ॥
सन्ताप्य लोकं सकलं करैः स्वैः पपात भास्वानिति पापभीरुः ।
सन्मार्गवर्त्ती स करैरतीक्ष्णैः समस्तमानन्दयति स्म चन्द्रः ॥६७॥
कथं नु वक्ष्यामि कलासु तस्य पत्युर्महत्पाटवमोषधीनाम् ।
सर्वज्ञनामा स शिवोऽपि येन सदा कलामस्य दधाति मूर्ध्ना ॥६८॥
दक्षात्मजा दीव्यदुदाररूपा साक्षात्सगर्भा शिववल्लभायाः ।
तस्यानुरूपाऽजनि धर्मपत्नी रोहिण्यभिख्या रुचिराऽपरा च॥६९॥
कुमुद्वतीनां कुलयोषितां मे तापप्रदास्तु तपनस्य भार्या ।
इति प्रकुप्यन्नयमिन्दुरार्त्तां पादाहतैः पङ्कजिनीमकार्षीत् ॥७०॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रामः शशी रावणमुष्णभानुं निहत्य निस्तीर्य पयोधिपूरः ।
सीतां समाश्वास्य पुनस्त्रियामां कामं व्यधात्कौशिकमात्तहर्षम् ॥७१॥
पक्षेऽवदाते परितोषभाजो वृद्धिः परार्ध्या विबुधैकभोज्या ।
जैवातृकस्यास्य जगत्त्रयेऽपि प्रशस्यमाना प्रबभूव कामम् ॥७२॥
तीक्ष्णोऽयमित्येव शिवप्रकाशः स्थितः स्वयं सत्पथ एव नित्यम् ।
विश्वप्रशस्तेऽपि विना चकार मित्रे मृगाङ्को मुदमुज्ज्वलात्मा ॥७३॥
बुधेन भूयो गुरुणा सनाथां समुल्लसन्मङ्गलकाव्यसक्तिम् ।
समग्रसारस्य गुणाभिरामश्चक्रे सतां सन्ततमेष गोष्ठीम् ॥७४॥
शङ्के सपत्नाभिमतः प्रभूणां वर्ज्यो भवेदात्मकुलोद्भवोऽपि ।
अजो यदब्जेषु निराचकार प्रीतिं प्रभावल्लभबान्धवेषु ॥७५॥
आनन्दयन्लोकमशेषमेष विषाददाताऽजनि विप्रियाणाम् ।
को वा न लोके कुशलाभिलाषी राजा विदध्यादहितोपतापम् ॥७६॥
कलानिधेरस्य बभूव कस्य सन्दर्शनात्कौतुकशालि चेतः ।
दृष्ट्वा यतस्तं दृषदोऽपि काश्चित् द्रुतं द्रुतान्तःकरणा बभूवुः ॥७७॥
राजानमेनं रचितप्रवृत्तिं सन्मार्गमध्ये समवेक्ष्य हर्षात् ।
कामं दधुः कैरवमण्डलानि कूलंकषां कोशविलासलीलाम् ॥७८॥
बिम्बच्छलाद्व्याप्य सरोवरेषु विस्फूर्जदिन्दीवरकैरवेषु ।
म्लानारविन्दप्रकरं व्यहार्षीत्तारावरोधानुगतः सुधांशुः ॥ ७९ ॥
पूर्वाचलप्रस्थवनान्तरेषु दधत्स्वयं दीपकमेणपोतम् ।
वितत्य सर्वत्र मरीचिजालं विभुर्वितेने मृगयाविहारम् ॥ ८० ॥
मुहुर्मृगाङ्कोऽपि वनान्तरेषु विक्षिप्य विक्षिप्य मयूखबाणान् ।
समन्ततः सञ्चरन्तोऽन्धकारवराहयूथानवधीत्सलीलम् ॥ ८१ ॥
निकुञ्जमध्यान्निपतद्भिरन्तः करेषुजालैर्गिरिकन्दरासु ।
पुनः पुनः शीतकरः प्रसुप्तान्प्रबोधयामास मृगेन्द्रपोतान् ॥८२॥
कलानिधिस्तत्र करावघातैर्निर्भिद्य निर्भिद्य तमोगजेन्द्रान् ।
तत्कुम्भजातैरिव मौक्तिकौघैस्ताराकुलैर्भूषयति स्म रात्रिम् ॥८३॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ततः शनैरुज्झितपूर्वशैलवनान्तरो वल्लभया रजन्या ।
विहर्तुकामो वियदन्तगेहं विकीर्णताराकुसुमं प्रपेदे ॥ ८४ ॥
तया पुनस्तत्र विहृत्य कामं संस्तीर्णलीलाशरदभ्रतल्पे ।
सञ्जातखेदः किल सानुरागः स वारुणीं प्राप पुनः शशाङ्कः ॥८५॥
स वारुणीं संप्रतिपद्य चन्द्रो माद्यन्निवोद्यन्मदरागबन्धः ।
तल्पे तटे पश्चिमपर्वतस्य पपात पादस्खलनोपयुक्तः ॥ ८६ ॥
समुल्लसच्चन्दनवाटिकासु सान्द्रेन्दुकान्तोपलशालिनीषु ।
तस्यास्तशैलस्य तटस्थलीषु सहैव पत्न्या निशया स रेमे ॥८७॥
तत्र स्थितः शक्रदिशारमण्याः पयोधरे पूर्वगिरौ सलीलाम् ।
करैर्निजैः कामसखो वितेने पटीरगौरैरनुलेपलक्ष्मीम् ॥ ८८ ॥
तस्याग्रसानोरवतीर्य मन्दं स शर्वरीदत्तकरावलम्बः ।
परिस्फुरत्पल्लवपुष्परम्यं पर्यन्तसीमावनमाससाद ॥ ८९ ॥
चचार तत्सानुवनान्तरेषु स तारकाभिः सह वल्लभाभिः ।
पुरस्कृतः प्रेमजुषा रजन्या पुष्पोपचारक्रिययैव चन्द्रः ॥ ९० ॥
करास्तदीयाः कलिकान्तरेषु पुष्पापचायाय किल प्रविष्टाः ।
वितेनिरे तद्विपिनद्रुमाणां पुङ्खानुपुङ्खां प्रसवस्य लक्ष्मीम् ॥९१॥
तत्रोपविष्टश्चरमाद्रिसानौ क्षणं सुधांशुः क्षणदासहायः ।
व्यलोकयद्विद्रुमवल्लरीभिरापाटलं पश्चिममम्बुराशिम् ॥ ९२ ॥
महानसं तं मरुतामुदारं मन्दाकिनीमङ्गलसूत्रमूलम् ।
मधुद्विषो वासगृहं महाब्धिं मुदं दधौ वीक्ष्य मुहुः कलावान् ॥९३॥
ततः स पुष्पापचयोपजातपरिश्रमः पश्चिमवारिराशेः ।
जले विहर्तुं जनिताभिलाषस्तत्सैकतानां सविधं प्रपेदे ॥ ९४ ॥
स विभ्रमोद्यच्चटुलोर्मिजालविकीर्णमुक्ताफलमेदुरेषु ।
कलानिधिर्विभ्रमकन्दवत्सु चचार तत्सैकतमण्डलेषु ॥ ९५ ॥
वियत्पथोल्लङ्घविशेषखिन्नो विभुर्विशश्राम विभावरीषु ।
समुल्लसच्छीकरकोरकाढ्यैः समीरणैः सागरवीचिजातैः ॥९६॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ततः शनैः सैष कृतानुरागस्ताराबरोधैः शतशः परीतः ।
जलावगाहं जलधेरकार्षीद्विहर्तुकामो विभुरोषधीनाम् ॥ ९७ ॥
स तारकाभिः सह तत्र वार्द्धेः समन्ततो वारि चरन्मृगाङ्कः ।
शङ्खो हरेः पूर्वमिवाभिवीतो मुक्ताभिरात्मोदरनिःसृताभिः ॥९८॥
आरुह्य चारुह्य हठात्सलीलमाक्रम्य लोलामथ वीचिमब्धेः ।
स तारकाभिः सह तत्र रागी चकार दोलाविहृतिं शशाङ्कः॥९९॥

तदनु तुहिनरोचिस्तारकासुन्दरीभिः
परिकलितविहारः पश्चिमाम्भोधिमध्ये ।
सकलमपि च जित्वा शेषलोकान्धकारं
पुनरुदयगतः सन्पूर्वशैलं प्रपेदे ॥ १०० ॥

इति श्रीमालकुलतिलकस्य मण्डनामात्यस्य कृतौ चन्द्रविजयो नाम प्रबन्धः समाप्तः

कार्तिकशुक्लाष्टम्यां बुद्धदिने लिखितं विनायकदासेन ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्रीहेमचन्द्राचार्यग्रन्थावली. ११.

ॐ अर्हम्

मण्डनग्रन्थाङ्कः ४.

# । श्री अलङ्कारमण्डनम् ।

जिनेन्द्रपादाब्जरजःपवित्रं कुर्यात्प्रसन्नं हृदयं सदा वः
नभःस्थलं ध्वान्तसमूहरुद्धं चन्द्रस्य धामेव सुधासवर्णम् ॥१॥
कोदण्डिनीं ताण्डविकुण्डलाभां समाश्रयामो हृदये दयालुम् ।
खण्डेन्दुचूडस्य दृढाभिमानशरव्यखण्डिस्फुटदृग्विलासाम् ॥२॥

अथ काव्यप्रशंसा–

गङ्गातरङ्गान्नहि पापहारि न सुभ्रुवां विभ्रमतो मनोज्ञम् ।
न गुञ्जतो मञ्जु मधुव्रतानां श्राव्यं न काव्यादपरं सुखाय॥३॥
काव्याब्धिगर्भाच्छरदभ्रशुभ्रो विजृम्भते चारुयशःशशाङ्कः ।
ततः कवीन्द्रास्त्रिदशान्विशन्तः सुधौघकल्लोलभुजिं भजन्ते॥४॥
न चित्तशुद्ध्या न च योगबुद्ध्या न दिव्यदृष्ट्या न च भूरि दिष्ट्या।
ब्रह्मप्रबोधादपि दुर्विबोधं काव्यं हि नव्यं रचयन्ति केचित् ॥५॥
नाप्येकपद्यं कुरुतेऽनवद्यं निहत्य निन्द्यं पिशुनस्तु शास्त्रम् ।
न जीवयत्येकमपीह जीवं विनाशयत्याशु बहून्भुजङ्गः ॥ ६ ॥
नव्येन काव्येन सतां प्रमोदः सदा विषादस्तु भवेत्खलानाम् ।
द्राक्षा हि साक्षादमृतोपमेया भजन्ति कीरा न तु सारमेयाः॥७॥
कविवाणीविलासिन्यो विलासान्येन बिभ्रति ।
परोपकरणार्थाय कुर्वेऽलङ्कारमण्डनम् ॥ ८ ॥

अथ काव्यलक्षणम्–

सालङ्कारगुणा सार्थाऽदोषा वाक् काव्यमुच्यते ।
मुख्यध्वन्युत्तमं काव्यं गौणध्वनि तु मध्यमम् ॥ ९ ॥
चित्रं शब्दार्थयोर्यत्तद्ध्वनिहीनं तथाऽधमम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मुख्यध्वनिर्यथा—

विदितमदनसौख्याऽनर्घ्यलावण्यपूर्णा
त्वमसि स च युवा स्त्रीचित्तचौरो विदग्धः ।
विजनमथ पदं तन्नित्यवैचित्यदायि
व्रज सखि ! सहसा मे जीवितं रक्षणीयम् ॥ १ ॥

अमुख्यध्वनिर्यथा—

चन्द्रे प्रबुद्धे स्वमरिचिरोचिरुद्भासितक्ष्मातलदुर्गमार्गे ।
म्लानाननाऽभूत्तरुणी क्षणेन चौर्येण कान्तं प्रति गन्तुकामा ॥२॥

शब्दचित्रं यथा—

उद्वेल्लत्पल्लवोल्लीलवल्लीसंलीनषट्पदः ।
अनिलोल्लासिबकुलगन्धः सुरभिरागतः ॥ ३ ॥

अर्थचित्रं यथा—

रक्ते दिनेशदयिते सति पश्चिमायां सन्ध्याऽरुणा प्रकुपितेव दिनावसाने ।
शान्तालिकोकिलकुलध्वनिता विभाति मौनव्रतं विदधतीव वनस्थलीयम् ॥

अथ काव्योत्पत्तिमाह—

काव्यस्य हेतुः प्रतिभा सर्वशास्त्रावलोकनम् ।
गुरूणां निकटेऽभ्यासः काव्यकृज्जनमित्रता ॥ १० ॥
देशभाषापरिज्ञानं कविच्छायोपजीवनम् ।
सदसल्लोकचातुर्यं छन्दोबन्धनमेव च ॥ ११ ॥
नव्यार्थानां च घटना समस्या पूरणं तथा ।
अर्थसङ्कलना चैव वस्तुरूपविवेकिता ॥ १२ ॥

अथकाव्यशिक्षामाह—

यमकश्लेषचित्रार्थे सदृशौ तु वबौ डलौ ।
अनुस्वारविसर्गाभ्यां चित्रभङ्गो न जायते ॥ १३ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यमके वबौ सदृशौ यथा—

परिणेतुं गतः कृष्णो रुक्मिणीं कन्यकां वरः ।
रुरुचे भानुना तुल्यः स्वर्णवर्णनिभाम्बरः ॥ ५ ॥

डलौ यथा—

पायादुमेशः सुभगं दधानः सदा जटाबन्धभरं कडारम् ।
यत्स्तोत्रगीतिः क्रियते मनोज्ञा प्रसिद्धगन्धर्वगणैः कलारम् ॥ ६ ॥

श्लेषे यथा—

न–बन्धनं गृहे यस्य स गृही सुखमेधते ।
तथैव स महायोगी सद्यस्तत्त्वमवाप्नुयात् ॥ ७ ॥

चित्रे यथा—

सदा विडम्बनां याताः सर्वे देव ! तवारताः ।
जडवन्निर्मलाचारा जवतस्ते कृताः सुराः ॥ ८ ॥
संसृत्याडम्बरहरं जडसन्त्यागभासुरम् ।
जडसंकासहृद्धीरं जिनं भज निजं नृज ! ॥ ९ ॥

अयं छुरिकाबन्धः छत्रं वा ॥

अथ रीतित्रयमाह—

माधुर्यदैस्तु वैदर्भी गौडीयोजःप्रकाशकैः ।
पाञ्चाली चापरैवर्णैरिति रीतित्रयं मतम् ॥ १४ ॥

वैदर्भी यथा—

अनिलान्दोलिता मन्दं मन्दं माकन्दमञ्जरी ।
सुन्दरीव प्रियाश्लिष्टा चकम्पे मधुवर्षणी ॥ १० ॥

गौडीया यथा—

गोपीपयोधरसमुच्चरदुच्चगन्ध–
लुब्धान्धषट्पदभरोज्झितपङ्कजेषु ।
स्वाङ्गप्रभाद्विगुणनीलिमभासुरेषु
रेमे हरिः प्रमुदितो यमुनाजलेषु ॥ ११ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पाञ्चालीमाह—

अलिमालेव तरला सरलौ दृग्विलासिनि ।
कोकिलालापमधुरा वाचा ते वरानने ! ॥ १२ ॥
जिनपादाब्जभृङ्गेण मण्डनेन विनिर्मिते ।
आदिमोऽयं परिच्छेदो गतोऽलङ्कारमण्डने ॥ १५ ॥

## २.

## अथ दोषानाह—

यज्ज्ञानेन विना काव्यं यद्रत्नमिव नो जनाः ।
गृह्णन्ति दुर्निरीक्ष्यांस्तानादौ दोषान्वदाम्यहम् ॥ १ ॥
दोषास्त्रिविधा विज्ञेयाः पदवाक्यार्थसंभवाः ।
पददोषास्तत्राऽश्लीलमप्रतीतं हतार्थकम् ॥ २ ॥
अविमृष्टविधेयांशं च्युतसंस्कृत्यवाचकम् ।
ग्राम्यानुचितनेयार्थक्लिष्टसन्दिग्धमेव च ॥ ३ ॥
श्रुतिकट्वप्रयुक्तं चाथासमर्थं निरर्थकम् ।
विरुद्धमतिकृत्तं तु समासगतमुच्यते ॥ ४ ॥

उदाहरणानि—

अश्लीलं यथा—लज्जानिन्दाऽशुभार्थप्रकाशकम् । यथा—

कूपकान्तर्गतो धीमान्पयो गृह्णाति शीतलम् ।
तन्वङ्ग्याः केशराजीयमिन्द्रनीलधनुष्प्रभम् ॥ १ ॥
काश्चित्सुरुचिराचारः सततं सर्वसंमतः ।
धर्मार्थकाममोक्षाणां धर्मात्मा पञ्चतां गतः ॥ २ ॥

अप्रतीतम्—यन्न सर्वत्र संमतम् । यथा—

सदा सदाहारविहारशीलनं विहाय धृत्वा तरुवल्कलानि च ।
वने वसन्श्वापदवृन्दमध्यगो निराशयो योगिजनो न सीदति ॥३॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आशय 'शब्दो योगशास्त्र एवाशावाचकः, न त्वन्यत्र ॥

**हतार्थकम्**–यत्र प्रसिद्धोऽर्थो द्वितीयेनार्थेन हन्यते । तद्यथा–

जपाकुसुमसंकाशप्रस्फुरच्चारुरोचिषा ।
रक्ताञ्जलिपुटेनार्घं दत्ते सूर्याय भूपतिः ॥ ४ ॥

अत्र 'अरुणाञ्जलिपुटेन' इति प्रकृतोऽर्थः 'रक्ताञ्जलिपुटेन, शोणिताञ्जलिपुटेन' इति निहतः ॥

**अविमृष्टविधेयांशम्**–अमुख्यत्वेन निर्दिष्टो विधेयोंऽशो यत्र तत् । यथा–

स्फुरत्प्रसूनस्तबकस्तनमण्डलसन्नता ।
प्रियभृङ्गसमाश्लिष्टा भाति कान्ता लताऽधुना ॥ ५ ॥

अत्र 'लता कान्ता' इति भाव्यम्, यतो 'लतैव कान्ता' इत्युच्यते ॥

**च्युतसंस्कृतिः**–व्याकरणदुष्टम् । यथा–

शृङ्गारभङ्गी तन्वङ्गि ? तव वर्द्धति साम्प्रतम् ।
ततोऽनुमीयते प्रेम प्रियस्य सुतरां त्वयि ॥ ६ ॥

**अवाचकम्**–प्रभूतार्थवक्तुमसमर्थम् । यथा–

लोलापाङ्गैरङ्गनानां शरीरी लुभ्यत्येवानङ्गसौख्यप्रवीणः ।
तद्वत्सान्द्रैश्चान्द्रपीयूषवर्षैर्हर्षोल्लीलः पारणेच्छुश्चकोरः ॥ ७ ॥

अत्र 'शरीरी' शब्देन कवेराभिप्रायः 'कामी', तं 'शरीरी' इति वक्तुं समर्थः ॥

**ग्राम्यम्**–लोकदुष्टम् । यथा–

कटिर्विशाला तरुणि ! त्वदीया काञ्चीनिनादं प्रतिपादमेति ।
स्तनौ च मत्तद्विपकुम्भपीनौ तद्भारतः किं कृश अेष मध्यः?॥८॥

**अनुचितार्थम्**–औचित्यार्थरहितम् । यथा–

भुजार्जितानर्घ्ययशःस्वरूपबीजप्रवापाय नृपालमौलौ ।
हलीव सङ्ग्रामधरातले त्वमुन्मूलयस्येव रिपुद्रुमालीम् ॥ ९ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नेयार्थम्—स्वमतिप्रक्लृप्तार्थम् । यथा—

बधान तुरगं चन्द्रचूडे मूढ ! विशेषतः ।
क्षणं प्रक्षाल्य वदनं शीतलं विपिनं पिब ॥ १० ॥

अत्र 'चन्द्रचूडस्य स्थाणुः' इत्यभिधानम्, अनेन स्वमत्य 'स्थाणौ हयं बधान' इति कथयति ॥

क्लिष्टम्—यस्यार्थः क्लेशेनावगम्यते । यथा—

सैंहिकेयाभिधानं यद्दधाति तदरिप्रभा ।
जयत्यानन्ददा नित्यं कामिनां भुवनत्रये ॥ ११ ॥

अत्र 'राहोरभिधानं तमो दधाति, तमसो वैरी चन्द्रः; तस्य प्रभा' इति ।

सन्दिग्धं यथा—

स्नेहोल्लासेन वर्द्धन्ते बालकास्तव भामिनि ! ।
किं पुनर्भोक्ति नम्रास्ते चण्डि ! चण्डाट्टहासके ! ॥ १२ ॥

अत्र 'अर्भकाः ? किंवा कचाः ?' इति सन्दिग्धः ॥

श्रुतिकटु—निष्ठुराक्षरत्वात्कर्णोद्वेजनम् । यथा—

निर्मृष्टतरुणीगर्वदुष्टपुष्टमनोभुवा ।
परपुष्टविघुष्टेन मूर्च्छिताः पथिकाङ्गनाः ॥ १३ ॥

अप्रयुक्तम्—यथोचितार्थमपि कविभिरप्रयुक्तम् ।

जुहोति चन्द्रस्य करांश्चकोरी यतोऽन्यदस्या न हि पारणार्थे ।
चन्द्रोऽपि तस्या हरति प्रपीडां परस्य सन्तोषकरा हि सन्तः॥१४

अत्र 'जुहोति' इति भक्षणार्थे केनापि न प्रयुक्तः ॥

असमर्थम्—यस्मै प्रयुक्तमर्थं वक्तुमसमर्थम् । यथा—

यथाविधि विधिज्ञाता ज्ञातॄणां धुरि पूजितः ।
जुहोति गां द्विजायासौ राजा धर्मपरायणः ॥ १५ ॥

अस्य 'हवनार्थे प्रसिद्धिः, तमेवार्थं वक्ति, न तु दानार्थम्' इति । अत एव 'ब्राह्मणाय गां ददाति' अमुं वक्तुमसमर्थम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



निरर्थकम्–अर्थहीनाक्षरकृतपादपूरणमात्रम् । यथा–

यत्करोत्करभीतानामालिङ्गत्यबला स्वयम् ।
वन्दे ऽहं कुमुदानन्दं सदैव हि च वै तु ह्रीति ॥ १६ ॥

विरुद्धम्–असकृदुक्तमात्रमेवान्यथामतिप्रकाशकम् । यथा–

सदा सुखं तव गिरा कार्याचिन्तां करोषि मे ।
सम्बन्धाय कुलीनानां मतिस्तव महामते ! ॥ १७ ॥

अत्र 'सदा असुखम्, अकार्यचिन्ता, कुलीनानां सम्बन्धः–सम्यग्बन्धनम्' इति प्रतीतिः ।

॥ इति पददोषाः ॥

## अथ वाक्यदोषाः

उपहतलुप्तविसर्गं न्यूनाधिककथितपदं च हतवृत्तम् ।
पतत्प्रकर्षविसन्धी विरुद्धवर्णं समाप्तपुनराप्तम् ॥ ५ ॥
भग्नप्रक्रममक्रममर्धान्तरैकवाचकम् । (?)
अनभिहितवाच्यं प्रसिद्धिहतमपदस्थपदसमाससंकीर्णे ।
गर्भितमभवत्परार्थमभवन्मतयोगं तु दुर्वाक्यम् ॥ ६ ॥

उपहतलुप्तविसर्गम्–लुप्तविसर्गता विसर्गस्योकारत्वं च । यथा–

मन उद्यमसक्तं ते हरिध्यानाय केवलम् ।
मन्त्रो विचित्रो भवतो राजते देव ! नित्यशः ॥ १८ ॥

न्यूनपदं यथा–

चन्द्र ! वारय तवांशुमालिकां यत्क्षिणोति किल बालिकामिमाम् ।
नोचितं तु भवतां शुभस्थितेरध्वनीनसदृशां प्रपीडनम् ॥ १९ ॥

अत्र 'भवताम्' इति वचसा 'तव' इति न्यूनम् ॥

अधिकपदं यथा–

अयं युवा मन्मथमूर्त्तिकान्तस्त्वमेव कान्ताऽस्तु समागमोऽद्य ।
ततो युवां प्रेम परस्परं स्याद्यथा रथाङ्गाभिधयोरनल्पम् ॥ २० ॥

अत्र 'मूर्त्तिः' इति ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कथितपदं यथा-

चन्द्रबिम्बसमानं ते वदनं मृगलोचने ! ।
सुधासमानवचनैर्यज्जीवयसि मामिह ॥ २१ ॥

अत्र 'समानम्' इति ॥

हतवृत्तम्-लक्षणहीनमप्राप्तगुरुभावान्तलघु रसप्रतिकूलवृत्तं च ।

क्रमेणोदाहरणानि-

लक्षणहीनं यथा-

जगत्युदारः प्रसरीसरीति गुणगणस्ते शशिकान्तितुल्यः ।
यथा रवेरंशुचयो विचित्रचरित्रकारी कमलोदरेषु ॥ २२ ॥

अत्र 'गुणगण' इति ॥

अप्राप्तगुरुभावान्तलघु यथा-

अभ्युदिते दिवसेश्वरबिम्बं नश्यति प्रतिदिशं तिमिरौघः ।
विजृम्भते परिमलः कमलानां शोभते भ्रमरगुञ्जितमेव॥२३॥

अत्र 'व' इति ॥

रसप्रतिकूलवृत्तं यथा-

किन्नरकण्ठविडम्बनगीता चन्द्रकरव्रजभासुरहासा ।
मन्मथबाणसमानविलासा मुग्धवधूरियमेति सुवेषा ॥ २४ ॥

अेतद्वृत्तं शृङ्गारे हास्यप्रदम् ॥

पतत्प्रकर्षम्-पतितः प्रकर्ष आरम्भवैचित्र्यं यत्र तत् । यथा--

प्रस्फुरत्तरलचन्द्रचन्दनव्याकुलीकृतविलोललोचना ।
कम्पते सपदि सा तु कामिनी मन्मथेन विरहेऽतिपीडिता ।२५।

अत्र प्रथमार्द्धे दार्ढ्यम्, अपरार्द्धे शैथिल्यम् ॥

विसन्धिः-वैरूप्यं विश्लेषोऽश्लीलता च । अनुक्रमेणोदाहरणानि-

वैरूप्यं यथा-

अत्यन्तं मृदुचार्वङ्ग्या नन्विन्द्रोऽपि प्रलोभितः ।
किं नास्ति चन्द्रमस्यद्य सम्पूर्णे प्रियदर्शने ॥ २६ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**विश्लेषो यथा–**

बुद्धिशक्ती अनन्ते ते । इति

**अश्लीलता यथा–**

रम्या वागण्डजोत्तमे ............... ।

भक्तिश्च भवतोऽनन्तपदभक्तस्य किं पुनः ॥ २७ ॥

**विरुद्धवर्णम्**–वीररसोत्कर्षदा वर्णाः शृङ्गारे, शृङ्गारोत्कर्षदा वीरे च।

**उदाहरणं यथा–**

कालिन्द्यां सह कृष्णेन दृप्तकन्दर्पकुर्दनम् ।

हरिणाक्ष्योऽधिकाङ्क्षन्ते कटाक्षक्षेपदक्षिणाः ॥२८ ॥

अत्र कठिना वर्णा न भव्याः । तथा च–

**वीरे**–नृसिंहकरजावल्या शोणितौघेन शोणया ।

रत्नपङ्क्त्येव रुरुचे हिरण्यकशिपोरुरः ॥ २९ ॥

अत्र बन्धशैथिल्यम्, मृदुवर्णना च न भव्या, बन्धशैथिल्यात्, वीररसत्वात् ॥

**समाप्तपुनरात्तं यथा–**

कमलोड्डीनमधुपः कज्जलांशुरिवोद्धतः ।

कुरङ्गलोचनापाङ्गः पातु वोऽनङ्गसायकः ॥ ३० ॥

अत्र 'कुरङ्गलोचनापाङ्गो वः पातु' इत्यत्रैव समाप्तम्, पुनश्च 'अनङ्गसायकः' इति कथिते पुनरात्तम् ॥

**भग्नप्रक्रमम्**–भग्नः प्रक्रम आरम्भो यत्र, तत् । यथा–

प्राणेश्वरो गन्तुकामो यास्यन्ति मम चासवः ।

कर्तव्यं किं मया देव ! शिशिरे मदनोत्करे ॥ ३१ ॥

अत्र 'प्राणा अपि गन्तुकामा' इति भाव्यम् ॥

**अक्रमम्**–न विद्यते क्रमो यत्र, तत् । यथा–

द्वाविमौ दुःखितौ लोके हितायान्यस्य देहिनः ।

साधुश्च मधुरालापी दुर्वचाश्च खलो जनः ॥ ३२ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अत्र 'खलो जनश्च' इति भाव्यम्, 'दुर्वचोश्च' इत्यत्र 'च' कारो न युक्तः ।

अर्थान्तरैकवाचकं यथा-

उन्निद्रमञ्जरीगन्धप्रलुब्धमधुपावली ।
कलगुञ्जेन वाचालो रसालो नु वदत्यसौ ॥ ३३ ॥

अत्र 'मधुपावली, कलगुञ्जेन' इति द्वयोः सन्धौ एकवाचकम् ।

अनभिहितवाच्यम्-यत्रावश्यं वाच्यं नोक्तम् । यथा-

यस्याः पवित्रसरितः सलिलस्य बिन्दु-
र्जन्मार्जितं निखिलपातकमुच्छिनत्ति ।
सा सूर्यजा वद कथं घननीरमध्ये
स्नातस्य कल्मषभरं न करोति दूरम् ॥ ३४ ॥

अत्र 'बिन्दुरपि' इति भाव्यम् ॥

प्रसिद्धिहतं यथा-

रवो गजानां बधिरीकरोति त्रैलोक्यमप्येषु महाहवेषु ।
कल्पान्तकालोत्थघनाघनानां स्फूरन्महागर्जितगर्वलोपी ॥ ३५ ॥

अत्र 'रवः' इति प्रसिद्धिहतम्; यतः-'घनानां स्तनितम् गजानां बृंहितम्' इत्यादि प्रसिद्धम् । रवस्तु मण्डूकभल्लूकादिष्वेव प्रसिद्धः ॥

अपदस्थपदसमासं यथा-

स्वर्भानुना नो कवलीकृतोऽसि निःशेषपीतोऽसि सुरैः कथं नो ।
जगाद काचिच्छशिना सहेति स्फूरत्स्मरस्फारशरप्रभिन्ना ॥ ३६ ॥

अत्रान्त्ये पदे समासो न युक्तः ।

संकीर्णम्-यत्रान्यवाक्यपदान्यन्यवाक्यान्तरं प्रविशन्ति, तत् ।

गाहते कमलमध्यगोचराः शेरते गगनमण्डलमिन्दुः ।
षट्पदास्तुहिनबिन्दुभीरवः संविशन्ति विधुराश्च मन्दिरम् ॥ ३७ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अत्र ' गगनमण्डलमिन्दुर्गाहते ' ' षट्पदाः कमलमध्यगोचराः सन्त शेरते ' इत्यव्यस्तं भाव्यम् ॥

**गर्भितम्**–यत्र वाक्यान्तरमेव वाक्यान्तरं प्रविशति, तत् । यथा–

परदुःखकृतां पुंसां रौरवेषु महास्थितिः ।
सत्यमेतत्पुराणोक्तमाचन्द्रार्कं तु जायते ॥ ३८ ॥

अत्र ' स्थितिर्जायते ' संलग्नमेव भाव्यम् ॥

**अमतपरार्थम्**–अमतः प्रकृतविरुद्धः परार्थो यत्र, तत् । यथा–

त्वत्खड्गवल्ली भात्येषा कामिनीव महीपते ! ।
अरिरक्तौघसिन्दूरमांसकर्दमचन्दना ॥ ३९ ॥

अत्र ' रक्तं सिन्दूरं मांसं चन्दनम् ' इत्युक्ते शृङ्गाररसस्य प्रतिकूलता ।

**अभवन्मतयोगम्**–अभवन्-असिद्धो मतोऽभीष्टः योगः- सम्बन्धो यत्र, तत् । यथा–

स्वगुणोदधिसंवृद्धो दानवारिविराजितः ।
यशश्चन्द्रः प्रकाशेन प्रौढः कस्यापि देहिनः ॥४०॥

अत्र ' देहिनो गुणोदधिसंवृद्धः ' अेवं न लगति, ' यशश्चन्द्रस्य ' एव लगति ॥

॥ इति वाक्यदोषाः ॥

### अथार्थदोषा उच्यन्ते–

**अपुष्टो व्याहतः कष्टः पुनरुक्तश्च दुष्क्रमः ।**
**प्रसिद्धिविद्याविरुद्धः सन्दिग्धोऽथानवीकृतः ॥७॥**
**प्रकाशितविरुद्धश्चाहेतुरश्लील अेव च ।**
**साकाङ्क्षोऽपदमुक्तस्तु त्यक्तानुस्वीकृतः पुनः ॥८॥**
**विध्यनुवादायुक्तः सहचरभिन्नस्तथा पुनर्ग्राम्यः ।**
**दुष्टोऽर्थोऽपि सनियमानियमविशेषाविशेषान्यः ॥९॥**

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अपुष्टो यथा–

पुष्पदन्तो जयत्येष सुरासुरनिषेवितः ।
तपतीतीरपानीयनीरजैः पूजितो द्विजैः ॥४१॥

अत्र 'तीरपानीयादयः' शब्दाः परस्परमर्थपुष्टिदा न भवन्ति

व्याहतो यथा–

तडागभवतः पद्माः सन्ति पद्मालयप्रियाः ।
तथापि मत्प्रियावक्त्रपद्मे पद्मास्थितिप्रिया ॥ ४२ ॥

अत्र पूर्वार्द्धपद्मशब्देन वक्त्रपद्मशब्दार्थो व्याहतः ॥

कष्टो यथा–

उपवनघनवाटिकासु तस्मिन्कुसुमितकुञ्जरजो विवेश नेत्रे ।
स्मरगज इव कामदुर्गमध्ये युगचरितातुरकिन्नराङ्गनानाम् ॥ ४३॥

अत्र 'युगचरितम्' अनेन द्वन्द्वसम्भोगः, 'कुञ्जरजः' अनेन लतागुल्मप्रसूनपरागः; इति कष्टः ॥

पुनरुक्तो यथा

नैव वक्ति परुषाक्षरपङ्क्तिं नाशयत्याविदितः परकार्यम् ।
द्वेष्टि साधुचरितानि खलोऽसौ तत्सुखं क पिशुने सति पुंसाम् ॥४४॥

'दुर्जनः' इत्युक्ते पुनः 'पिशुनशब्दः' पुनरुक्तः ॥

दुष्क्रमो यथा–

कृत्वा देवार्चनं साधो ! बलिदानं ततः शुभम् ।
सिद्धये कुरु कार्यस्य स्नानसन्ध्यादिकं विधिम् ॥ ४५ ॥

प्रसिद्धिविरुद्धो यथा–

अपहाय मधुव्रतोऽधुना नलिनीं दुर्लभसौरभप्रदाम् ।
विटवच्चटुलः पटीरजां भजते कोमलपुष्पमालिकाम् ॥ ४६ ॥

विद्याविरुद्धो यथा–

राहुग्रस्तो निशानाथो यावदेव प्रजायते ।
तावदेव जनः स्नाति कश्चिदाग्रहकारकः ॥ ४७ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ग्रासे स्नानम्, न तु ग्रासात्पूर्वम्; इति विद्याविरुद्धः ॥

सन्दिग्धो यथा–

कीर्त्तिः प्रयाति भवतः सहसैव राजन्
देशान्तरं प्रकुपितेव तवातिदानात् ।
सङ्ग्रामरङ्गनिहतारिसहस्रखिन्नः
कोशं प्रविश्य शममेति च खड्ग एषः ॥ ४८ ॥

अत्र 'तवातिदानात्खण्डनात्प्रकुपिता देशान्तरं याति' इति सान्दिग्धः ॥

अनवीकृतो यथा–

किमधुना वनवासरतेन मे किमधुना जनमध्यगतेन मे ।
किमधुना धनसङ्ग्रहणेन मे स्मर हरस्य पदाम्बुजभाजिनः ॥४९॥

अत्र 'किमधुना' पुनः, इति ॥

प्रकाशितविरुद्धो यथा–

औदार्यस्योपरि नृप ! त्वया प्रीतिर्धृता भृशम् ।
तस्मात्क्रुद्धमिवानर्घ्यं धनं याति दिशो दश ॥ ५० ॥

अत्र 'क्रुद्धं सद्धनं दिशो दश याति' इति प्रकाशितो विरोधः॥

अहेतुर्यथा–

तव परिमलमात्रादपि कुसुमायुधदीपनं सदा भवति ।
तरुणीविलासगुरुरासि परिहर भुजगान्पर्वरसरवे ! ॥ ५१ ॥

अत्र भुजगनिराकरणे हेतुर्नोक्तः ॥

अश्लीलो यथा–

यस्य स्यात्कुटिलैः सार्कं सङ्गः स्तब्धस्य नित्यशः ।
छिद्रप्रवेशिनस्तस्य पतनं भवति ध्रुवम् ॥ ५२ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



साकाङ्क्षो यथा–

मत्तो जलदसमूहो दृप्ता नृत्यन्ति केकिसङ्घाताः ।
अध्वगमूढ ! कथं तां सहसे कान्तां विदेशगताम् ॥ ५३ ॥

'कान्तां त्यक्तुं कथं सहसे' इत्याकाङ्क्षते ॥

अपदमुक्तो यथा–

मित्रं कृष्णो यस्य बन्धुश्च धर्मस्तातः शक्रो विक्रमोऽलौकिकश्च ।
न स्यादन्यः फाल्गुनाद्वल्गुदेवो देवोऽप्येवं सर्वशक्त्याभियुक्तः॥५४।

अत्र 'न स्यादन्यः' इत्यनेनैव सिद्धे 'देवोऽप्येवम्' इति अपदमुक्तः ॥

त्यक्तानुस्वीकृतो यथा–

यद्गुणाः कर्णकुहरे सज्जनानां तु शेरते ।
स एव पुरुषो लोके गुणगौरवभूषितः ॥ ५५ ॥

अत्र 'गुणगौरवभूषितः' इति ॥

त्रिध्यनुवादायुक्तो यथा–

सरस्वति ! नमोऽस्तु ते विहर वक्त्रपङ्केरुहे
महेशगुणवर्णनामृतरसप्रमोदोद्धते ।
मदान्धजनसर्पिणि प्रणयमाशु निन्दापदे
त्यजाशु भज गोष्ठिकां सुजनसङ्गमे सङ्गमे ॥ ५६ ॥

'मदान्धजनसर्पिणि' इत्यावश्यकार्थादन्योऽर्थो विध्यर्थादन्यः, इति ॥

सहचरभिन्नो यथा–

दानेन दाता कपटेन चौरः शौर्येण वीर्यो यशसा नृपालः ।
सत्येन योगी कृपया द्विजन्मा रूपातिरेकं जगति प्रयाति ॥ ५७ ॥

अत्र 'कपटेन' चौरः' इति ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ग्राम्यो यथा–

पुत्रमाताऽसि मे कान्ते ! त्वत्तुण्डं कुण्डलोपमम् ।
स्वगस्यानर्गलाऽसीति श्रोत्रियेणोच्यतेऽङ्गना ॥ ५८ ॥

सानियमान्यो यथा–

दत्तं धनं तदपि ते हृदि नो विकाशः
प्रीतिः कृता त्वयि तथापि न निर्मलत्वम् ।
निष्पादितं तदपि कार्यशतं न वेत्सि
सत्या तवाद्य खलता खल ! भूषणाय ॥ ५९ ॥

अत्र ' खलतैव ' इति सानियमत्वं वाच्यम् ॥

अनियमपरिवृत्तो यथा–

धनेन किल्बिषाऽऽरम्भो विद्ययैव मदोद्धतिः ।
वाचया मित्रनिन्दा च तस्य पुंसः श्रुतेन किम् ॥ ६० ॥

अत्र ' विद्यया अेव ' इति नियमो न वाच्यः ॥

विशेषपरिवृत्तो यथा–

सत्सङ्गमे कस्य न चित्तशुद्धिरसत्पदे कस्य न पापबुद्धिः ।
भवोद्भवे कस्य न भूरि दुःखमुग्रार्चने कस्य सुखं न पुंसः ॥६१॥

अत्र ' उग्रार्चने ' इति सामान्यं न वाच्यम् ॥

अविशेषाम्यो यथा–

जनाः कुर्वन्तु माऽवज्ञां कवीन्द्राणां कथंचन ।
कृष्णद्वैपायनात्किं न कृष्णपाण्डवकीर्त्तनम् ॥ ६२ ॥

अत्र एकस्माद्, इति सामान्यं वक्तव्यम् ॥

धनुर्ज्याहस्तकटककेकिकेकादयः पुनः ।
सान्निध्यवाचिनः शब्दा उत्कर्षप्रतिपत्तिदाः ॥ १० ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यथा—

धनुर्ज्यारोहणं वीर ! कुरु सङ्ग्रामकोविद ! ।

तथा च—

हस्तस्य तस्याः कटकं श्लथत्वं
तन्व्या गतं त्वद्विरहाकुलायाः ।
अद्यापि नो यास्यसि चेन्नृशंस !
प्राणाः पतिष्यन्ति च तेन साकम् ॥ ६३ ॥

तथा च—

श्रूयन्ते केकिनां केका नृत्यतां शिखरे गिरेः ।

इत्याद्यन्यदपि ज्ञातव्यम् ॥

इति श्रीजिनभक्तेन मण्डनेन विनिर्मिते ।
द्वितीयोऽयं परिच्छेदो जातोऽलङ्कारमण्डने ॥ ११ ॥

## ३.

### अथ गुणानाह

पुष्पमालेव ललिता गुम्फिता भाति भारती ।
यैर्मनोहारिभिस्तेऽत्र कथ्यन्ते प्रभवो गुणाः ॥ १ ॥
समतौदार्यमाधुर्यसौकुमार्यप्रसन्नताः ।
समाधिश्लेषकान्त्योजांस्यर्थव्यक्तिर्गुणा दश ॥ २ ॥

बन्धस्य साम्यं समता यथा—

परिजनघनवृन्दा नन्दिनी चारुवृन्दा
वनतरुगतगोपीमण्डली मण्डलं या ।
समदजलदकान्तिः सा समायातु नित्यं
तनुहृदयपयोजं मञ्जुला देवता मे ॥ १ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**तदौदार्यं पदान्तरैः ।**

**अर्थाधिक्यं पदानां स्याद्यत्रैकत्र प्रगुम्फितैः ॥ ३ ॥**

यथा-

हेलाविकाशितविलासपयोजपुञ्ज-
गन्धप्रलुब्धमधुपव्रजगुञ्जरम्यम् ।
सद्यो विनाशितजगत्त्रयतीव्रतापं
पापं हरत्वविरलं तपतीजलं वः ॥२॥

अत्र 'हेला' क्रीडा 'सद्यः' 'प्रलुब्धः' इत्यादिपदान्तरैरन्येषामर्थपुष्टिः ॥

**मधुरार्थप्रकाशित्वं तन्माधुर्यं जगुर्बुधाः ।**

यथा—

तव करसरोजवर्त्ती क्रीडाशुकशावको मया साकम् ।
चुचुम्बिषति तवाधरमिन्दुमुखि ! पक्वबिम्बसमम् ॥ ३ ॥

**यच्च मञ्जुलवर्णत्वं सौकुमार्यं तदुच्यते ॥ ४ ॥**

यथा—

स्थलनिपतितचञ्चच्चान्द्रिकाबिम्बबुद्ध्या
चरणनखमयूखाञ्चुम्बतीयं चकोरी ।
तव सुपदपदवीं चालक्तकार्द्राङ्करक्ता-
मरुणनलिनपङ्क्तिभ्रान्तितः श्यामलेली ॥४॥

**आशुस्फुरणमर्थस्य कथ्यते सा प्रसन्नता ।**

यथा-

श्रीभैरवो जयति भूमिपतिः प्रसन्नः ।

**समाधिरन्यस्य गुणारोपोऽन्यस्मिन्स उच्यते ॥ ५ ॥**

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यथा-

अस्यां दिशि विशालाक्षि ! प्रसरन्ति कराङ्कुराः ।
शशिनो मानिनीमानजयिनः किं विधीयते ॥ ५ ॥

अत्र वृक्षवल्लीमुख्यानामङ्कुराः, तदारोपश्चन्द्रकरेषु; यतश्चन्द्रकरेष्वङ्कुरा न संभवन्ति ॥

**पदानि गुम्फितानीवैकस्मिन्श्लेषः स उच्यते ॥**

यथा-

येनानर्घ्यपराक्रमेण दलिताः सङ्ग्रामरङ्गे रय-
स्त्रातास्त्राणपरायणेन मरणात्पाण्डोरखण्डं सुताः ।
वस्त्राकर्षणविह्वला कुरुसभामध्योद्धृता द्रौपदी
चेतस्तं भज जन्मखण्डनविदं गोविन्दमानन्ददम् ॥६ ॥

**बन्धस्योज्ज्वलता कान्तिः ......... ॥ ६ ॥**

यथा-

कर्पूरपुञ्जोज्ज्वलकान्तिपूरगौरीकृताशेषदिगन्तरालः ।
अनन्तचन्द्रोदयबुद्धिदायी दिवानिशं शं दिशतान्महेशः ॥ ७ ॥

**समासचारुता गद्यपद्ये ओजस्तदुच्यते ।**

यथा-

गोपीपयोधरसमुद्धरदुग्धगन्धलुब्धान्धषट्पदभरोज्झितपङ्कजेषु ।
स्वाङ्गप्रभाद्विगुणनीलिमभासुरेषु रेमे हरिः प्रमुदितो यमुनाजलेषु८

**गूढतार्थसम्पत्तेरर्थव्यक्तिरुदाहृता ॥ ७ ॥**

यथा—

उन्निद्रचन्द्रिकाधौतध्वान्तसङ्घातसुन्दरे ।
कश्चित्सौधतले कामी कामिन्या सह खेलति ॥ ९ ॥

**इति श्रीजिनभक्तेन मण्डनेन विनिर्मिते ।**
**तृतीयोऽयं परिच्छेदो जातोऽलङ्कारमण्डने ॥ ८ ॥**

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## ४.

सालङ्काराऽपि नो भाति तरुणी विभ्रमैर्विना ।
तथा रसैर्विना काव्यमतस्तान्ब्रूमहेऽधुना ॥ १ ॥
विभावैरनुभावैश्च सात्त्विकैर्व्यभिचारिभिः ।
स्थायी रत्यादिको भावो जनितो रस उच्यते ॥२॥
शृङ्गारहास्यकरुणा रौद्रवीरभयानकाः ।
बीभत्साद्भुतशान्ताख्या नवैते कथिता रसाः ॥३॥

तत्र शृङ्गारलक्षणम्—

परस्परं नायिकानायकयोर्वृत्तिः, शृङ्गार उच्यते ।
सम्भोगो विप्रलम्भश्च द्विधा स परिकीर्त्तितः ॥४॥

सम्भोगस्योदाहरणं यथा—

अलीकवार्ताकथनच्छलेन कर्णेऽनुवेलं लगति प्रियायाः ।
कश्चित्कृती चुम्बनलोभसौख्यात्पुरः सखीनां मुकुलीकृतास्यः ॥१॥

विप्रलम्भमाह—

ईर्ष्याभिलाषविरहशापदेशान्तरोद्भवः ।
पञ्चधा विप्रलम्भस्तु कथितः पूर्वसूरिभिः ॥५॥

ईर्ष्याभवो यथा—

लुप्ताङ्गरागारुणनेत्रपद्मं विलोक्य कान्तं दयिता निशान्ते ।
रुरोद हस्तस्थकपोलदेशविनिर्गलत्कज्जलदूषिताश्रु ॥ २ ॥

अभिलाषभवो यथा—

स्वप्ने ममासीन्नयनाभिरामा कामातुरस्य प्रसरत्कुचश्रीः ।
जीवामि चेत्सा तरुणी भुजाभ्यामालिङ्गति प्रीतिधरा मृगाक्षी ।३।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विरहजो यथा–

आसीत्त्रियामा त्रियुगा वियुक्तयोः स्त्रीपुंसयोर्मन्मथबाणभिन्नयोः ।
प्रेम्णा दिवा कोपपदाधिरूढयोरथाङ्गनाम्नोरिव वीतनिद्रयोः ॥४॥

एकजो यथा–

सम्भोगसम्भारमसौ विधाय प्रतीक्ष्यमाणा दयितस्य मार्गम् ।
दिनावसानोत्सुकचित्तवृत्तिर्बाला किल व्याकुलतां प्रपेदे ॥ ५ ॥

शापजो यथा–

परस्परं स्नेहरसाकुलत्वात्कोकाविवोत्कण्ठितचित्तवृत्ती ।
वने मुनेः शापभयावलेपान्माद्री च पाण्डुर्विवशावभूताम् ॥६॥

देशान्तरसमुद्भवो यथा–

कान्तोऽन्यदेशे तरुणं वयश्च परस्परं प्रेम हृदि प्रभूतम् ।
कालो वसन्तो मदनः सगर्वः प्राणप्रयाणं भविता तरुण्याः ॥७॥

अथ हास्यादीनां क्रमादुदाहरणानि ।

हास्यो यथा–

धूर्त्तेन केनापि विनीतवस्त्रा पण्याङ्गना रोदिति राजमार्गे ।
नग्ना निचोलं दधती करेण पृष्ठे विलम्बिप्रविलोलवेणी ॥ ८ ॥

करुणो यथा–

क्वासि जानकि ! कुरङ्गलोचने स्वप्रदर्शनमपि प्रयच्छ मे ।
इत्युदीर्णवचसाश्रुवर्षिणा राघवस्य हृदयं व्यदीर्यत ॥ ९ ॥

रौद्रो यथा–

रक्तोत्पलाताम्रविशालनेत्रास्त्रिशूलधाराप्रविदारितारिः ।
नृसिंहवत्प्रस्फुरताधरौष्ठो बटुः प्रतिज्ञापटुवाक् सुराणाम् ॥१०॥

वीरो यथा–

आनन्दितः सपदि सङ्गररङ्गभूमौ
बाहुद्वयस्फुरणभिन्नसुवारबाणः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कालिन्दिकाजलतरङ्गचलत्कृपाण-
श्वाश्वतुरङ्गमधिरोहति भूतनाथः ॥ ११ ॥

भयानको यथा-

मेखलाघण्टिकानादमुखरीकृतदिङ्मुखः ।
बटुर्जगति नो याति पावकाभोर्ध्वमूर्ध्वजः ॥ १२ ॥

वीभत्सो यथा-

खादन्ति मांसानि पिबन्त्यसृञ्जि भूता मधूनीव कपालपात्रे ।

अद्भुतो यथा-

बाल्येऽपि येनावधि पूतनाऽस्य कृष्णस्य वर्ण्यः किमतः प्रभावः ।

शान्तो यथा-

आपादमूलं नमयन्ति केचिच्छिन्दन्ति केचित्तु वचः कुठारैः ।
तथापि नो वक्ति किमप्यसाधु क्षमाधरो वृक्ष इवैष साधुः ॥१३

देवतामुनिगुर्वादौ रतिर्भावो निगद्यते ।
व्यभिचारी तथा मुख्यो यः स भावः प्रकीर्त्तितः ॥६॥

देवतारतिर्यथा-

रागस्य यस्यास्ति तवाभिधानमालप्तितस्तस्य ममातिसौख्यम् ।
स चेत्स्वयं लोचनगोचरस्त्वं श्रीभैरव! स्याः किमतो वदामि॥१४॥

मुख्यो व्यभिचारी यथा-

यावदेव सखि! चिन्तयाम्यहं प्राणनाथमथ पापकारिणा ।
पुष्पबाणनिचयेन वर्षता मन्मथेन शकलीकृतं मनः ॥१५॥

अत्र विषादः ॥

अथ रसाभासानाह-

रसाभावाश्च ये धर्म्मास्तदाभासास्तु ते स्मृताः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रसाभासो यथा–

एकं दृशा सफलयत्यपरं वचोभि-
रालिङ्गनेन हसनेन यमस्ति सक्ता ।
कापट्यसम्भ्रमविधानविचित्रचित्ता
सा बाणिनी भवति कस्य सुखाय पुंसः ॥ १६ ॥

भावाभासो यथा–

साध्वीं विलोक्य रुचिरां चिरकालमेकः
पिङ्गो निजं सपदि निन्दति जन्मकर्म !
यन्मन्मथो मम वशीकुरुते न चैनां
चीर्णं तदेव निगदन्निति मूढचेताः ॥ १७ ॥

अत्र मुख्यो व्यभिचारी विषादः ॥

शान्तिः शबलता सन्धिर्भावस्य रसपुष्टये ॥ ७ ॥

भावस्य शान्तिर्यथा–

भर्तुर्मार्गं वीक्षमाणा मृगाक्षी मेघालोके कम्पते स्म नताङ्गी ।
आसीत्तस्मिन्मेघकाले मनोऽस्याः रम्योल्लासं विस्फुरद्बाहुवल्याः॥१८॥

अत्र भयमुत्पन्नमुत्साहेन शान्तम् ॥

भावशबलता यथा–

धिग्यौवनं किमधुनाऽस्य मधोर्विधेयं
गन्तव्यमद्य कुसुमेषुशरव्रजात्क्व ? ।
तस्याधमस्य दिवसाः किममी लगन्ति
मोहं गताऽध्वगवधूरिति सन्निगद्य ॥ १९ ॥

अत्र 'धिग्यौवनम्' इति शोकः, 'मधोः किं विधेयम्' इति क्रोधः, 'कुसुमेषु शरात्क्व गन्तव्यम्' इति भयम्, 'तस्याधमस्य दिवसाः' इति निन्दा, 'किं लगन्ति' इति चिन्ता।, एवं भावानां शबलता–मिश्रणम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भावसन्धिर्यथा–

करोमि किञ्चिद्दयितो मदीये पादे पतिष्यत्यपराधभीतः ।
द्रक्ष्यामि दैवादहमेव चैनं तत्पादपद्मे प्रणिपत्य वक्ष्ये ॥ २० ॥

अत्र चिन्तौत्सुक्ययोः सन्धिः ॥

अथ रसदोषाः

व्यभिचारिरसस्थायिशृङ्गाराद्यभिधानतः ।
क्रियते या रसव्यक्ती रसदोषः स उच्यते ॥८॥

व्यभिचारिनाम्ना रसव्यक्तिर्यथा–

सश्रमा सुगमनेऽपि सखेदा गोष्ठिकासु तव मूर्च्छितमोहा ।
दर्शनार्थमथ सा च सचिन्ता विस्मृता किमधुना हरिणाक्षी ? २१

अत्र एवं भाव्यम्–

मन्दमन्दगमनेऽपि सखेदा गोष्ठिकासु तव मूर्च्छितमूर्च्छा ।
ध्यानमिष्टहृदया भक्तोऽसौ दर्शनाय शठ ! मा त्यज बालाम् २२

स्थायिनाम्ना रसव्यक्तिर्यथा–

उत्साहस्तव सङ्ग्रामे क्रोधो रिपुयशस्सु च ।
रतिर्वीरश्रियः सङ्गे त्वं जितात्माऽसि भूपते ! ॥२३॥

अत्र 'उत्साहः' 'क्रोधः' 'रतिः' इति स्थायिन उक्ताः ॥

रसनाम्ना रसव्यक्तिर्यथा–

आनन्दितचकोरौघे चलत्स्वैरिणिकागणे ।
उदिते चन्द्रमस्यासीद्रसः कश्चन कामिषु ॥ २४ ॥

शृङ्गारादिनाम्ना रसव्यक्तिर्यथा—

व्याधस्य बाणेन विभिन्नदेहमार्त्तस्वरं वीक्ष्य वने द्रवन्तम् ।
मृगं विनिर्यद्रुधिरौघरक्तं मुनिर्व्यरोदीत्करुणेन पूर्णः ॥२५॥

अत्र 'करुणेन' इति ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अधुना एतेषां रसानां स्थायिभावानाह—

रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा ।
जुगुप्सा विस्मयश्चेति स्थायिभावाः प्रकीर्त्तिताः ॥ ९ ।

अथ व्यभिचारिणः ।

निर्वेदग्लानिशङ्काख्यास्तथाऽसूयामदश्रमाः ।
आलस्यं चैव दैन्यं च चिन्ता मोहः स्मृतिर्धृतिः ॥ १० ॥
व्रीडा चपलता हर्ष आवेगो जडता तथा ।
गर्वो विषाद औत्सुक्यं निद्राऽपस्मार एव च ॥ ११ ॥
सुप्तं प्रबोधो हर्षश्चाप्यवहित्थमथोग्रता ।
मतिर्व्याधिस्तथोन्मादस्तथा मरणमेव च ॥ १२ ॥
त्रासश्चैव वितर्कश्च विज्ञेया व्यभिचारिणः ।
त्रयस्त्रिंशदमी भावाः समाख्यातास्तु नामतः ॥ १३ ॥
इतिश्रीजिनभक्तेन मण्डनेन विनिर्मिते ।
चतुर्थोऽयं परिच्छेदो जातोऽलङ्कारमण्डने ॥ १४ ॥

## ५.

कोमला सुरसा वाणी वनितेव मनोहरा ।
जायते यैरलङ्कारानधुना कथयामि तान् ॥ १ ॥

### अथालङ्कारोद्देशः

पुनरुक्तवदाभासो वक्रोक्तिश्चित्रमेव च ।
अनुप्रासश्च यमकं श्लेषो मूर्द्धन्यलङ्क्रियाः ॥ २ ॥
अथार्थालङ्क्रियाजाती रूपकाख्यं तथोपमा ।
मालोपमानन्वयश्चोपमेयप्रचुरोपमाः ॥ ३ ॥
उपमेयोपमा चैवोपमानप्रचुरोपमा ।
उत्प्रेक्षाऽपह्नुतिः श्लेषोऽतिशयोक्तिस्तु दीपकम् ॥ ४ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मोला दीपकदृष्टान्तौ प्रतिवस्तूपमा तथा ।
अप्रस्तुतप्रशंसा च व्यतिरेको विभावना ॥ ५ ॥
विशेषोक्तिर्विनोक्तिश्च पर्यायोक्तिः समुच्चयः ॥
व्याजस्तुतिः सहोक्तिश्च परिवृत्तिस्तु तद्गुणः ॥६॥
निदर्शना यथासङ्ख्यं भ्रान्तिमांस्तुल्ययोगिता ।
पर्यायश्च तथाऽन्योऽन्यं विरोधः स्मरणं पुनः ॥७॥
सन्देहाख्यस्तथाऽऽक्षेपो सङ्गतिर्विषमोऽभिधः ।
व्याजोक्त्यर्थान्तरन्यासौ प्रत्यनीकं च भाविकम् ॥८॥
उदात्तमधिकं चैवमनुमानमतद्गुणः ।
एकावली मीलितं च सारः सामान्यकं तथा ॥९॥
व्याघातः परिसङ्ख्या च समं कारणमालिका ।
समाधिश्च समासोक्तिः सूक्ष्मं परिकरस्तथा ॥१०॥
संसृष्टिः शङ्करश्चाथानिश्चयाख्यः स्मृता अमी ।

पुनरुक्तवदाभासो यथा–

अर्थ एक इवाभाति शब्दानां भिन्नरूपिणाम् ।
पुनरुक्तवदाभासः कथ्यते सोऽर्थशब्दयोः ॥११॥

यथा—

घनजलदश्यामाङ्गः सकमलपुण्डरीकानिभनयनः ।
निर्मलमानसचित्तः श्रीकृष्णो हरतु पापं वः ॥ १ ॥

अथ वक्रोक्तिमाह–

प्रस्तुतार्थादन्यार्थः क्रियते बुद्धिवैभवात् ।
भङ्गश्लेषेण काक्वा वा वक्रोक्तिः सा निगद्यते ॥ १२ ॥

भङ्गेन यथा–

कलहे सबलोऽसि त्वं कास्ते मयि हलायुधः ।
ननु कान्तोच्यते रामो वेत्सि दाशरथिं प्रिये ! ॥ २ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्लेषेण यथा–

दृष्टो हरिः किमु हयो न विधुः किमिन्दु-
र्नो माधवः कथमहो ! सुरभिः प्रवृद्धः ।
नासौ धनञ्जयसखः पवनः किमुग्रो
गोप्यः परस्परमिति प्रवदन्ति हास्यात् ॥ ३ ॥

काका यथा—

सौजन्यसिन्धुस्त्वमसि परेषामुपकारकः ।
त्वच्चित्तवृत्तिः सर्वत्र ज्ञायते न पुनः खला ॥ ४ ॥

चित्रमाह–

तच्चित्रं यत्र वर्णाः स्युः पद्माद्याकृतिगोचराः ।
तथा मात्राच्युतं वर्णच्युतं चाश्चर्यकृच्च यत् ॥ १३ ॥

सदाऽसौ रसालः परं भाति नीलः पिकानां शुभाडम्बरेणातिशालः
नवैः पल्लवैर्लम्बमानैर्विलोलः समं पक्षिनीडप्रभाभिर्विशालः ॥५॥

मात्राच्युतं यथा–

मुक्तानां परमाधारः सदार्याकान्तिवर्द्धनः ।
कर्पूरधामधवलो हारः कस्मै न रोचते ॥ ६ ॥

अत्र 'हारः हर' इति ॥

वर्णच्युतं यथा–

स्थायी जगत्रये नित्यं चर्चया प्रकटीकृतः ।
सर्वज्ञानन्दजननो जयत्येको रसः शिवः ॥ ७ ॥

अत्र 'रकारलोपः, स शिवः' इति । विसर्गश्चित्रभङ्गकृत् ॥

अनुप्रासो यथा–

तुल्यवर्णाक्षरयुतावथातत्पदतत्पदौ ।
छेकलाटावनुप्रासौ स्यातां गुणविभूषितौ ॥ १४ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



छेकानां यथा–

कृष्णस्तृष्णाधरो रेमे कामेन सह राधया ।
इन्दिन्दिर इवानन्दी कालिन्दीकमलोत्करे ॥ ८ ॥

लाटानां यथा–

इन्दुमिन्दुधरो देवो भूषणं भूषणोचितम् ।
चक्रे तत्साधु साधूनां सङ्गतिर्मिलनैः सह ॥ ९ ॥

यमकमाह–

भिन्नार्थानामक्षराणामावृत्तिः समताभृताम् ।
यमकं पादतद्भागगोचरं स्यादनेकधा ॥ १५ ॥

तत्रथा–

कान्तेयमुच्चैः शिखरी विभाति विभाति यस्मिंश्च मधोः सुकान्ते ।
इति, इत्थं वा–

तिष्ठति सभासमानः सभासमानः क्षितीन्द्रौघः ।
नमयंश्चामरराजीं चामरराजी सदा कृष्णः ॥ १० ॥

आद्यन्तयमकं यथा–

विराजति रयन्नूनमकालजलदध्वनिम् ।
उत्क्षेपणात्पक्षजातः पवनस्ते विराजति ॥ ११ ॥

अन्तयमकं यथा–

सुरवनं वनजायतलोचनो वनितया प्रहितः प्रययौ हरिः ।
सततमुल्बणगन्धसुशोभितं समदनं मदनन्दितषट्पदम् ॥१२॥

अनेन प्रकारेणानेकधा ज्ञातव्यम् ॥

श्लेषमाह–

अर्थभेदेन भिन्नत्वं वर्णाश्लिष्टास्तु बिभ्रति ।
यत्रोच्यते स श्लेषाख्यो वर्णलिङ्गपदादिभिः ॥ १६ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वर्णेन यथा—

कान्तः कदा यास्यति पक्षिराज! साकं शुकेनेति निगद्य सद्यः ।
तल्पस्थिता मोहमगान्मृगाक्षी सञ्जायते कस्य सुखं वियोगे १३

अत्र वियोगो विरहः, पक्षे—पक्षियोगः ।

लिङ्गेन यथा—

उन्निद्रपुण्डरीकाभे शङ्करध्यानतत्परे ।
दिशतां शं शिवागङ्के श्रीहरेरथ चक्षुषी ॥ १४ ॥

पदेन यथा—

कमलाऽऽलिङ्गितो नित्यं महानीलप्रभाधरः ।
जलप्रवाहः कालिन्द्याः पापं हरतु वा हरिः ॥ १५ ॥

जातिर्यथा—

यथौचित्यं क्रियारूपवर्णनं यत्र वस्तुनः ।
स्वभावोक्तिर्बालमत्तत्रस्तादेषु मनोहरा ॥ १७ ॥

अङ्गणोद्धूतधूलीभिर्धूसराङ्गप्रभाधरः ।
अव्यक्तमधुरालापो हसन् राजति बालकः ॥ १६ ॥

मत्ते यथा—

लोलोलुपो ममधुप! त्वमिह प्रयासि
सौसौरमं ररभसात्प्रसतं च सीधु ।
तोनो तितिष्ठसि गिरा निनिवारितोऽपि
ताताडयाम्यररविन्ददलैर्न वेत्सि ॥ १७ ॥

पाने मत्तायाः कस्याश्चिदुक्तिरियम् ।

त्रस्ते यथा—

पारिप्लवाक्षिकमलोद्धृतकर्णयुग्मः
संत्यक्तवक्त्रगतदर्भदलः क्षणेन ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



संमृग्य चित्रमृगमेष विषादमाप्तः
सद्यः पलायनमतिं कुरुते कुरङ्गः ॥ १८ ॥

व्याधस्योक्तिरियम् ।

वस्तुद्वयस्य साधर्म्यादभेदो रूपकं स्मृतम् ।
समस्तव्यापकमथासमस्तव्यापकं तु तत् ॥ १८ ॥

समस्तव्यापकं यथा—

तारावलीविमलमौक्तिकभूषिताङ्गी
चन्द्रप्रभाधवलचन्दनचारुलेपा ।
सन्ध्याभवाऽरुणिमकुङ्कुमसूक्ष्मरेखा
द्योकामिनी दिवसकान्तमपेक्षतेऽसौ ॥ १९ ॥

असमस्तं यथा—

किं करिष्यति रे दुष्टसंसार ! तव चेष्टितम् ।
श्यामलः कृष्णजलदः सदा जीवनदोऽस्ति नः ॥ २० ॥

अथोपमामाह—

उपमा कथ्यते साम्यमुपमानोपमेययोः ।
तद्वाचकमत्ययाव्ययतुल्यार्थसमासगा ॥ १९ ॥
यस्योपरि यथेवाद्याः स्युस्तस्यैवोपमानता ।

निष्फलीयति संसारं निःसारीयति जीवितम् ।
लोष्ठीयति निधानं च जनः श्रीपतिसेवकः ॥ २१ ॥

यथा च—

व्योमायते प्रबलनीलिम यस्य वक्षो
दीप्तो दिनेश इव राजति कौस्तुभाख्यः ।
पद्मानुजः स्फुरति यस्य गभीरनाभि—
श्रृङ्गस्थितिः कमलजश्च हरिः स पातु ॥ २२ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अन्वयेन यथा–

सचन्दने भात्युरसि श्रीहरेर्वनमालिका ।
मुक्ताफलनिभे गङ्गाजले कालिन्दिका यथा ॥ २३ ॥

एकदेशवर्त्तिनीमुपमामाह–

**स्यादेकदेशवर्त्तिन्युपमा धर्मार्थप्रकाशने ॥ २० ॥**

पुण्डरीकयुगेनेव नेत्रद्वन्द्वेन माधवः ।
अम्भसेव सुशीतेन तेजसा यमुनौघवत् ॥ २४ ॥

अथ मालोपमा–

**मालोपमोपमेयस्योपमानत्वं यथोत्तरम् ।**

तव भारतीव मूर्त्तिर्मूर्त्तिरिव च भारती ।

सुवर्णयुता–

लक्ष्मीरिव ते दृष्टिर्दृग्वल्लक्ष्मीर्हरे ! सुभग ॥ २५ ॥

अनन्वयो यथा–

**अनन्वयोपमैकस्यैवोपमानोपमेयता ॥ २१ ॥**

यथा—

श्रीरामभवतो मूर्त्तिर्भवन्मूर्त्तिरिवोत्तमा ।
यस्या गुणा इव गुणाः सन्ति नान्ये जगत्त्रये ॥ २६ ॥

उपमेयप्रचुरोपमा–

**बहूपमेया कथितोपमेयप्रचुरोपमा ।**

चेष्टितानि हसितानि भाषितान्युत्तमानि यदि मन्यसे खल ! ।
सत्त्वविच्छिवरमेशभाजिनां तर्हि नास्ति तव संसृतेर्भयम् ॥२७॥

उपमेयोपमा–

**वाक्यद्वयविपर्यासे उपमेयोपमोच्यते ॥ २२ ॥**

गङ्गेव निर्मला कीर्त्तिः कीर्त्तिवन्निर्मला मतिः ।
मतिवच्चोज्ज्वला वाणी हरे ! तव सुखप्रदा ॥ २८ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



उपमानप्रचुरोपमा–

बहूपमाना कथितोपमानप्रचुरोपमा ।

गङ्गेव वाचेव सुधेव मूर्त्ता पापघ्नता मूर्तभयोपहर्त्री ।
कर्पूरगौरस्य सुरेशमौलेर्मूर्त्तिः शिवायास्तु जगत्त्रयस्य ॥ २९ ॥

उत्प्रेक्षामाह—

अर्थस्य वर्त्तमानस्य क्रियते घटनाऽन्यथा ॥ २३ ॥
यत्र तद्द्योतिभिः शब्दैरुत्प्रेक्षा सा स्मृता यथा ।

पदनखकिरणावलीव गङ्गा स्फुरति हरे तव भूतले वलन्ती ।
समुदितमिव तिग्मरश्मिबिम्बं लसति च वक्षसि कौस्तुभाख्यरत्नम्

अपह्नुतिः

अपह्नुतिर्निराकृत्योपमेयं साध्यतेऽन्यथा ॥ २४ ॥

कृष्णस्य नेयं वपुषोऽस्ति कान्तिः श्यामा जगत्या वनपुण्यमूर्त्तेः ।
प्रपश्यतः प्रेमभरेण गोपीजनस्य नीलः किल दृष्टिपातः ॥ ३१ ॥

अथवा–

चरणकमलसेवागोचराणां नराणां
त्रिदशपदविभूत्यै दर्शिताचिन्त्यशक्ति ।
भजत भजत लोकाः कृष्णवेषस्य दम्भाद्–
मृतममृतमेतन्मर्त्यलोकेऽवतीर्णम् ॥ ३२ ॥

श्लेषमाह—

श्लेष एकार्थवाचित्वेऽप्यनेकार्थप्रवर्त्तनम् ।

चन्द्रोन्नतिकरो गङ्गातरङ्गालिङ्गितः सदा ।
अन्तर्लीनरमानाथो गम्भीरो राजते हरः ॥ ३३ ॥

अतिशयोक्तिः

उपमेयमनुक्त्वैवोपमानस्यैव निश्चयः ।
यदि योगे द्वितीया च तृतीया प्रस्तुतान्यता ॥२५॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कार्यकारणयोश्चैव परस्परविपर्ययः ।
चतुर्थ्यतिशयोक्तिः सातिशयार्थश्च पञ्चमी ॥ २६ ॥

क्रमेण उदाहरणानि-

श्यामलकमलद्वितयं कनकघटाविन्द्रनीलनीलमुखौ ।
घटितौ काञ्चनवल्ल्यां कल्याणमयीति सा देवी ॥ ३४ ॥

यद्वियोगे—

यद्यञ्जनाद्रेरुपरि प्रभूतं हेम्नो रजः स्याच्छुरितं नितान्तम् ।
तदानुकुर्यात्तव पीतचैलप्रभां घनश्यामलरुक्मिणीशः ॥ ३५ ॥

प्रस्तुतान्यता यथा-

अन्यादृशः स्फुरति यस्य महान्प्रभावः
चातुर्यमप्यसदृशं घटना तथान्या ।
अन्यद्वपुश्च महतामपि चित्तचौरं
संज्ञायते जगति कैरपि गोपवेषः ॥ ३६ ॥

कार्यकारणविपर्ययो यथा-

भीमात्मजाया हृदि ते गुणौघश्चक्रे पदं पूर्वमपूर्वसौख्यः ।
ततस्त्वमिन्दीवरसुन्दराभो मनस्विनीमानहरो मुरारे ! ॥ ३७ ॥

अतिशयार्थो यथा-

श्रीरामचन्द्र ! भवतोऽद्य सविक्रमाङ्कां
गीतिं निशम्य सुरकिन्नरसुन्दरीभ्यः ।
चन्द्रे नुदत्यपि मुदा स्वरसौख्यलुब्धो
रात्रिं चतुर्युगधरां कुरुते कुरङ्गः ॥ ३८ ॥

दीपकं प्रस्तुतान्यतां सकृद्धर्मस्य वर्त्तनम् ।
कारकस्य सकृद्वृत्तिरमितासु क्रियासु च ॥ २७ ॥
माला गुणावहं चेत्स्यादेतद्बोत्तरोत्तरम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कवेरसवती वाणी स्वर्णदी धर्मे निर्णयः ।
श्रीकृष्णस्य पदद्वन्द्वमधमाय न रोचते ॥ ३९ ॥
दोलायते बिभेत्याशु विलोकयति कम्पते ।
गच्छति स्विद्यति चमूररीणां कृष्णदर्शने ॥ ४० ॥

मालादीपकं यथा–

त्वत्तो बाहुर्बाहुतश्चक्रमुग्रं चक्राद्वीर्यं वीर्यतो दैत्यनाशः ।
तस्माल्लोको लोकतः सौख्यमेकं वृद्धं कृष्णेति त्वयि क्ष्मापतीन्द्रे ४१

**समानधर्मोपमेयोपमानप्रतिबिम्बनम् ।**
**दृश्यतेऽत्र स प्रोक्तो दृष्टान्तस्तु मनीषिभिः ॥ २८ ॥**

पुण्डरीकनयनस्य दर्शने याति पापमखिलं किल जन्तोः ।
उद्यते दिवसनाथमण्डले ध्वान्तमेति भुवनत्रितयस्य ॥ ४२ ॥

**इवादिभिर्विना यत्र वस्तुनः प्रतिवस्तुना ।**
**साम्यं प्रकाश्यते सा तु प्रतिवस्तूपमा मता ॥ २९ ॥**

यथा—

चन्द्रोऽङ्गतापं हरति प्रकामं ददाति तोयं जलदः सदैव ।
सूर्यस्तमो हन्ति किमत्र चित्रं परोपकारे महतां स्वभावः ॥४३॥
निर्वापकोऽयमेवैको जलधेरभवच्छशी ।
वसन्ते पुष्पिताः सर्वे तरवः किं सुगन्धयः ॥ ४४ ॥

**अप्रस्तुतेन यत्र स्यात्प्रशंसा प्रस्तुतस्य तु ।**
**अप्रस्तुतप्रशंसा सा कथिता बहुभेदगा ॥ ३० ॥**

अश्नन्सुपक्वानि फलानि तोयं पिबन्सदा निर्झरजं सुशीतम् ।
बिभ्रन्मुदा तारववल्कलानि वने सुखं तापसवृन्दमेति ॥ ४५ ॥

व्यतिरेकमाह–

**साधारणगुणैः साम्ये वस्तुनोः सति यद्यपि ।**
**आधिक्यं तत्र मुख्यस्य व्यतिरेकः स कथ्यते ॥ ३१ ॥**

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गर्वमावह सुन्दरि ! योवनमथ चन्द्रमाः क्षयं याति ।
पुनरभ्युदेति चन्द्रः तारुण्यं क्वापि तन्नास्ति ॥ ४६ ॥

यथा वा—

श्रीकृष्णनाथ ! भवतः पदयुग्ममेत-
त्पङ्केरुहद्वयमिदं च समं वदन्ति ।
आद्यं विनाश्य जडमुल्लसति प्रभावा-
दन्यद्विशुष्यति जडेन विना किमेतत् ॥ ४७ ॥

विभावनामाह—

कारणेन विना यत्र फलव्यक्तिर्विलोक्यते ।
विभावनेत्यलङ्कारं तं वदन्ति मनीषिणः ॥ ३२ ॥

निर्मन्त्रकं किल वशीकरणं जनाना-
मातूर्णनं मृगदृशां च निरासवं यत् ।
संजीवनं तनुभृतां विगतामृतं च
रूपं रमेश ! तव गोचरमस्ति कस्य ॥४८॥

विशेषोक्तिः—

सत्यां कारणसामग्र्यां कार्यं यत्र न दृश्यते ।
विशेषोक्तिरनुक्तोक्ताचिन्त्यहेतुश्च सोच्यते ॥ ३३ ॥

उक्तहेतुर्यथा—

सञ्जीवयति यः कामं राहुग्रस्तोऽपि नित्यशः ।
मानिनीगर्वदलनोऽचिन्त्यशक्तिरयं शशी ॥ ४९ ॥

अचिन्त्यहेतुर्यथा—

सुजनो विभवविहीनो यद्यपि धात्रा धरातले रचितः ।
तदपि च परोपकारं कुरुते चित्तेन वाचा वा ॥५०॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यत्रान्येन विनाऽन्यो न शोभते वेतरं विना।
भात्यन्या सा निगदिता विनोक्तिस्तु मनीषिभिः ॥३४॥

कारुण्येन विना साधुस्साधुनाऽथ विनैव तत्।
अतथ्यं कथ्यते लोकैर्हरिसेवारसोन्मुखैः ॥५१॥

अन्येन विनापि शोभते।

तद्यथा—

विभवेन विनैव योगिनः सुभगत्वं दधते जगत्त्रये।
कनकाभरणं प्रकाशते मणिसङ्गेन विनापि सुन्दरम् ॥५२॥

विवक्षितोऽर्थो वाक्येषु व्यङ्गत्वेनोपलक्ष्यते।
यत्र प्राज्ञैस्तु कथिता पर्यायोक्तिरियं यथा॥ ३५॥

चरन्तीनां वनान्तेषु त्वद्धिया सह वल्लभैः।
कङ्कणेषु रिपुस्त्रीणां रवः प्रीतिं चकार न॥ ५३॥

यथा वा—

कोदण्डकर्षणदृढेन गुणेन यासां
नीताः क्षयं प्रियतमाः समरान्तराले।
हारस्थितानपि गुणान्हरिणायताक्ष्यः
छिन्दन्ति तेऽद्भुतमिदं यदुराजसिंह! ॥५४॥

सिद्धिहेतौ प्रस्तुतस्य बहवो हेतवो यदि।
यस्मिन्भवन्ति स बुद्धैः समुच्चय उदाहृतः॥ ३६॥

विरहव्यथा सुमहती चेतो दुर्वारमुत्सुकत्वधिया।
वज्रनिभो घनशब्दः कठिनः सखि! वल्लभः पथिकः ।५५।

व्याजस्तुतिमाह—

निन्दादम्भात्स्तुतिर्यत्र स्तुतिदम्भाच्च सा पुनः।
व्याजस्तुतिमलङ्कारमामनन्ति तु तं बुधाः ॥३७॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्वं निस्त्रपोऽसि दयितां पदयोः पतन्तीं
नापक्षसे मृगदृशं किमसौ पुनश्च ।
त्वां नैव मुञ्चति शठं हृदयारविन्दा-
द्गोविन्द ! नास्ति भवता सदृशोऽत्र लोके ॥ ५६ ॥

अथवा-

चरणकमलसेवां कारयस्येव नित्यं
क्षणमपि च सुखं नः संभृतेर्नो ददासि ।
किमपरमधुना ते कथ्यते श्रीमुरारे !
तदपि हृतमनित्यं जीवितं चास्मदीयम् ॥ ५७ ॥

स्तुतिदम्भान्निन्दा यथा-

अलमिह खल ! चिन्ताव्याकुलत्वेन निस्यं
श्रुतिपटलगतं ते रोचते भूपतिभ्यः ।
तव जगति जनोऽसौ वश्य अवेत्यवश्यं
भयमपि सुजनानां त्वद्वचः सञ्चयेन ॥ ५८ ॥

सहोक्तिमाह-

सहार्थस्य बलाद्यत्र भवेदुभयवाचकम् ।
एकार्थबोधकं तत्तु सा सहोक्तिस्तु कथ्यते ॥ ३८ ॥

प्रतापेन सहानन्दं सद्यः शमयसि द्विषाम् ।
असुभिः सह सर्वस्वं हरे ! हरासि वाऽसताम् ॥ ५९ ॥

परिवृत्तिमाह-

न्यूनस्य वा समस्य स्यादन्योऽन्यं परिवर्त्तनम् ।
अर्थस्य यत्रालङ्कारः परिवृत्तिरसौ मता ॥ ३९ ॥

दत्त्वा निजं जीवितमेणदृष्ट्या कान्ताय तस्यापहृतं च चेतः ।
बाहुग्रहं तस्य विधाय कण्ठे तद्बाहुबन्धोऽथ पुनर्गृहीतः ॥ ६० ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अत्र आद्यार्द्धे न्यूनेन परिवृत्तिः उत्तरार्द्धे समेन ।

तद्गुणमाह—

संत्यज्यान्यगुणं यस्मिन्नन्यस्य गुणसङ्गमात् ।
तद्गुणत्वं वस्तु याति स तद्गुण इति स्मृतः ॥ ४० ॥

गतमपि किल नीलिमानमङ्गात्सपदि हरेः सितचन्दनस्य लेपात् ।
रचयति पुनरेव गोपिकानां नयनरुचिः पतिताऽलिमालिकाभा ।६१।

निदर्शनामाह—

निदर्शनाऽभवन्वस्तुसंयोग उपमाकरः ।

यथा—

तव क चातुर्यमिदं क स धूर्त्तो रमापतिः ।
मृणालतन्तुना बाले ! करिणं रोद्धुमिच्छसि ॥ ६२ ।

यथा—

अञ्जनमृते सुनीले सुन्दरि ! तव लोचनद्वये स्फुरति ।
मधुकरयुगलनिषेवितकमलश्रियमाननं श्रयति ॥ ६३ ॥

अपरामाह—

क्रिययैव स्वरूपस्य स्वकारस्यावगम्यते ।
सम्बन्धः साऽपरा प्रोक्ता विद्वद्भिस्तु निदर्शना ॥४१॥

तं भजेयुरधमा ध्रुवमेतदुल्लसन्नपि च वारिजपुञ्जः ।
सेव्यते सुमालिनैर्मधुलिड्भिः पङ्कभाग्भवति यः श्रियमाप्त्वा ।६४।

यथासङ्ख्यमाह—

क्रमिकाणां यथासंख्यमर्था यत्र निबद्ध्यते ।
क्रमेण तद्यथासंख्यमलङ्कारस्तु कथ्यते ॥ ४२ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



धर्मस्तपास्विषु पवित्रनृपेषु चार्थः
कामोऽङ्गनासु किल योगिजनेषु मोक्षः ।
कारुण्यतो नयपदात्सुभगाकृति-
त्वाच्छान्तेर्हरे ! जगति भासि चतुर्विधस्त्वम् ॥ ६५ ॥

**सादृश्याज्जायते यत्र निश्चयोऽन्यवस्तुनः ।**
**अन्यस्मिन्वस्तुनि प्रोक्तोऽलङ्कारो भ्रान्तिमान्यथा ॥४३॥**

आरक्तमधुरं दृष्ट्वा तव सुन्दरि ! सुन्दरम् ।
बन्धुजीवस्य कुसुमभ्रान्त्या भृङ्गः पतत्यसौ ॥ ६६ ॥

**तुल्यक्रियादिसामग्र्या यत्र साम्यं प्रकल्प्यते ।**
**वस्तुद्वयस्य सा तुल्ययोगिता कथ्यते बुधैः ॥ ४४ ॥**

सुन्दरि ! तव वदनमिदं चन्द्रोऽनुकरोति तुल्यसामर्थ्यम् ।
चरणयुगं सुकुमारं कोकनदद्वन्द्वमेव तथा ॥ ६७ ॥

अथवा-

मृदूनि पुंसां हृदयानि यस्मिन्प्रोताभिकान्ते सगुणस्तवैव ।
मुक्ताफलानामथ कोमलानामन्तर्गतो विश्वमनोभिरामः ॥६८॥

अथवा-

सततं पङ्कलिप्तानां तापव्याकुलचेतसाम् ।
क्षालनाय हरे ! तोयं त्वदङ्घ्रेर्जलदस्य च ॥ ६९ ॥

पर्यायमाह -

**यत्रैकमेव वस्तु स्यात्क्रिययाऽनेकवस्तुषु ।**
**स पर्यायस्त्वनेकं स्यादेकस्मिन्सोऽन्य उच्यते ॥ ४५ ॥**

काठिन्यं हृदयस्य ते कुचयुगं धत्ते कटाक्षस्ततः
सद्यः प्राणहरस्ततोऽप्यतिबलस्तारुण्यगर्वो महान् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अभ्यासं तु परस्परोत्तरमिति त्वद्दुर्जना: कुर्वते
कान्तेऽसौ परमामृतोऽधरमणिः सौजन्यमालम्बते ॥ ७० ॥

अथास्मिन्ननेकानि यथा-

कारुण्यं परमं परोपकरणव्यापारचिन्ता सदा-
ऽनिच्छा वस्तुनि दुर्लभेऽपि विभवत्यागे समासक्तता
एते यस्य गुणा लसन्ति हृदये धन्यात्मनः सोऽनिशं
गोविन्दस्य पदारविन्दयुगले भृङ्गत्वमापद्यते ॥ ७१ ।

अन्योऽन्यमाह-

अन्योऽन्यं वस्तुनोर्यत्र क्रियया रम्यता भवेत् ।
तदन्योऽन्यमिति ख्यातोऽलङ्कारः कोविदैर्यथा ॥ ४६ ॥

रचयति यमुनाजलं मुरारेर्द्विगुणितनीलिमशोभमङ्गमाशु ।
हरिरपि तदथो शरीरकान्त्या रुचिरतरं महतां स्वभाव अेवम् ७२

अथ विरोधमाह-

यत्र शब्दार्थरचितं विरुद्धत्वं प्रकाशते ।
अतत्त्वतस्तु तं प्राहुर्विरोधाख्यं मनीषिणः ॥ ४७ ॥

चन्द्रोऽचलोऽपि रक्तस्तव पदकमलेऽस्मि देव गोविन्द ! ।
जडमपि भवतः पदगं बुद्धिकरं योगिनां भवति ॥ ७३ ॥

यथा—

इन्दुकराः शरपाताश्चन्दनरसबिन्दवः स्फुलिङ्गौघाः ।
मम जीवितेश चेतस्यभवन्भवतोवियोगार्त्तौ ॥ ७४ ॥

अथवा-

विरहानलदलिते मे मनसि महानसौ कान्तसन्तापः ।
वह्निमान्निवासरसिकाश्चित्रं यज्जीवितोऽसि पुनः ॥ ७५ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



धर्मस्तपस्विषु पवित्रनृपेषु चार्थः
कामोऽङ्गनासु किल योगिजनेषु मोक्षः
कारुण्यतो नयपदात्सुभगाकृति-
स्त्वाच्छान्तेर्हरे ! जगति भासि चतुर्विधस्त्वम् ॥ ६५ ॥

**सादृश्याज्जायते यत्र निश्चयोऽन्यवस्तुनः ।**
**अन्यस्मिन्वस्तुनि प्रोक्तोऽलङ्कारो भ्रान्तिमान्यथा ॥४३॥**

आरक्तमधुरं दृष्ट्वा तव सुन्दरि ! सुन्दरम् ।
बन्धुजीवस्य कुसुमभ्रान्त्या भृङ्गः पतत्यसौ ॥ ६६ ॥

**तुल्यक्रियादिसामग्र्या यत्र साम्यं प्रकल्प्यते ।**
**वस्तुद्वयस्य सा तुल्ययोगिता कथ्यते बुधैः ॥ ४४ ॥**

सुन्दरि ! तव वदनमिदं चन्द्रोऽनुकरोति तुल्यसामर्थ्यम् ।
चरणयुगं सुकुमारं कोकनदद्वन्द्वमेव तथा ॥ ६७ ॥

अथवा-

मृदूनि पुंसां हृदयानि यस्मिन्प्रोताभिकान्ते सगुणस्तवैव ।
मुक्ताफलानामथ कोमलानामन्तर्गतो विश्वमनोभिरामः ॥६८॥

अथवा-

सततं पङ्कलिप्तानां तापव्याकुलचेतसाम् ।
क्षालनाय हरे ! तोयं त्वदङ्घ्रेर्जलदस्य च ॥ ६९ ॥

पर्यायमाह -

**यत्रैकमेव वस्तु स्यात्क्रिययाऽनेकवस्तुषु ।**
**स पर्यायस्त्वनेकं स्यादेकस्मिन्सोऽन्य उच्यते ॥ ४५ ॥**

काठिन्यं हृदयस्य ते कुचयुगं धत्ते कटाक्षस्ततः
सद्यः प्राणहरस्ततोऽप्यतिबलस्तारुण्यगर्वो महान् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अभ्यासं तु परस्परोत्तरमिति त्वद्दुर्ज्जनाः कुर्वते
कान्तेऽसौ परमामृतोऽधरमणिः सौजन्यमालम्बते ॥ ७० ॥

अेकस्मिन्ननेकानि यथा–

कारुण्यं परमं परोपकरणव्यापारचिन्ता सदा–
ऽनिच्छा वस्तुनि दुर्लभेऽपि विभवत्यागे समासक्तता ।
एते यस्य गुणा लसान्ति हृदये धन्यात्मनः सोऽनिशं
गोविन्दस्य पदारविन्दयुगले भृङ्गत्वमापद्यते ॥ ७१ ॥

अन्योऽन्यमाह–

अन्योऽन्यं वस्तुनोर्यत्र क्रियया रम्यता भवेत् ।
तदन्योऽन्यमिति ख्यातोऽलङ्कारः कोविदैर्यथा ॥ ४६ ॥

रचयाति यमुनाजलं मुरारेर्द्विगुणितनीलिमशोभमङ्गमाशु ।
हरिरपि तदथो शरीरकान्त्या रुचिरतरं महतां स्वभाव अेवम् ७२

अथ विरोधमाह–

यत्र शब्दार्थरचितं विरुद्धत्वं प्रकाशते ।
अतत्त्वतस्तु तं प्राहुर्विरोधाख्यं मनीषिणः ॥ ४७ ॥

चन्द्रोज्ज्वलोऽपि रक्तस्तव पदकमलेऽस्मि देव गोविन्द ! ।
जडमपि भवतः पदगं बुद्धिकरं योगिनां भवति ॥ ७३ ॥

यथा—

इन्दुकराः शरपाताश्चन्दनरसबिन्दवः स्फुलिङ्गौघाः ।
मम जीवितेश चेतस्यभवन्भवतोवियोगार्त्तौ ॥ ७४ ॥

अथवा–

विरहानलदलिते मे मनसि महानसौ कान्तसन्तापः
तस्मिन्निवासरसिकाश्चित्रं यज्जीवितोऽसि पुनः ॥ ७५ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्मरणमाह—

अनुभूतेन सदृशे दृष्टे वस्तुनि जायते ।
केनचिद्यत्र धर्मेण स्मृतिस्तत्स्मरणं स्मृतम् ॥ ४८ ॥

कान्तावियोगव्यथितो निकामं दृष्ट्वोदितं पार्वणशर्वरीशम् ।
संस्मृत्य त्यस्या वदनेन्दुबिम्बमालब्य धैर्यं किल जीवितः सः ७६

सन्देहमाह—

एतदेतच्चेति बुद्ध्या यत्र वस्तुनि संशयः ।
स सन्देहस्तु भेदोक्तावभेदोक्तौ च दृश्यते ॥ ४९ ॥

चन्द्रः सोऽयं चेत्कलङ्को न देहे मेघः किं नो शक्रकोदण्डयुक्तः ।
शर्वश्चेत्किं तद्गुणैर्नानुयातः त्वां दृष्ट्वैवं देव ! सर्वे वदन्ति ७७

किं बालमेघो गगनावतीर्णः किं कज्जलाद्रिर्नरवेषधारी ।
इत्थं कवीन्द्राः सरसोक्तिदक्षास्त्वां पुण्डरीकाक्ष ! विलक्षयन्ति ७८

आक्षेपमाह—

निषेधो वक्ष्यमाणोक्तविषयोऽत्र दृश्यते ।
प्रस्तुतस्य स आक्षेपो विद्वद्भिः परिकीर्त्तितः ॥ ५० ॥

अन्तर्गृहं विश मृगाक्षि ! विना प्रियेण
गोत्रं दहन्ति मलयाचलचारुतास्ते ।
नो चेद्यथोदितमृगाङ्ककरप्रभिन्ना
वेगादसूंस्त्यज शठः स समैति यावत् ॥ ७९ ॥

अपि भिन्नस्थिती धर्मौ साध्यसाधनतां गतौ ।
एकत्र यत्र दृश्येते सा सङ्गतिरुदाहृता ॥ ५१ ॥

त्वत्कृपाणप्रभा श्यामा मूर्ध्नि स्फुरति वैरिणाम् ।
दृश्यन्ते च कथं चण्डि ! तद्रामाः कालिकावृताः ८० ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यथावा–

यस्यैव शल्यं हृदये प्रविष्टं तस्यैव पीडेति तदन्यथेश ! ।
भिन्दन्ति बाणास्तव वैरिवर्गास्तदङ्गनानामसवः प्रयान्ति ॥८१॥

विषममाह—

द्वयोरघटमानत्वाद्योगस्त्वाश्चर्यकारकः ।
यत्रोच्यते तं विषममलङ्कारं तु मेनिरे ॥ ५२ ॥

क्वेदं ममोरः कठिनं क ते पादाम्बुजं मृदु ।
मा पीडा तव त्विप्रेति कृष्णः श्रीवत्समावदत् ॥ ८२ ॥

व्याजोक्तिमाह—

मिषेण केनचिद्यत्र वस्तुरूपप्रलोपनम् ।
असावलङ्कृतिः प्राज्ञैर्व्याजोक्तिरिति कथ्यते ॥ ५३ ॥

सख्याः पुरः कुचतटे करजं स्वकीये
व्यालोक्य कापि तरुणी त्वरितेत्यवादीत् ।
धौतोऽपि चन्दनरसैः सखि ! कुङ्कुमाङ्को
नायं प्रलुप्यति कथं कथयास्य हेतुम् ॥ ८३ ॥

अर्थान्तरन्यासमाह–

सामान्येन विशेषो वा विशेषेण तदुच्यते ।
कथ्यतेऽर्थान्तरन्यासः सधर्माद्वाऽन्यधर्मतः ॥ ५४ ॥

कालोपहतभाग्यानां सुधा सापि विषायते ।
विरहव्याकुलहृदश्चन्द्रमा ह्यनलोपमः ॥ ८४ ॥

प्रत्यनीकमाह—

अशक्तो द्वन्द्विनो वैरे यस्तत्सम्बन्धिनं पुनः ।
पीडयेच्च तदुत्कर्षं प्रत्यनीकं तदुच्यते ॥ ५५ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



संनिर्जितो हरिणशावविशालनेत्रे
त्वन्मध्यमेन तनुमध्यधरो मृगेन्द्रः ।
शक्नोति नो तव विरुद्धमयं विधातुं
त्वन्नेत्राचित्रनयनां हरिणीं क्षिणोति ॥ ८५ ॥

त्वत्पादपद्मे नयनाभिरामे तादृक्पयोजद्वयमिन्दुवक्त्रे ! ।
तत्सेवकं कर्त्तुमिदं च पादैः सन्तापयत्येष रुषा मृगाङ्कः ८६

भाविकमाह—

प्रत्यक्षा इव दृश्यन्ते यत्रार्था भूतभाविनः ।
तद्भाविकमिति प्राहुरलङ्कारविदो यथा ॥ ५६ ॥

आसीन्नृसिंहस्य तवातिसेवा संभाव्यते साधुधियेति साधो ! ।
त्वां नेष्यति स्वस्य पदारविन्दद्वन्द्वान्तिकं सोऽद्य ममेति बुद्धिः ॥८७

उदात्तमाह—

बाहुल्यमति वस्तूनां यत्रोदात्तं तदुच्यते ।

राजाङ्गणं तव करीन्द्रमदाम्बुधारा-
पङ्काविलं परिजनाङ्घ्रिविलेपभीत्या ।
मुक्ताफलप्रकरशर्करिलं विभाति
रत्नोपलामलनिबद्धमिदं मुरारे ! ॥ ८८ ॥

अधिकमाह—

यत्राधारोऽथवाऽऽधेयमाधाराधेययोर्महत् ।
महतोरपि जायेत लघुत्वेऽप्यधिकं तु तत् ॥५७॥

रत्नाकर ! महत्त्वं ते वर्ण्यते किमतः परम् ।
यस्मिन्विशालाः सरितो मान्ति त्रैलोक्यसम्भवाः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यत्कुक्षिदेशे लसति जगदप्यणुसन्निभम् ।
स मुरारिः स्थितो यत्र तत्साधोर्मानसं महत् ॥ ८९ ॥

अनुमानमाह–

साध्यसाधकयोरुक्तिः प्रकटा यत्र दृश्यते ।
अनुमानमलङ्कारं तं वदन्ति विचक्षणाः ॥ ५८ ॥

भ्रूवल्लरीपल्लवविभ्रमस्ते यस्योपरिष्टात्स तु दैन्यमुक्तः ।
सञ्जायते कृष्ण ! ततस्त्वदीया दास्येव लक्ष्मीः किल दृश्यतेऽसौ९०

अतद्गुणमाह–

संभवत्यपि योग्यत्वे वस्तुनाऽन्यस्य वस्तुनः ।
गुणेन नैव रज्येत यत्र सोऽतद्गुणः स्मृतः ॥५९॥

मृदुकुसुमसम कुरङ्गदृष्टे ! तव हृदयं कठिनत्वमेति नैव ।
यदपि च कठिनस्तनद्वयेन प्रतिदिवसं निकटस्थितेन युक्तम् ॥९१॥

एकावलीमाह–

आद्यस्य सति चारुत्वे तथाप्युत्तरमुत्तरम् ।
रम्यता क्रियतेऽर्थस्य कथितैकावलीति सा ॥६०॥

तरुणी भूरिचातुर्या चातुर्यं दीप्तमन्मथम् ।
मन्मथोऽमोघसन्धानो वैराग्यं क्वाद्य योगिनाम् ॥९२॥

मीलितमाह–

यस्मिन्सदृशचिह्नेन वस्तुना वस्तु गोप्यते ।
सहजेनाथवाऽन्येन तन्मीलितमिति स्मृतम् ॥६१॥

त्वल्लोचने कोपसमुद्भवोऽपि रागोऽधरस्थः स न दृश्यतेऽद्य ।
कान्तेऽतिपानान्मधुनः सुरक्ते वक्त्रेन्दुबिम्बे हरिणायताक्षि ! ॥९३॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सारमाह–

यत्रोत्तरोत्तरं सारात्सारं सारं तु पूर्वतः ।
निश्चीयते स साराख्योऽलङ्कारः समुदाहृतः ॥६२॥

राज्येषु विभवः सारं विभवे च महाव्ययः ।
महाव्यये च धर्मार्थो धर्मार्थे पात्रसङ्गमः ॥ ९४ ॥

सामान्यमाह–

वस्त्वन्तरेण प्रकृतं वस्तु यत्र प्रलोप्यते ।
अन्योऽन्यगुणसादृश्यात्तु सामान्यमुच्यते ॥६३॥

कनकमन्दिरमध्यगतं हरं तदमितांशुकसंवलितं पुनः
नहि ददर्श गिरेस्तनया क्षणं क्षणमपि प्रहितेक्षणसत्वरा ॥९५॥

व्याघातमाह–

एकेन कृतमन्यादृगन्येन क्रियतेऽन्यथा ।
तेनैव साधनेनासौ व्याघातः परिकीर्त्तितः ॥६४॥

वचसा निर्मिता निन्दा वचसैव निराकृता ।
यैस्ते तु साधवो धन्याः खलगर्वापहारिणः ॥९६॥

परिसंख्यामाह–

प्रश्नादप्रश्नतो वापि यत्किञ्चिद्वाक्यमुच्यते ।
अन्यस्य तु निरासाय परिसंख्या स्मृतेति सा ॥६५॥

किं शीतलं ? हिमकरस्य कराः किमच्छं
साधोर्मनः किममृतं ? कमलेशनाम ।
किं दुःखहारि ? हरपादपयोजसेवा
यच्छीलनेन न पुनर्मनुजत्वमस्ति ॥ ९७ ॥

भूषणं विदुषां किं ? वाक्, न रत्नं स्वर्णसङ्गतम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



महतां किं धनं ? कीर्त्तिर्निधयो न रमापतेः ॥ ९८ ॥

अनृजुत्वं तव दृशि तत्स्तब्धत्वं तव कुचद्वये कठिने ।
मन्दत्वं गतिविभवे हरिणाक्षि ! न दृश्यतेऽन्यत्र ॥ ९९ ॥

क्लेशः संसृतिभंजने न चिन्तने त्रिपुरवैरिणो ।
महतां चिन्ता तत्त्वविवेके न कामिनीसङ्गमे कृतिनाम् ॥१००॥

**सममाह–**

**परस्परं तु साम्येन योगः सम्भाव्यते यदि ।**
**श्लाघ्यत्वाद्वस्तुनोर्यत्र समं तत्परिकीर्त्तितम् ॥ ६६ ॥**

त्वं रूपसम्पदनुपम्यशरीरयष्टि-
रिन्दीवराभरुचिराङ्गरुचिश्च कृष्णः ।
योगो युवां भवति चेद्यमुनातटेऽस्मिन्
दग्धो हरेण किल जीवति पञ्चबाणः ॥ १०१ ॥

**कारणमालामाह–**

**यत्रान्त्यमन्त्यं पूर्वस्य पूर्वस्यार्थस्य कारणम् ।**
**यदा भवति सा प्रोक्ता बुधैः कारणमालिका ॥६७॥**

साधुत्वं जायते पुण्यात्पुण्यं तत्साधुसङ्गमात् ।
साधुसङ्गो हरिप्राप्त्या तदवाप्तिस्तु योगतः ॥ १०२ ॥

**समासोक्तिमाह–**

**यत्रान्यस्यापदेशेन क्रियतेऽन्यस्य निश्चयः ।**
**कथ्यते सा समासोक्तिर्यथाऽलङ्कारकोविदैः ॥६८॥**

कोमलामिह रसालकमालां पीननव्यफलसंनमिताङ्गीम् ।
संविहाय पिक ! यासि दुरात्मन्वञ्चितोऽसि किल त्वद्विधिनैव॥१०३॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



समाधिमाह—

यत्सिध्यति सुखेनैव कारणान्तरयोगतः ।
कारणेऽपि सति प्रोक्तः स समाधिस्तु कोविदैः ॥६९॥

अद्याजिगमिषुः कान्तः प्राप्तोऽयं दिवसोऽवधेः ।
उज्जृम्भितश्च भगवान्वसन्तो मम भाग्यतः ॥१०४॥

सूक्ष्ममाह—

केनचिद्यत्र धर्मेण गूढोऽर्थः संप्रकाश्यते ।
कस्यचित्प्रतिपत्त्यर्थं सूक्ष्मं तत्परिकीर्त्तितम् ॥७०॥

निमील्य नयनद्वन्द्वं परितस्तु विभ्रमय्य कराङ्गुलिकाम् ।
स्वैरिणिका प्रियपुरतश्चन्द्रं ममार्ज भालगं काचित् ॥१०५॥

परिकरमाह—

भाषितं यदभिप्राययुक्तैस्तु स्याद्विशेषणैः ।
अलङ्कारः परिकरः स बुधैः कथ्यते यथा ॥७१॥

अलङ्कृता चन्द्रमुखी सुवेषा चेतोहरा मन्मथगोष्ठिकाभिः ।
प्रेमान्विता यौवनशालिरूपा सा कामिनी कस्य मुदे न पुंसः ॥१०६

संसृष्टिमाह—

स्थितिरेकत्र यत्र स्यादनेकासां तु भेदतः ।
अलङ्कृतीनां संसृष्टिः कथिता सा बुधैर्यथा ॥ ७२ ॥

वर्षतीव सुधां देव ! विबुधानन्ददायिनी ।
तव वाक्चन्द्रिका चन्द्रतुल्यवक्त्रप्रकाशिता ॥ १०७ ॥

अत्र 'सुधां वर्षतीव' इति उत्प्रेक्षा, 'विबुधानन्ददायिनी' इति श्लेषः, 'वाक्चन्द्रिका।' इति रूपकम्, 'चन्द्रतुल्यवक्त्रप्रकाशिता' इत्युपमा, एतेऽलङ्कारा अस्मिन् श्लोके मुख्याः परस्परं दृश्यन्ते।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथ सङ्करमाह–

यत्राङ्गाङ्गित्वभेदेन स्वातन्त्र्यं नैव दृश्यते ।
अलङ्कृतीनां विद्वद्भिः स सङ्कर इति स्मृतः ॥ ७३ ॥

तवाधरं बिम्बफलोपमं प्रिये !
दशत्यसौ कीरयुवा दिवानिशम् ।
भृङ्गोऽप्यथो हास्यसितं विलोकय–
न्सुसौरभं पुष्पधिया प्रयात्ययम् ॥ १०८ ॥

अत्र स्त्रियं प्रति कान्तस्योक्तिः । 'बिम्बफलोपमम्' इत्युप-
ालङ्कारः, 'शुको दशति' इति भ्रान्तिमान्, यतः शुकस्य चित्ते
ारक्तत्वाद् भ्रान्तिः; 'हास्यसीतम्' इत्युक्तेऽतद्गुणः, 'अयं भृङ्गोऽ
े प्रयाति' इति समासोक्तिः, इत्यलङ्काराणां सङ्करः ।

अथानिश्चयमाह–

अेकस्य यत्र स्वीकारे साधकं वाथ बाधकम् ।
न लभ्यते स कथितोऽनिश्चयाख्यो मनीषिभिः ॥७४॥

अब्जमेतत्कुरङ्गाक्षि ! हृदयाह्लाददायकम् ।
विजृम्भते चकोरस्य कुर्वदेतस्य पारणम् ॥ १०९ ॥

'अब्जम्' इति चन्द्रपङ्कजयोः श्लेषः, किंवा वक्त्रं विजृम्भते ?
त्र समासोक्तिः, 'एतस्य चकोरस्य पारणां कुर्वत्' इति अप्रस्तु-
ाशंसा, अत्र कश्चिदलङ्कारः कस्यापि साधको न कस्यापि बाधको
स्ति ।

इति श्रीजिनभक्तेन मण्डनेन विनिर्मिते ।
पञ्चमोऽयं परिच्छेदो जातोऽलङ्कारमण्डने ॥ ७५ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आस्माकीनसरस्वतीविलसितान्युच्छृङ्खलास्ते खला

निन्दन्त्वेव मदान्ध्यवन्ध्यमतयस्तेषां न दुःखानि नः ।

संतुष्यन्तु महाजना हि भुजगग्रामोज्झिते चन्दने

का हानिर्मलयाचलस्य ललितश्चेत्तत्र भोक्ताऽनिलः ॥११०॥

इत्यलङ्कारमण्डनं समाप्तम् । संवत् १५०४ वर्षे मार्गशिर्ष कृष्ण पञ्चम्यां शनौ दिने लिखितं विनायकदासकायस्थेन ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private and Personal Use Only